This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-2902

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
प्रायश्चित्ताख्य व्यस्मृतीयोध्याय	ज्ञानेश्वर भट्ट	धर्मशास्त्र	अपूर्ण	-	9/12	120	संस्कृत	कागद	13			

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वल्पदोषख्यापनपरम् अतएवप्रागुपनयनात्कृतदोषस्योपनयनमेवप्रायश्चित्तमित्युक्तं मनुना गर्भैर्होमैर्जातकर्मचूडामौंजीनिबंधनैः बैजिकंगार्भिकंचै
नोद्विजानामपसृज्यतइति अयमत्रार्थः त्रैवर्णिकानामुत्पत्तिप्रभृतिपैष्टीप्रतिषेधः ब्राह्मणस्यतुमद्यमात्रनिषेधोप्युत्पत्तिप्रभृत्येव राजन्यवैश्ययोस्तुनकदा
चिदपिगौड्यादिमद्यप्रतिषेधः शूद्रस्यतुनसुराप्रतिषेधोनापिमद्यमात्रप्रतिषेधः २५३ प्रायश्चित्तांतरमाह गोच्छागादिलोमनिर्मितवस्त्रप्रावृतोवालवासाः
वालवासोग्रहणंचीरवल्कलयोरुपलक्षणार्थं सुरापगुरुतल्पगौचीरवल्कलवाससौब्रह्महत्याव्रतंचरेयातामितिप्रचेतःस्मरणात् जटीग्रहणंमुंडत्वनिराकरणा
र्थम् ब्रह्महत्याव्रतंचरेदित्यनेनैवसिद्धेयद्वालवसनादिग्रहणं तदन्यत्रसंभवेस्वयंमारितशिरःकपालादिनिवृत्यर्थं इदमकामतो जलबुध्यायः सुरांपिबति

वालवासाजटीवापिब्रह्महत्याव्रतंचरेत् पिण्याकंवाकणान्वापिभक्षयेत्त्रिसमानिशि २५४

तद्विषयम् इयंविशुद्धिरुदिताप्रमाप्याकामतोद्विजमित्यकामत्वोपाधित्वेन विहितस्यैवद्वादशवार्षिकस्यातिदेशात् अत्रचसुरापानस्यमहापातकत्वात्सत्य
प्यातिदेशिकत्वेसंपूर्णमेवद्वादशवार्षिकंकुर्यात् नपादोनम् अतएववृद्धहारीतः द्वादशभिर्वर्षैर्महापातकिनःपूयंतेइति अथवापिण्याकपिंडान्त्रिसमाः वर्ष
त्रयपर्यंतंरात्रौभक्षयेत् कणास्तंदुललवास्तान्वापूर्ववद्भक्षयेत् एतच्चसकृदेवकार्यम् कणान्वाभक्षयेदब्दंपिण्याकंवासकृन्निशीतिमनुस्मरणात् अस्यचपिण्या
कादिभक्षणस्यभोजनकार्येविहितत्वादशनांतरपरित्यागः एतच्चोदकबुध्यासुरापानेच्छर्दनोत्तरकालेवेदितव्यम् एतदेवव्रतंकुर्यान्मद्यपश्छर्दनेकृते पंचगव्यं
तुतस्योक्तं प्रत्यहंकायशोधनमितिव्यासवचनात् नचसुरासंसृष्टेषुदुपलभ्यमानतद्गंधरसोदकपानविषयमिदमितिसुंदरम् संसर्गेपिसुरात्वस्यानपायात् य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थाज्यत्वस्यपृषदाज्ये अतएवाज्यपाइतिनिगमाः कार्याः नपृषदाज्यपाइत्येवंसुक्तंन्यायविद्भिः यत्सुनरापस्तंबवचनम् स्तेयंकृत्वासुरांपीत्वागुरुदारान्गत्वाब्राह्मण
हत्यांचकृत्वाचतुर्थकालंमितभोजनोयोभ्युपेयात्सवनानुकल्पंस्थानासनाभ्यांविहरंस्त्रिर्वर्षैः पापंव्यपनुदतीति यत्तंगिरोवचनम् महापातकसंयुक्तोवर्षैः शुद्ध्य
तितेत्रिभिरिति तदुभयमपिपिण्याकंवाकणान्वेत्यनेनैकविषयम् यदपियमेनप्रायश्चित्तद्वयमुक्तम् बृहस्पतिसवनेनेष्वासुरापोब्राह्मणः पुनः समत्वंब्रा
ह्मणैर्गच्छेदित्येषावैदिकीश्रुतिः भूमिप्रदानंयःकुर्यात्सुरांपीत्वाद्विजोत्तमः पुनर्नचपिबेत्तांतुसंस्कृतः सविशुध्यतीतितदुभयंपूर्वेणसहैकविषयम् यद्वाअ
तिरिक्तदक्षिणाकल्पाश्रयेणद्वादशवार्षिकेणसहविकल्पते अत्रापिबालवृद्धादीनांसार्द्धैकवर्षीयमनुपनीतानांतुनवमासिकमित्येवंकल्पनाकार्या यत्तुमनुवचन
कणान्वाभक्षयेदब्दंपिण्याकंवासकृन्निशि सुरापानापनुत्त्यर्थंवालवासाजटीध्वजीति तत्तुतालुमात्रसंयोगेसुराया अबुद्धिपूर्वेद्रष्टव्यम् ननुचद्रवद्रव्यस्या
प्यव्यवहरणंपानमित्युच्यते अभ्यवहरणंचकंठस्याधोनयनं नतालवादिसंयोगमात्रमतः कथंतत्रपाननिमित्तंप्रायश्चित्तमुच्यते येनतालवादिसंयोगेनवि
नापानक्रियाननिवर्त्तते सोपिपानक्रियाप्रतिषेधेनप्रतिषिद्धः अतोयद्यपिसुरव्यपनाभावान्नमहापातकंतथापितत्प्रतिषेधेनतदंगभूताव्यभिचारितालवा
दिसंयोगस्यापिप्रतिषिद्धत्वेनदोषस्यविद्यमानत्वाद्भवत्येवप्रायश्चित्तम् चरेद्व्रतमहत्वापिघातार्थंचेत्समागतइति यथाहननप्रतिषेधेनतदंगभूताध्यवसायादेर
पिप्रतिषिद्धत्वात्प्रायश्चित्तविधानम् यत्तुबौधायनीयम् त्रैमासिकमभ्यासुरापानेकृच्छ्राब्दपादंचरित्वापुनरुपनयनमिति यच्चयाम्यं सुरांपीत्वाद्विजंहत्वा
रुक्मंहृत्वाद्विजन्मनः संयोगंपतितैर्गत्वाद्विजश्चांद्रायणंचरेदिति यदपिबार्हस्पत्यं गौडीमाध्वीसुरांपैष्टींपीत्वाविप्रः समाचरेत् तप्तकृच्छ्रंपराकंचचांद्रायणम
नुक्रमादिति तत्त्रितयमप्यनन्योषधसाध्यव्याध्युपशमार्थंपानेवेदितव्यम् प्रायश्चित्तस्याल्पत्वात् यदातुसुरासंसृष्टंशुष्करसमेवान्नंभक्षयतितदापु
नरुपनयनम् यथाहमनुः अज्ञानात्प्राश्यविण्मूत्रंसुरासंसृष्टमेवच पुनःसंस्कारमर्हतित्रयोवर्णाद्विजातयइति यदाशुष्कसुराभांडस्थोदकंपिबतित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाशातातपेनोक्तंकुर्यात् सुराभांडोदकपानेच्छर्दनंघृतप्राशनमहोरात्रोपवासश्चेति यत्तुबौधायनीयम् सुरापानस्ययोभांडेष्वपः पर्युषिताः पिबेत् शंख पुष्पीविपक्वंतुक्षीरंसतुपिबेत्र्यहमिति तत्पर्युषितत्वादधिकम् अकामतोभ्यासेपुनर्मनुनोक्तं अपःसुराभाजनस्थामद्यभांडस्थितास्तथा पंचरात्रंपिबेत्क्षीरं शंखपुष्पीस्मृतंपयइति यत्तुविष्णूक्तम् अपःसुराभाजनस्थाःपीत्वासप्तरात्रंशंखपुष्पीस्मृतंपयःपिबेदिति तन्मतिपूर्वकपाने ज्ञानतोभ्यासेतुबृहन्मद्य मआह सुराभांडस्थितंतोयंयदिकश्चित्पिबेत्द्विजः सद्वादशाहंक्षीरेणपिबेद्वाह्मींसुवर्चलामिति सुरापस्यसुरांगंधघ्राणेतुमानवम् ब्राह्मणस्यसुरापस्य गंधमाघ्रायसोमपः प्राणानप्सुत्रिराचम्यघृतंप्राश्यविशुध्यतीति तत्सोमयाजिनएवामतिपूर्वेमतिपूर्वेतुद्विगुणम् अपीतसोमस्यतुकल्प्यम् साक्षा

अज्ञानात्तुसुरांपीत्वारेतोविण्मूत्रमेवच पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयः २५५

सुरागंधघ्राणस्यतुघातिरध्येयमद्ययोरितिजातिभ्रंशकरत्वात् जातिभ्रंशकरंकर्मकृत्वान्यतममिच्छया चरेत्सांतपनंकृच्छ्रंप्राजापत्यमनिच्छयेतिम नूक्तं द्रष्टव्यम् २५४ एवंसुरव्यसुरापानेप्रायश्चित्तमुक्त्वामद्यपानेप्रायश्चित्तमाह यःपुनरज्ञानाद्बुद्ध्यासुरांमद्यंब्राह्मणःपिबति येनब्राह्मणादयो रेतोविण्मूत्राणिप्राश्नंतितेत्रयोपिद्विजातयोवर्णास्तप्तकृच्छ्रपूर्वकंपुनरुपनयनंप्रायश्चित्तमर्हंति अत्रमद्यपानेयोयंपुनःसंस्कारःसब्राह्मणस्यैव क्षत्रि यविशोस्तदप्यनुज्ञानस्यदर्शितत्वात् सुराशब्दश्चात्रमद्यपरः प्रायश्चित्तस्यातिलघुत्वात् अज्ञानतोसुरव्यसुरापानेद्वादशवार्षिकस्यविहितत्वाच्च अत एवगौतमेनात्रमद्यशब्दःप्रयुक्तः अमत्यामद्यपानेपयोघृतमुदकंवायंप्रतिव्यहंतासांनिपिबेत्ततप्तकृच्छ्रस्ततोस्यसंस्कारोमूत्रपुरीषकृणपरेतसांप्राशने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेति यदप्यस्मिन्नेवविषयेमनुनोक्तं अज्ञानाद्यारुणींपीत्वासंस्कारेणविशुध्यतीति तदपितप्रकृच्छ्रपूर्वकमेव गौतमवाक्यानुरोधात् पुनःसंस्कारश्च पुनरुपनयनम् तच्चाश्वलायनाद्युक्तक्रमेणकर्त्तव्यम् यथोक्तं अथोपेतपूर्वस्यकृताकृतंकेशवपेनंमेधाजननंचानिरुक्तंपरिदानंकालश्चतत्सवितुर्वृणीमहइतिसावित्रीमिति मतिपूर्वमद्यपानेवसिष्ठोक्तंद्रष्टव्यम् मत्यामद्यपानेत्वसुरायाः सुरायाश्चाज्ञानेकृच्छ्रातिकृच्छ्रौघृतप्राशनंपुनःसंस्कारश्चेति चांद्रायणंवाशंखोक्तम् असुरामद्यपायीचांद्रायणंचरेदिति मुखमात्रप्रवेशेतुमद्यस्यापस्तंबीयंषड्रात्रम् अभक्ष्याणामपेयानामलेह्यानांचभक्षणे रेतोमूत्रपुरीषाणांप्रायश्चित्तंकथंभवेत् पद्मोदुंबरबिल्वानांपलाशास्यकुशस्यच एतेषामुदकंपीत्वाषड्रात्रेणविशुध्यतीति एतच्चतालादिमद्यविषयम् गौडीमाध्व्योः पुनरज्ञानपाने असुरायाः सुरायाश्चाज्ञानतइतिवसिष्ठोक्तः कृच्छ्रातिकृच्छ्रसहितः पुनःसंस्कारोघृतप्राशश्चद्रष्टव्यः तयोर्मतिपूर्वपानेतुपिण्याकंवाकणान्वेतित्रैवर्णिकम् कामतस्तुतत्पानाभ्यासे अभ्यासेतुसुरायाअग्निवर्णांसुरांपिबेन्मरणात्सूतोभवतीतिवसिष्ठमरणांतिकंद्रष्टव्यम् नात्रसुराशब्दः पैष्ठ्यभिप्रायः तस्याः सकृत्पानेपिमरणांतिकस्यदर्शितत्वात् मद्यवासितशुष्कभांडोदकस्याज्ञानतः पानेबृहद्यमोक्तं मद्यभांडस्थितंतोयंयदिकश्चित्पिबेत्द्विजः कुशमूलविपक्वेनघृतेनक्षीरेणवर्त्तयेदिति अज्ञानतोभ्यासेतुवसिष्ठेनोक्तम् मद्यभांडस्थितंतोयंयदिकश्चित्पिबेत्द्विजः पद्मोदुंबरबिल्वानांपलाशास्यकुशस्यच एतेषामुदकंपीत्वात्रिरात्रेणविशुध्यतीति ज्ञानतःपानेतुविष्णूक्तं मद्यभांडस्थितंतोयंपीत्वापंचरात्रंशंखपुष्पीपयःपिबेदिति ज्ञानतोभ्यासेतुशंखेनोक्तं मद्यभांडस्थितंतोयंपीत्वासप्तरात्रंगोमूत्रंयावकंपिबेदिति अत्यंताभ्यासेतुहारीतोक्तम् मद्यभांडस्थितंतोयंयदिकश्चित्पिबेद्विजः द्वादशाहंतुपयसापिबेद्ब्राह्मीकुवर्च्चलामिति एषुचवाक्येषुद्विजग्रहणंब्राह्मणाभिप्रायं क्षत्रियवैश्ययोरप्रतिषेधादितिदर्शितंप्राक् इदंचगौडीमाध्वीभांडस्थजलपानविषयंगुरुत्वात्प्रायश्चित्तस्य तालादिमद्यभांडोदकपानेतुकल्प्यम् २५५ ६ ६ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विजातिभार्यां प्रत्याह याद्विजातिभार्यासुरांपिबतिसाकृतपुण्यापिसतीपतिलोकंनयातिकिंत्विहैवलोकेश्वगृध्रसूकरलक्षितांतिर्यग्योनिंक्रमेणप्राप्नोति ब्राह्मणीग्रहणंचात्रतिस्रोवर्णानुपूर्व्येणेतिन्यायेनयस्यद्विजातेर्यावत्योभार्यास्तासामुपलक्षणम् अतएवमनुः पतत्यर्धशरीरस्ययस्यभार्यासुरांपिबेत् पतितार्धशरीरस्यनिष्कृतिर्नविधीयतेइति धर्मार्थकामेषुसहाधिकाराद्दंपत्योरेकशरीरत्वमेवातोयस्यद्विजातेर्भार्यासुरांपिबतितस्यभार्यारूपमर्धशरीरंपतनिपतितस्यचभार्यारूपस्यार्धशरीरस्यनिष्कृतिर्नविधीयते तस्माद्विजातिभार्यायाब्राह्मण्याद्यायासुरानपातव्या तस्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरांपिबेदितिनिषेधविधौलिंगस्याविवक्षितत्वेनभार्याणामपिप्रतिषेधेसिद्धेपुनर्वचनंद्विजातिभार्यायाः शूद्रायाअपिसुराप्रतिषेधप्राप्त्यर्थं अतोद्विजातिभार्याभिःसु

पतिलोकंनसायातिब्राह्मणीयासुरांपिबेत् इहैवसाशुनीगृध्रीसूकरीचोपजायते २५६
ब्राह्मणस्वर्णहारीतुराज्ञेमुशलमर्पयेत् स्वकर्मख्यापयंस्तेनहतोमुक्तोपिवाशुचिः २५७

रापानप्रायश्चित्तस्यार्धकार्यम् शूद्रभार्यायास्तुशूद्रायाः शूद्रवदेव नप्रतिषेधः सुरापानसमेषुतुनिषिद्धभक्षणादिषु सुरापानप्रायश्चित्तार्धमित्युक्तं प्राक् इतिसुरापानप्रायश्चित्तप्रकरणम् २५६ क्रमप्राप्तंसुवर्णस्तेयप्रायश्चित्तमाह ब्राह्मणस्वामिकंसुवर्णंयोपहरत्यसौसुवर्णस्तेयंमयाकृतंमित्येवंस्वकर्मख्यापयन् राज्ञेमुशलंसमर्पयेत् मुशलसमर्पणस्यदृष्टार्थत्वात्तेनमुशलेनराजातंहन्यात् तेनराज्ञाहतोमुक्तोवाशुद्धोभवति अपहरणशब्देनचसमक्षं परोक्षंवाबलाच्चौर्येणवाकृयादिस्तत्वहेतुंविनाग्रहणमुच्यते मुशलंसमर्पयेदितियद्यपिसामान्येनोक्तंतथापितस्यहननार्थत्वात्तत्समर्थस्यायोमयादेर्ग्रहणम् अत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमनुनोक्तम् स्कंधेनादायमुशलंलकुटंवापिखादिरम् असिंचोभयतास्तीक्ष्णमायसंदंडमेवति शंखेनाप्यत्रविशेषउक्तः सुवर्णस्तेनः प्रकीर्णकेश
आर्द्रवासाआयसंमुसलमादायराजानमुपतिष्ठेदिदंमयापापंकृतमनेनमुशलेनमांघातयस्वेतिसराज्ञाशिष्टःसन्पूतोभवतीति हननंचावृत्तिविधानाभा
वात्सकृदेवकार्यम् अतएवमनुनोक्तम् ततोमुशलमादायसकृदन्यात्तुतंस्वयमिति एवंसकृत्ताडनेनहतोमृतःशुध्येत् मुक्तोवामरणाज्जीवन्नपि
शुद्ध्येदितियावत् तथाचसंवर्त्तेनोक्तम् ततोमुशलमादायसकृद्धन्यात्तुतंस्वयम् यदिजीवतिसस्तेनस्ततःस्तेयाद्विशुध्यतेइति यथोक्तंब्रह्मवधे
मृतकल्पःप्रहारार्त्तोजीवन्नपिविशुध्यतीति नन्वताडितएवराज्ञामुक्तःस्तेनःशुध्येदित्ययमर्थःकस्मान्नेष्यते उच्यते अघ्नन्नेनस्वीराजेतिगौत-
मीयेताडनमकुर्वतोराज्ञोदोषाभिधानात् भवतुराज्ञोदोषः तथाप्यतिक्रांतनिषेधेनराज्ञास्नेहादिनामुक्तःस्तेनःकथंनशुध्येदितिचेत् उच्यते एवंच
सत्यकारणिकाशुद्धिरापतेतु उच्यतेमोक्षोत्तरकालंद्वादशवार्षिकाद्यनुष्ठानेनशुध्यंगीकरणान्नाकारणिकेति तदप्यसुंदरं मुक्तःशुचिरितिमोक्षस्यै-
वशुद्धिहेतुत्वाभिधानात् अतःप्राच्येवव्याख्याज्यायसी मुक्तोवामरणाज्जीवन्नपिविशुध्येदितियावत् इदंचमरणांतिकंसार्ववर्णिकस्यापहर्त्तुर्न
तुब्राह्मणस्यैव ब्राह्मणस्वर्णहारीतिनैमित्तिकवाक्येविशेषानुपादानात् क्षत्रियादीनांचमहापातकित्वाविशेषात्प्रायश्चित्तांतरस्यानाम्नाच्च यत्पुनर्मानवे
सुवर्णस्तेयकृद्विप्रइतिविप्रग्रहणंतन्नरमात्रोपलक्षणं प्रायश्चित्तीयतेनरइतितस्यैवप्रकृतत्वात् ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमइतिनिमित्तवाक्ये
विशेषानुपादानाच्च तत्सापेक्ष्यनैमित्तिकवाक्येसुवर्णस्तेयकृद्विप्रइत्यत्रश्रूयमाणमप्युपलक्षणमेवयुक्तम् यथाभ्युदितेष्ट्यांयस्यहविरितिवाक्येतंदुलग्र
हणंहविर्मात्रस्य इदंचराज्ञाहननंब्राह्मणव्यतिरिक्तस्य नजातुब्राह्मणंहन्यात्सर्वपापेष्वपिस्थितमितिमानवेब्राह्मणवधस्यनिषिद्धत्वात् यदिकथंचिदतिक्रां
तनिषेधेनराज्ञाहन्यतेतथापिशुद्धोभवति वधेनशुध्यतिस्तेनोब्राह्मणस्तपसैववेतिब्राह्मणस्यापिवधेनशुध्यभिधानात् नचतपसैववेत्येवकारेणवधनिषेधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यकेवलतपसापिशुद्ध्यभिधानपरत्वात् यदिवधोनिषिद्धस्तर्हितपसैववेतिविकल्पाभिधानमनुपपन्नं नचदंडाभिप्रायंविकल्पाभिधानम् तस्यानि
र्दिष्टत्वात् किंचएकार्थास्तुविकल्पेरन्निति न्यायेनैकार्थानामेवविकल्पोव्रीहियवयोरिव नचदंडतपसोरेकार्थत्वं दंडस्यदमनार्थत्वात्तपसश्चपापक्षयहेतुत्वा
त् नचवधेनशुद्ध्यतिस्तेनइतिसामान्यविषयेणवधेनब्राह्मणस्तपसैववेतिविशिष्टविषयस्यतपसोविकल्पोपपत्तिः नहिभवतिब्राह्मणेभ्योदधिदीयतांतक्रं
कौंडिन्यायवेतिविकल्पस्तस्माद्द्वयोरपिसामान्यविषयत्वमेव यद्वाक्षत्रियस्यापिननिषेधः मनुनासुवर्णस्तेयकृद्विप्रइत्यभिधाय गृहीत्वामुशलंराज्ञासकृद्धन्या
त्तुतंस्वयमितिसर्वनाम्नाप्रकृतब्राह्मणपरामर्शेनैवहननविधानात् नजातुब्राह्मणंहन्यादित्यस्यप्रायश्चित्तव्यतिरिक्तदंडरूपहननविषयत्वेनाप्युपपत्तेः ए
तच्चमरणांतिकंमतिपूर्वसुवर्णस्तेयविषयम् मरणांतिकंहियत्प्रोक्तंप्रायश्चित्तंमनीषिभिः तत्तुकामकृतेपापेविज्ञेयंनात्रसंशयइतिमध्यमांगिरसःस्मरणात् अत्र
चसुवर्णशब्दः परिमाणविशिष्टहेमद्रव्यवचनोनजातिमात्रवचनः जालसूर्यमरीचिस्थत्रसरेणूरजःस्मृतं तेष्टौलिक्षातुतास्तिस्रोराजसर्षपउच्यते गौरस्तुते
त्रयः षड्भिर्यवोमध्यस्तुतेत्रयः कृष्णलःपंचतेमाषस्तेसुवर्णस्तुषोडशेतिषोडशमाषपरिमितेहेमनिसुवर्णशब्दस्यपरिभाषितत्वात् अतोब्राह्मणसव-
र्णापहरणंमहापातकमित्यादिप्रयोगेषुकृतपरिमाणस्यैवसुवर्णस्यग्रहणयुक्तम् परिमाणकरणस्यदृष्टार्थत्वात् नह्यदृष्टार्थंपरिमाणस्मरणम् नापिलोकव्यव
हारार्थम् अतत्परत्वात्स्मृतिकारप्रवृत्तेः अतएवोक्तंन्यायविद्भिः कार्यकालेसंज्ञापरिभाषयोरुपस्थानमिति तथानामापिगुणफलोपबंधेनार्थवदित्यु
क्तंपंचदशान्याज्यानीत्यत्रतुनचदंडमात्रोपयोगिपरिमाणस्मरणमितियुक्तम् तावन्मात्रार्थत्वेप्रमाणाभावात् अतोविशेषात्सर्वशेषत्वमेवयुक्तम् किं
च दंडस्यदमनार्थत्वाद्दमनस्यचपरिमाणविशेषमंतरेणासिद्धेर्नातीवपरिमाणस्मरणमुपयुज्यते शब्दैकसमधिगम्येतुमहापातकित्वादावेकांततःस्मरण
मुपयुज्यते अतःषोडशमाषात्मकसुवर्णपरिमितहेमहरणएवमहापातकित्वंतन्निमित्तंमरणांतिकादिप्रायश्चित्तविधानंच द्वित्र्यादिमाषात्मकहेमहर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णंतुक्षत्रियादिहेमहरणवदुपपातकमेवेतियुक्तम् किंच स्फुवर्णान्न्यूनपरिमाणहेमहरणेप्रायश्चित्तांतरोपदेशात्तत्परिमाणस्यहेम्नोहरणेमरणांतिकादिप्रायश्चित्तमितियुक्तम् तथाचोक्तंषट्त्रिंशन्मते वालाग्रमात्रेपहृतेप्राणायामंसमाचरेत् लिक्षामात्रेपिचतथाप्राणायामत्रयंबुधः राजसर्षपमात्रेतुप्राणायामचतुष्टयम् गायत्र्यष्टसहस्रंचजपेत्सापविशुद्ध्ये गौरसर्षपमात्रेचसावित्रींवैदिनंजपेत् यवमात्रेस्फुवर्णस्यप्रायश्चित्तंदिनद्वयम् स्फुवर्णकृष्णलंह्येकमपहृत्यद्विजोत्तमः कुर्यात्सांतपनंकृच्छ्रंतत्पापस्यापनुत्तये अपहृत्यस्फुवर्णस्यमाषमात्रंद्विजोत्तमः गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुद्ध्यति स्फुवर्णस्यापहरणेवत्सरंयावकीभवेत् ऊर्ध्वंप्राणांतिकंज्ञेयमथवाब्रह्महव्रतम् इदंचवत्सरंयावकान्नानंकिंचिन्न्यूनस्फुवर्णापहारविषयम् स्फुवर्णापहारेमन्वादिमहास्मृतिषुद्वादशवार्षिकविधानात् बलाद्येकामकारेणगृण्हंतिस्वंनराधमाः तेषांतुबलहर्तृणांप्राणांतिकमिहोच्यते स्फुवर्णपरिमाणादर्वागपीत्यभिप्रेतम् इदंचस्तेयप्रायश्चित्तमपहृतंधनंतत्स्वामिनेदत्त्वैवकार्यं स्तेयब्रह्मस्वभूतस्यस्फुवर्णादेः कृतेपुनः स्वामिनेपहृतंदेयंहर्त्रेत्येकादशाधिकमितिस्मरणात् तथा चरेत्सांतपनंकृच्छ्रंतन्निर्दिष्टात्मशुद्धयेइतिमनुस्मरणाच्च दंडप्रकरणेप्युक्तं शेषेष्वेकादशगुणंदाप्यस्तस्यचतद्धनमिति यदात्वशक्त्याराजा हंतुमसमर्थस्तदावसिष्ठोक्तंद्रष्टव्यम् स्तेनःप्रकीर्णकेशोराजानमभियाचेततततस्तस्मैराजौदुंबरंशस्त्रंदद्यात्तेनात्मानंप्रमापयेत् मरणात्सूतोभवतीतिविज्ञायतइति औदुंबरंताम्रमयम् यदपिद्वितीयंप्रायश्चित्ततेनोक्तम् निःकालकोगोघृताक्तोगोमयाग्निनापादप्रभृत्यात्मानंप्रमापयेन्मरणात्सूतोभवतीतिविज्ञायतइति तदपिगुरुश्रोत्रियस्यागस्यादिविप्रद्रव्यापहारविषयम् क्षत्रियाद्यपहर्तृविषयंवा तत्रनिःकालकइतिनिर्गतकेशश्मश्रुलोमाभिधीयते तथाश्वमेधाद्यनुष्ठानेनवा यथाप्रचेतसामरणांतिकमभिधायोक्तम् इष्ट्वाश्वमेधेनगोसवेनवाविशुद्ध्येदिति एतच्चविट्क्षत्रियाद्यपहर्तृविषयम् २५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायश्चित्तांतरमाह स्वीयंस्तेयंराजन्यनिवेद्यसुरापव्रतंद्वादशवार्षिकमाचरन् शुध्येत् शवशिरोध्वजतत्कपालधारणनिराकरणार्थंसुरापव्रतमित्यु
क्तम् एतच्चाकामकारविषयम् इयंविशुद्धिरुदिताप्रमाप्याकामतोद्विजमित्यकामतोविहितस्यैवद्वादशवार्षिकस्यातिदेशात् नन्वकामतोपहारएव
नसंभवतीतिकथंतद्विषमत्वमुच्यते यदावस्त्रप्रांतग्रथितंसुवर्णादिकमज्ञानादपहरतिरजतादिद्रव्यांतरबुद्ध्यावाहृत्वानंतरमेवान्यस्मैदत्तंनाशितंवान
पुनः स्वामिनेप्रत्यर्पितंतदासंभवत्येवाकामतोपहारः यस्तुताम्रादिकरसवेधाद्यापादितसुवर्णरूपस्यापहारोनतत्रेदंप्रायश्चित्तम् मुख्यजातिसमवायाभा
वात् नचमुख्यसादृश्यमात्रेणगौणेमुख्यधर्माभवंति यद्यपीदृशमेवासुवर्णंसुवर्णभ्रांत्यापहरतितथापिनेदंप्रायश्चित्तम् असुवर्णापहारित्वादेव नचसृ
ष्टश्चेद्ब्राह्मणवधे अहत्वापीतिवदत्रापिदोषइतिवाच्यम् असुवर्णेप्रवृत्तत्वादेव नह्यब्राह्मणःसृष्टश्चेदित्यस्यविषयः यत्रेदंमनसापापंध्यात्वाप्रणवपूर्व

अनिवेद्यनृपेशुध्येत्सुरापव्रतमाचरन् आत्मतुल्यंसुवर्णंवादद्याद्वाविप्रतुष्टिकृत् २५८

व्याहृतीर्मनसाजपेत् व्याहृत्याप्राणायामत्रिराचरेत्प्रवृत्तौकृच्छ्रंद्वादशरात्रंचरेदिति तदपिसम्यगर्थप्रवृत्तिविषयम् अतोनेदृशमज्ञानतःस्वर्णापहारः
प्रायश्चित्तस्यनिमित्तम् किंतुरजतादिबुद्ध्यापूर्वोक्तएवस्वर्णापहारः अस्मिन्नेवविषयेयदापहर्त्तात्यंतमहाधनः तदात्मतुलितंसुवर्णंदद्यात् अथतावद्धनंना
स्तितपश्चर्यायांचाशक्तस्तदाविप्रतुष्टिकृद्विप्रस्ययावज्जीवंकुटुंबभरणपर्याप्ततयातुष्टिकरंधनंदद्यात् यदानिर्गुणस्वामिकंद्रव्यमपहरतितदा एतदेवव्रतंस्ते
नः पादन्यूनंसमाचरेदितिव्यासेनोक्तंनववार्षिकंद्रष्टव्यम् यदापुनरीदृशमेवक्षुत्क्षामकुटुंबपरिरक्षणार्थमपहरतितदा अत्रिप्रतिपादितषड्वार्षिकंस्वर्जिदादिवा
क्रतुंकुर्यात्तीर्थयात्रांवाषडब्दंवाचरेत् कृच्छ्रंयजेद्वाक्रतुनाद्विजः तीर्थानिवाभ्रमन्विद्वांस्ततःस्तेयाद्विमुच्यतेइति यदात्वपहारसमनंतरमेवमहाकष्टंमया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतमिति जानानुतापः प्रत्यर्पयति त्यजति वा तदापस्तंबीयं चतुर्थकालमिताशनेनत्रिवर्षमवस्थानमांगिरसंवाव्रजारभ्यंत्रैवार्षिकंद्रष्टव्यम् ननुप्रत्यर्पणेत्यागे वापहारधात्वर्थस्यनिष्पन्नत्वात्कथंप्रायश्चित्तात्पत्वम् अथानिष्पन्नस्तदाप्रायश्चित्ताभाव एवस्यान्नतुप्रायश्चित्तात्पत्वम् मैवं अपहारस्योपभोगादिफलपर्यंतत्वादुपभोगात्प्राङ्निवृत्तोचपुष्कलस्यापहारार्थस्याभावायुक्तमेवप्रायश्चित्तात्पत्वंपीतवांतूदवापेयेद्रव्ये नच्चेवंसतिचौरहस्ताद्बलादाकृष्यग्रहणेपितस्योपभोगलक्षणफलाभावात्प्रायश्चित्तात्पत्वप्रसंगः मैवं तस्यत्यागेस्वतः प्रवृत्त्यभावात् फलपर्यंतेपहारेस्वतः प्रवृत्तत्वाच्च यस्तुरजतताम्रादिसंसृष्टस्फुवर्णापहारोनतत्रेदंलघुप्रायश्चित्तम् यतः संसर्गेपिस्फुवर्णत्वंनापैति आज्यत्वमिवपृषदाज्ये अतस्तत्रद्वादशवार्षिकमेवेतियुक्तम् अथस्फुर्णसदृशंद्रव्यांतरमेवेतिलघुप्रायश्चित्तम् उच्यते नतर्हितत्रैवार्षिकादिलघुप्रायश्चित्तादिविषयता अस्फुवर्णत्वादेव किंतूपपातकप्रायश्चित्तमेव यदप्यपरमापस्तंबोक्तम् स्तेयंकृत्वास्फुरांपीत्वाकृच्छ्रंसांवत्सरंचरेदिति तत्स्फुवर्णपरिमाणादर्वाङ्माषाच्चाधिकपरिमाणद्रव्यविषयम् यत्तूक्तंस्फुमंतुना स्फुवर्णस्तेयीमासंसावित्र्याष्टसहस्रमाज्याहुतीर्जुहुयात् प्रत्यहंत्रिरात्रमुपवासंतप्तकृच्छ्रेणचपूतोभवतीति तत्पूर्वोक्तमाषपरिमाणसुवर्णापहारप्रायश्चित्तेनसहविकल्पते यदप्यपरंतेनैवोक्तस्फुवर्णस्तेयीद्वादशरात्रंवायुभक्षःपूतोभवतीतितन्मनसापहारेप्रवृत्तस्यस्वतएवोपरतापजिहीर्षस्यवेदितव्यम् अत्रापिस्त्रीबालवृद्धादिष्वर्धमेवप्रायश्चित्तंवेदितव्यम् यानिचाश्वरत्नमनुष्यस्त्रीभूधेनुहरणंनथेत्यादिनास्फुवर्णस्तेयसमत्वेनप्रतिपादितानितेष्वर्धमूह्यकार्यम् यत्सुनश्चतुर्विंशतिमतवचनम् रूप्यंहृत्वाद्विजोमोहाच्चरेच्चांद्रायणव्रतम् गद्याणदशकादूर्ध्वमाशतात्तद्द्विगुणंचरेत् आसहस्रात्तुत्रिगुणमूर्ध्वंहेमविधिःस्मृतः सर्वेषांधातुलोहानांपरकंतुसमाचरेत् धान्यानांहरणेकृच्छ्रंतिलानामेवमुच्यतम् रत्नानांहरणेविप्रश्चरेच्चांद्रायणव्रतमिति तदपिगद्याणसहस्राधिकरजतहरणेसुवर्णस्तेयसमप्रायश्चित्तप्रतिपादनार्थंनपुनरुक्तिनिवृत्त्यर्थम् यदपिरत्नापहारेचांद्रायणमुक्तम् तदपिगद्याणसहस्राद्धीनमूल्यरत्नापहारेद्रष्टव्यम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊर्ध्वंपुनःस्रुवर्णस्तेयसमम् इतिस्रुवर्णस्तेयप्रायश्चित्तप्रकरणम् २५८ उद्देशक्रमप्राप्तंगुरुतल्पगमनप्रायश्चित्तमाह समावागुरुतल्पगइतिवक्ष्य
माणश्लोकगतंगुरुतल्पगपदमात्रंसंबध्यते तप्तेयशयनेयथामरणक्षमंभवतितथातप्तेअग्निवर्णीकृतेकार्ष्णायसेशयनेअयोमय्यास्त्रीप्रतिकृत्यातप्तयास
हगुरुतल्पगःस्वप्यात् एवंकृत्तांतनुंदेहंउत्सृजेन्म्रियेदितियावत् शयनंचगुर्वंगनागमनंमयाकृतमित्येवंस्वकर्मविरव्याप्यकुर्यात् गुरुतल्पोग्निभाष्ये
नइतिमनुस्मरणात् तथास्त्रियमालिंग्यकार्यं गुरुतल्पगोमृन्मयीमायसींवास्त्रियाः प्रतिकृतिमग्निवर्णीकृतेकार्ष्णायसशयनेअयोमय्यास्त्रीप्रतिकृत्या
कृत्वातामालिंग्यपूतोभवतीतिवृद्धहारीतस्मरणात् तथामुंडितलोमकेशेनघृताभ्यक्तेनकर्त्तव्यम् निःकालकोघृताभ्यक्तस्तप्तांस्त्रीमृन्मयींपरिष्वज्य

तप्तेयःशयनेसार्धमायस्यायोषितास्वपेत् गृहीत्वोल्कृत्यवृषणौनैर्ऋत्यांचोत्सृजेत्तनुम्२५९

मरणात्पूतोभवतीतिविज्ञायतद्वसिष्ठस्मरणात् नचगुरुतल्पोग्निभाष्येनस्तप्तेस्वप्यादयोमये सूर्मीज्वलंतींवाश्लिष्यमृत्युनासविशत्यतीतिमनुवाक्य
विरोधेनतप्तलोहशयनम् तप्तलोहयोषिदालिंगनंचनिरपेक्ष्यप्रायश्चित्तमित्याशंकनीयम् आयस्यायोषितस्वपेत् कुत्रेत्याकांक्षायांतप्तेयः शयनइति
परस्परसापेक्षतयैकत्वावगमादेककल्पत्वमेवयुक्तम् अथवावृषणौसलिंगौस्वयमुत्कृत्यछित्त्वांजलिनागृहीत्वानैर्ऋत्यांदक्षिणप्रतीच्यांदिशिदेहपातांत
मकुटिलगतिर्गत्वातनुमुत्सृजेत् यथाहमनुः स्वयंवाशिश्नवृषणावुत्कृत्याधायचांजलौ नैर्ऋतींदिशमातिष्ठेदानिपातादजिह्मगइति गमनंपृष्ठ
तोवीक्षमाणोनकर्त्तव्यम् क्षुरेणशिश्नवृषणावुत्कृत्यानवेक्षमाणोव्रजेदितिशंखलिखितस्मरणात् एवंगच्छन्यत्रकुड्यादिनाप्रतिबध्यतेतत्रैवमर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णांतंतिष्ठेत् सवृषणंशिश्नमुत्कृत्यांजलावाधायदक्षिणाभिमुखोगच्छेद्यत्रैवंप्रतिहतस्तत्रैवनिषेदाप्रलयादितिवसिष्ठस्मरणात् यथाहनारदः आसा-
मान्यतमांगच्छन्गुरुतल्पगउच्यते शिश्नस्योत्कर्त्तनात्तत्रनान्योदंडोविधीयतेइति एवंदंडार्थमपिलिंगाद्युत्कर्त्तनंपक्षयार्थमपिभवति इदमेवमरणां
तिकदंडमभिप्रेत्योक्तमनुना राजभिर्धृतदंडास्तुकृत्वापापानिमानवाः निर्मलाःस्वर्गमायांतिसंतःसुकृतिनोयथेति धनदंडेनपुनःप्रायश्चित्तंभवत्येव
प्रायश्चित्तंतुकुर्वाणाः सर्ववर्णायथोदितम् नांक्यारान्नालललाटेस्युर्दाप्यास्तूत्तमसाहसमितितेनैवोक्तत्वात् अनयोश्चमरणांतिकयोरन्यतरानुष्ठानेन
गुरुतल्पगः शुध्यत्येत् गुरुशब्दश्चात्रमुख्ययावृत्त्यापितरिवर्त्ततेनिषेकादीनिकर्माणियःकरोतियथाविधि संभावयतिचान्नेनसविप्रोगुरुरुच्यतेइतिमनु
नागुरुत्वप्रतिपादनपरेवाक्येनिषेकादिकर्त्तुर्जनकस्यैवगुरुत्वाभिधानात् योगीश्वरेणत्वनिषेकादिकर्माप्रिप्रायेणोक्तम् सगुरुर्यः क्रियांकृत्वावेदमस्मैप्र
यच्छतीति नत्वगुरुशब्दस्यान्यत्रप्रयोगोपिदृश्यते उपनीयगुरुः शिष्यमित्यादिनाचार्ये स्वल्पंवाबहुवायस्यश्रुतस्योपकरोतियः तमपीहगुरुंविद्या
दित्युपाध्याये व्यासेनाप्यन्यत्रप्रयोगोदर्शितः गुरवोमातृपितृपत्याचार्यविद्यादातृज्येष्ठभ्रातरःकुलिजोभयत्रातान्नदाताचेति नचानेकार्थकल्पना
दोषः गुरुशब्दस्यप्रवृत्तिनिमित्तभूतायाः पूजार्हतायाः सर्वत्रानुस्यूतेः दर्शितंचतस्याः प्रवृत्तिनिमित्तंयोगीश्वरेण एतेमान्यायथापूर्वमेभ्योमातागरी
यसीतिमान्याइत्युपक्रम्यगरीयसीत्युपसंहारंकुर्वता नचोपाध्यायादेशाचार्य आचार्याणांशतंपितेत्युपाध्यायादधिकाचार्यात्पितुरतिशयितत्ववचना
त्सएवमुख्यइतिवाच्यं आचार्येप्यतिशयितत्वस्याविशिष्टत्वात् उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पितेति गौतमेनाप्युक्तम् आचार्यः श्रेष्ठोगुरूणामि
ति किंचयद्यतिशायितमात्रेणमुख्यत्वमुच्यते तर्हिसहस्रमितिवचनान्मातुरेवगुरुत्वंस्यात् तस्मात्सर्वगुरुत्वंस्तुत्यर्थागमनेगुर्वगनागमनमितियुक्तम्
उच्यते निषेकादीनीतिमनुवचनंनिषेकादिकर्त्तुर्जनकस्यगुरुत्वप्रतिपादनपरम् अनन्यपरत्वात् यत्पुनर्व्यासगौतमवचनम् तत्परिचर्यापूजादिविधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेषतयास्कृत्यर्थत्वेनान्यपरम् अतोगुरुत्वप्रतिपादनपरान्निषेकादिमनुवचनात्पितुरेवमुख्यं गुरुत्वमितिस्थितम् अतएववसिष्ठेनाचार्यपुत्रशिष्यभार्या
सुरूपैवमित्याचार्यदारेष्वतिदेशिकंगुरुतल्पप्रायश्चित्तमुक्तम् तथाजातूकर्ण्यादिभिरप्युक्तम् आचार्यादेस्तल्पभार्यागुरुतल्पव्रतंचरेदित्यादि आचार्यादिमु
ख्यगुरुत्वेगुरूपदेशतएवव्रतप्राप्तेरतिदेशोनर्थकएवस्यात् किंचसंवर्त्तनस्पष्टमेवपित्तृदारग्रहणंकृतम् पितृदारान्समारुह्यमातृवर्ज्यंनराधमइति षट्त्रिंशन्म
तेपि पितृभार्यांतुविज्ञायसवर्णांयोधिगच्छतीति अतोपिनिषेकादिकर्तापितैवमुख्योगुरुः तच्चगुरुत्वंवर्णचतुष्टयेप्यविशिष्टंनिषेकादिकर्तृत्वावि
शेषात् अतःसविप्रोगुरुरुच्यतेइतिविप्रग्रहणमुपलक्षणम् अतःपितृपत्नीगमनमेवमहापातकम् गमनंचचरमधातुविसर्गपर्यंतंकथ्यते
अतस्ततोवाङ्निवृत्तौनमहापातकित्वम् तत्रचेदंतप्तेयःशयनेसार्धमायस्त्र्यात्युक्तंमरणांतिकंप्रायश्चित्तद्वयम् तच्चजननन्यामकामकृत
त्सपत्न्यांतुसवर्णायामुत्तमवर्णायांचकृतेद्रष्टव्यम् पितुर्भार्यांतुविज्ञायसवर्णांयोधिगच्छति जननीचाप्यविज्ञायनामृतःशद्धिमाप्नुया
दितिषट्त्रिंशन्मतेभिधानात् जननन्यातुकामकृतेवासिष्ठम् निःकालकोघृताभ्यक्तोगोमयाग्निनापादप्रभृत्यात्मानमवदाहयेदितिद्रष्ट-
व्यम् अकामतोभ्यासेप्येतदेव ननुचमातुःसपत्नीभगिनीमाचार्यतनयांतथा आचार्यपत्नींस्वसुतांगच्छंस्तुगुरुतल्पगइति अतिदेशा
भिधानान्मातृपत्नीगमनेत्वौपदेशिकंप्रायश्चित्तमयुक्तम् उच्यते पितृभार्यासवर्णामित्यस्मादेवसवर्णग्रहणाद्धीनवर्णसपत्नीविषयमिदम
तिदेशिकमितिनविरोधः इदंचमुख्यस्यैवपुत्रस्य इतरेषापुनःपुत्रकार्यकरत्वमेवनपुत्रत्वम् यथाहमनुः क्षेत्रजादीन्सुतानेतानेकादश
यथोदितान् पुत्रप्रतिनिधीनाहुःक्रियालोपान्मनीषिणइति तत्रोभयेच्छातःप्रवृत्तौतप्तेयःशयनइतिप्रथमंप्रायश्चित्तम् स्वेनप्रोत्साहनेतु
गृहीत्वोल्कृत्यवृषणावितिद्वितीयम् अननुबंधातिशयेनप्रायश्चित्तगुरुत्वस्योक्तत्वात् तयाप्रोत्साहितस्यतुमानवम् तप्तलोहशयनज्वल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्सूर्म्यालिंगनयोरंतरंद्रष्टव्यम् यत्तुशंखेनद्वादशवार्षिकमुक्तम् अधःशायीजटाधारीपर्णमूलफलाशनः एककालंसमन्त्रीतवर्षेतुद्वादशेगते रु
क्मस्तेयीसुरापश्चब्रह्महागुरुतल्पगः व्रतेनैतेनशुध्यंतिमहापातकिनस्त्विमेइतितत्समवर्णोत्तमवर्णपितृदारगमनेअकामकृतेद्रष्टव्यम् तत्रैव
कामतःप्रवृत्तस्यरेतःसेकात्प्राङ्निवृत्तोषड्वार्षिकमकामकृच्त्रिवार्षिकम् जनन्यांतुकामतःप्रवृत्तस्यरेतःसेकात्प्राङ्निवृत्तोद्वादशवार्षिकमकाम
कृषड्वार्षिकमितिकल्प्यम् यस्तुसंवर्त्तेन पितृदासान्समारुह्यमातृवर्जंनराधमइत्यादिनासमारोहणमात्रेतप्तकृच्छ्रउक्तः सहीनवर्णगुरुदारेषु
रेतःसेकादर्वाग्द्रष्टव्यः २५९ प्रायश्चित्तांतरमाह अथवाप्राजापत्यंकृच्छ्रंवक्ष्यमाणलक्षणंसमाः वर्षत्रयंचरेत् एतच्चब्राह्मणीपुत्रस्य शूद्र

प्राजापत्यंचरेत्कृच्छ्रंसमावागुरुतल्पगः चांद्रायणंवात्रीन्मासानभ्यसेद्वेदसंहिताम्२६०

जातीयगुरुभार्यागमनेमतिपूर्वेद्रष्टव्यम् यदातुगुरुपत्नींसवर्णांव्यभिचारिणीमबुद्धिपूर्वंगच्छतितदावेदजपसहितंचांद्रायणत्रयंकुर्यात् तत्रैव
वकामतःप्रवृत्तावौशनसम् गुरुतल्पाभिगामीसंवत्सरंब्रह्महत्याव्रतंषण्मासान्वातप्तकृच्छ्रंचरेदिति क्षत्रियागमनेतुमतिपूर्वेयाज्ञवल्क्यीयम् मा
तुःसपत्नींभगिनीमाचार्यतनयांतथेति गुरुतल्पव्रतातिदेशान्नववार्षिकम् इदंचातिदेशिकंसवर्णागुरुभार्यागमनविषयंनभवति तत्रकामतो
मरणांतिकस्याकामतोद्वादशवार्षिकस्यविहितत्वात् अतःक्षत्रियादिविषयमेवेतियुक्तम् तत्रैवकामतोभ्यासेमरणांतिकम् मत्यागत्यागु
रोर्भार्यांगुरोःक्षत्रसुताद्विजः अंडाभ्यांरहितंलिंगमुत्कृत्यसमृतःशुचिरितिकण्वस्मरणात् अत्रैवविषयेप्रायश्चित्तंयदानचिकीर्षतितदा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छित्वालिंगंवधस्तस्यसकामायाःस्त्रियास्तथेतियाज्ञवल्क्योवधदंडः प्रायश्चित्तस्थानेद्रष्टव्यः वैश्यायांतुगुरुभार्यायांकामतोगमनेषड्वार्षिकम् अतएवस्मृत्यंतरं ब्राह्मणीपुत्रस्यक्षत्रियायांमातरिगमनेपादहान्याद्वादशवार्षिकमेवमन्यवर्णास्विति अयमर्थः ब्राह्मणीपुत्रस्यक्षत्रियायांमातुःसपत्न्यांगमनेपादन्यूनंद्वादशवार्षिकंनववार्षिकमितियावत् तस्यैवतथाभूतायांवैश्यायांषड्वार्षिकंशूद्रायांतुत्रिवार्षिकंप्रायश्चित्तमिति एवंक्षत्रियापुत्रस्यवैश्यायांमातरिनववार्षिकम् शूद्रायांतुषड्वार्षिकम् एवमेववैश्यापुत्रस्यापीति वैश्यायांतुकामतोभ्यासेमरणांतिकमेव गुरोर्भार्यांतुयोवैश्यांमत्यागच्छेत्पुनःपुनः लिंगायंछेदयित्वातुततः शुध्येत्सकिल्बिषादिलोगाक्षिस्मरणात् शूद्रायांतुकामतोभ्यासेद्वादशवार्षिकं पुनःशूद्र्यांगुरोर्गत्वाबुध्यविप्रः समाहितः ब्रह्मचर्यमदुष्टात्मासचरेद्वादशाब्दिकमित्युपमन्युस्मरणात् क्षत्रियायांगुरुभार्यायामबुद्धिपूर्वं गमनेयमोक्तंत्रिवार्षिकमष्टमकालाशनंद्रष्टव्यम् कालेष्टमेवाभुंजानोब्रह्मचारीसदाव्रती स्थानासनाभ्यांविचरंस्थिरन्होभ्युपयन्नपः अधःशायीत्रिभिर्वर्षैस्तदपोहेतपातकमिति अत्रैवाभ्यासेजातूकर्ण्योक्तं गुरोःक्षत्रस्त्रियांभार्यांपुनर्गत्वात्वकामतः अंडमात्रंसमुत्कृत्यशुध्येज्जीवन्मृतोपिवेति वैश्यायांत्वकामतोगमनेप्राजापत्यंचरेत्कृच्छ्रमित्येतदेवयाज्ञवल्क्योयम् तथाचवृद्धमनुः गमनेगुरुभार्यायाःपितृभार्यागमेतथा अब्दत्रयमकामात्तुकृच्छ्रंनित्यंसमाचरेदिति तत्रैवाभ्यासेहारीतोक्तम् मरणांतिकंब्रह्मचर्यं अभ्यस्यविप्रोवैश्यायांगुरोरज्ञानमोहितः षडंगंब्रह्मचर्यंचसंचरेद्यावदायुषमिति गुरुभार्यायांशूद्रायांत्वमतिपूर्वंमानवम् खट्वांगीचीरवासावाश्मश्रुलोविजनेवने प्राजापत्यंचरेत्कृच्छ्रमब्दमेकंसमाहितमिति अथवागुरुदाराभिगामीसंवत्सरंकटकिनीशारवांपरिष्वज्याधःशायीत्रिषवणीभैक्ष्याहारःपूतोभवतीतिरुमंतूक्तंकुर्यात् तत्रैवाभ्यासेमानवम् चांद्रायणंवात्रिमासानभ्यस्यनियतेंद्रियइति क्षत्रियायांकामतःप्रवृत्तस्यरेतः सेकादर्वाङ्निवृत्तौव्याघ्रोक्तं कृच्छ्रंचैवानिकृच्छ्रंचतथाकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छ्रातिरुच्छ्रकम् चरेन्मासत्रयंविप्रः क्षत्रियागमनेगुरोरिति अत्रेयंव्यवस्था तयाप्रोत्साहितस्यत्रैमासिकंप्राजापत्याचरणम् उभयेच्छातः प्रवृत्तस्यातिरुच्छ्राचरणंतावदेव स्वेनप्रोत्साहितायांपुनः रुच्छ्रातिरुच्छ्रानुष्ठानंचतावदेवेति तत्रैवकामतः प्रवृत्तस्यरेतः सेकात्पूर्वंकण्वोक्तंद्रष्टव्यम् चांद्रायणंतप्तरुच्छ्रमतिरुच्छ्रतथैवच सकृद्वत्वागुरोर्भार्यामज्ञानात्क्षत्रियांद्विजइति तयाप्रोत्साहितस्यातिरुच्छ्रः उभयेच्छातःप्रवृत्तस्यतप्तरुच्छ्रः स्वेनप्रोत्साहितायांतुचांद्रायणम् वश्यायाकामतः प्रवृत्तस्यरेतः सेकात्पूर्वंनिवृत्तौकण्वोक्तं तप्तरुच्छ्रंपराकंचतथासांतपनंगुरोः भार्यांवैश्यांसकृद्वत्वाबुध्यामासचरेत्तद्विजइति अत्रोभयोरिच्छातः प्रवृत्तौतप्तरुच्छ्रः स्वेनप्रोत्साहितायांपराकः तयाप्रोत्साहितस्यसांतपनम अत्रैवाकामतः प्रवृत्तस्यप्रजापतिराह पंचरात्रंतुनाश्नीयात्सप्तमाष्टौवातथैवच वैश्यांभार्यांगुरोर्गत्वासकृदज्ञानतोद्विजइति तयाप्रोत्साहितस्यतुपंचरात्रम् उभयेच्छातः प्रवृत्तौसप्तरात्रम् स्वेनप्रोत्साहितायामष्टरात्रम् शूद्रायांतुकामतः प्रवृत्तस्यरेतः सेकात्पूर्वंनिवृत्तौजाबालिराह अतिरुच्छ्रंतप्तरुच्छ्रपराकंचतथैवच गुरोः शूद्रासकृद्वत्वाबुध्याविप्रः समाचरेदिति तयाप्रोत्साहितस्यातिरुच्छ्रः उभयेच्छातः प्रवृत्तौतप्तरुच्छ्रः स्वेनप्रोत्साहितायांपराकः तत्रैवाकामतः प्रवृत्तस्यदैर्घ्यतमसम् प्राजापत्यंसांतपनंसप्तरात्रोपवासकम् गुरोःशूद्यांसकृद्वत्वाचरेद्विप्रः समाहितइति तयाप्रोत्साहितस्यप्राजापत्यं उभयेच्छातःप्रवृत्तौसांतपनम् स्वेनप्रोत्साहितायांसप्तरात्रोपवासइति अनयैवदिशान्येषामपिस्मृतिवचसांविषयव्यवस्थोहनीया पुरुषवच्चस्त्रीणामप्यत्रमहापातकित्वमविशिष्टम् तथाहिकात्यायनः एषदोषश्चबुद्धिश्चपतितानामुदाहृता स्त्रीणामपिप्रसक्तानामेषएवविधिःस्मृतइति अतस्तस्याअपिकामतः प्रवृत्तौमरणांतिकमविशिष्टम् अतएवपुरुषस्यमरणांतिकमुक्तास्त्रियाअपियोगीश्वरेणमरणांतिकंदर्शितम् छित्त्वालिंगंवधस्तस्यसकामायाः स्त्रियास्तथेति अकामतस्तुमनुनोक्तम् एतदेवव्रतंकार्यंयोषित्सूपपतास्वपीति द्वादशवार्षिकमेवार्द्धकल्पनयाकार्यम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यानिपुनर्गुरुतल्पसमानि सखिभार्याकुमारीषुस्वयोनिषंत्यंजासुच सगोत्रत्वासुसकृत्स्त्रीषुगुरुतल्पसमंस्मृतमिति प्रतिपादितानियानियानिचातिदेशविषयभूतानि पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि मातुःसपत्नींभगिनीमाचार्यतनयांतथा आचार्यपत्नींस्वसृतांगच्छंस्तुगुरुतल्पगइतिप्रतिपादितानि तथैकरात्रादूर्ध्वकामतोभ्यस्तेषुयथाक्रमेणषड्वार्षिकम् नववार्षिकंचप्रायश्चित्तंविज्ञेयम् अस्मिन्नेवविषयेकामतोत्यंताभ्यासेमरणांतिक तथाचबृहद्यमः रेतःसिक्काकुमारीषुस्वयोनिषंत्यजासुच सपिंडापत्यदारेषुप्राणत्यागोविधीयतेइति अंत्यजाश्चात्र चांडालः श्वपचः क्षत्तासूतोवैदेहिकस्तथा मागधायोगवश्चैवसप्तैतेत्यावसायिनइतिमध्यमांगिरोदर्शिनाज्ञातव्याः नतुरजकश्चर्मकश्चेत्यादिप्रतिपादिताः तेषुलघुप्रायश्चित्तस्योक्तत्वात् तथाचांहालांत्यस्त्रियंगत्वाभुक्त्वाचप्रतिगृह्यच पतत्यज्ञानतोविप्रोज्ञानात्साम्यंतुगच्छतीति चांडालादिसाम्यंप्रतिपादयतामनुनापिकामतोत्यंताभ्यासेमरणांतिकंदर्शितम् तथाह्यज्ञानतश्चांडालीगमानाभ्यासेपतत्यतः पतितप्रायश्चित्तंद्वादशवार्षिकंकुर्यात् कामतोत्यंताभ्यासेचांडालैःसाम्यंगच्छत्यतोद्वादशवार्षिकाधिकंमरणांतिकंकुर्यात् एतच्चबहुकालाभ्यासविषयम् एकरात्राभ्यासेतुवर्षत्रयं यथाहमनुः यत्करोत्येकरात्रेणवृषलीसेवनाद्द्विजः तद्वैक्ष्यमुग्जपन्नित्यंत्रिभिर्वर्षैर्व्यपोहतीति अत्रवृषलीशब्देनचांडाल्यभिधीयते चंडालीबंधकीवैश्यारजस्यायाचकन्यका ऊढायाचसगोत्रास्याद्वृषल्यःपंचकीर्त्तिताइतिस्मृत्यंतरे वृषलीशब्दप्रयोगदर्शनात् बंधकीस्वैरिणी कथंपुनरत्राभ्यासावगमः उच्यते यत्करोत्येकरात्रेणेत्यत्यंतसंयोगापवर्गवाचिन्यास्तृतियादर्शनात् एकरात्रेणचात्यंतसंयोगोगमनस्याभ्यासंविनानुपपन्नइतिगमनाभ्यासोवगम्यते अतएवैकरात्राद्बहुकालाभ्यासविषयप्रागुक्तंद्वादशवर्षादिगुरुतल्पव्रतातिदेशिकंमरणांतिकंच यदापुनर्ज्ञानतोज्ञानतोवाचांडालाद्याःसकृद्गच्छंतितदाचांडालपुल्कसानांतुभुक्त्वागत्वाचयोषितं रुच्छ्राद्धमाचरेत् ज्ञानादज्ञानादेवद्वयमितियमाद्युक्तंसंवत्सररुच्छ्रानुष्ठानम् अमत्याचांद्रायणद्वयंयथाक्रमेणद्रष्टव्यम् स्वयोनिषंत्यजासुचेत्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कवाक्यसमभिव्याहाराद्भगिन्यादिष्वपीयमेवव्यवस्थावेदितव्या मरणांतिकंचान्यामिप्रवेशनम् जनन्यांचभगिन्यांचस्वसृतायांतथैवच स्नुषायांगमनंचैवविज्ञेयमतिपातकम् अतिपातकिनस्त्वेतेप्रविशेयुर्हुताशनमितिकात्यायनस्मरणात् जननीसकृद्गमनेभगिन्यादिषुचासकृद्गमनेअग्निप्रवेशइतिद्रष्टव्यं महापातकस्यजननीगमनस्यतदतिदेशविषयभूतातिपातकस्यभगिन्यादिगमनस्यतुल्यत्वायोगात् यत्तुबृहद्यमेनोक्तं चांडालींपुल्कसींम्लेच्छीस्नुषांचभगिनींसखीम् मातापित्रोःस्वसारंचनिक्षिप्तांशरणागताम् मातुलानींप्रव्रजितांस्वगोत्रांनृपयोषितम् शिष्यभार्यांगुरोर्भार्यांगत्वाचांद्रायणंचरेदिति यत्त्वंगिरोवचनम् पतितांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच मासोपवासंकुर्वीतचांद्रायणमथापिवेति तदुभयमपिगुरुतल्पातिदेशविषयेषुकामतः प्रवृत्तस्यरेतःसेकादर्वाङ्निवृत्तौद्रष्टव्यम् यदपिसंवर्त्तवचनम् भगिनींमातुराप्तांचस्वसारंचान्यमातृजाम् एतागत्वास्त्रियोमोहान्नभ्रक्

एभिस्तुसंवसेद्योवैवत्सरंसोपितत्समः

च्छ्रेसमाचरेदिति तदनंतरोक्तएवविषयेअकामतः प्रवृत्तस्यरेतःसेकादर्वाङ्निवृत्तौद्रष्टव्यम् यदापुनरेताएवअत्यंतव्यभिचारिणीर्गच्छतितदापीदमेवप्रायश्चित्तमुपलंचांद्रायणंतप्तकृच्छ्रात्मकंक्रमेणकामतोकामतश्चप्रवृत्तौद्रष्टव्यम् साधारणस्त्रीषुगुरुणोपभुक्तास्वपिगमनेगुरुतल्पदोषोनास्ति जात्युत्कंपारदार्यंचक्रन्यादूषणमेवच साधारणस्त्रियोनास्तिगुरुतल्पत्वमेवचेत्याद्यस्मरणात् एवमन्यान्यपिस्मृतिवचनान्युच्चावचप्रायश्चित्तप्रतिपत्तिपराण्यन्विष्यविषयव्यवस्थोहनीयाग्रंथगौरवभयान्नलिख्यंते इतिगुरुतल्पप्रायश्चित्तप्रकरणम् २६० एवंब्रह्महादिमहापातकिप्रायश्चित्तमभिधायावसरप्राप्तंतत्संसर्गिप्रायश्चित्तमाह एभिःपूर्वोक्तैर्ब्रह्महादिभिरेकंसंवत्सरंयोत्यंतंसंवसतिसहाचरतिसोपितत्समः योयेनसहाचरतिसतदीयमेवप्रायश्चित्तंकुर्यादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदीयप्रायश्चित्तातिदेशार्थंतत्समग्रहणम् नपुनःपातकत्वातिदेशार्थं तस्ययश्चैतैः सहसंवसेदित्युपदेशएवसिद्धत्वात् अत्रचसत्स्वप्यतिदेशत्वेकृत्स्नमेवद्वादशवार्षिकंकार्यम् साक्षान्महापातकित्वात्संसर्गिणः अपिशब्दान्नकेवलंमहापातकिसंयोगीतत्समः किंत्वनुपातकिपातक्युपपातक्यादीनांमध्येयोयेनसहसंसर्गंकरोतिसोपितत्समइतितदीयमेवप्रायश्चित्तंकुर्यादितिदर्शयति अतएवमनुनासकलंप्रायश्चित्तजातमभिधायाभिहितम् योयेनपतितेनैषांससर्गंयातिमानवः सतस्यैवव्रतंकुर्यात्तत्संसर्गविशुद्धयेइति विष्णुनापिसामान्येनोपपातक्याद्येनस्त्रिमात्रसंसर्गेतत्प्रायश्चित्तभाक्त्वदर्शितम् पापात्मनायेनसहयःसंसृज्येतसतस्यैवव्रतंकुर्यादिति अतएवमनुनासामान्येनैनस्त्रिमात्रप्रतिषेधः कृतः एनस्त्रिभिरनिर्णिक्तैर्नार्थंकंचित्समाचरेदिति तथा नससंसर्गंभजेत्सद्भिः प्रायश्चित्तेकृतेसतीति एतच्चद्वादशवार्षिकादिपतितप्रायश्चित्तबुद्धिपूर्वसंसर्गविषयम् पतितेनसहोषित्वाजानन्संवत्सरंनरः मिश्रितस्तेनसोद्धांतेस्वयंचपतितोभवेदितिदेवलस्मरणात् अज्ञानतःसंसर्गेपुनर्वसिष्ठोक्तम् पतितसंप्रयोगेतुब्राह्मणेनवेदाध्यापनेनयौनेननवास्त्रीवेणवायास्तेभ्यः सकाशान्मात्राउपलब्धास्तासांपरित्यागेस्तैश्चनसंवसेदुदीचींदिशंगत्वानश्नन्संहिताध्ययनमधीयानः पूतोभवतीतिविज्ञायतेइति तथा ब्रह्महामद्यपःस्तेनस्तथैवगुरुतल्पगः एतेमहापातकिनोयश्चैतैःसहसंवसेदितिसर्वमनवद्यम् परामृष्टप्रकृतब्रह्महादिचतुष्टयसंसर्गिणएवमहापातकित्ववचनात्तत्संसर्गिणोनमहापातकित्वम् ननुमहापातकिसंसर्गएवमहापातकित्वहेतुनाब्रह्महादिसर्वज्ञानपरामृष्टप्रकृतब्रह्महादिविशेषसंसर्गः तस्यव्यभिचारात् अतोपिब्रह्महादिसंसर्गिणोपिमहापातकिसंसर्गोविद्यतइतिनस्यापिमहापातकित्वंस्यान्नचप्रतिषेधउच्यते स्यादेवंयदिप्रमाणांतरगम्यंयदिमहापातकित्वंस्यात् शब्दैकसमधिगम्येतुतस्मिन्नेवंभवितुमर्हतितेरितिप्रकृतविशेषपरामर्शिनासर्वनाम्नाब्रह्महादिविशेषसंसर्गस्यैवमहापातकित्वहेतुत्वस्यावगमितत्वात् एवंचप्रतिषेधाभावोव्यहेतुःप्राप्त्यभावादेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतसंसर्गिसंसर्गिणांद्विजातिकर्मभ्योहानिर्नभवतिप्रायश्चित्तंतुभवत्येव नचसंसर्गिसंसर्गिणः पातित्याभावेकथंप्रायश्चित्तमितिवाच्यम् एतत्स्त्रिभिर्निर्णिक्तैर्नार्थकिंचित्समाचरेदितिसामान्येनैनस्त्रिमात्रप्रतिषेधेनमहापातकिसंसर्गस्यापिप्रतिषिद्धत्वात्पातित्याभावेपियुक्तमेवप्रायश्चित्तं तच्चपादहीनम् योयेनसंवसेद्दूषंसोपितत्समतामियात् पादहीनंचरेत्सोपितस्यतस्यव्रतंद्विजइतिव्यासोक्तंद्रष्टव्यम् एवंचतुर्थपंचमयोरपि कामतःसंसर्गिणोरर्द्धहीनंत्रिपादोनंचद्रष्टव्यम् अतःसाक्षाद्ब्रह्महादिसंसर्गिणएवतदीयप्रायश्चित्ताधिकारीनतत्संसर्गिणइतिसिद्धम् अत्रचब्रह्महादिषुयद्यपिकामतोमरणांतिकमुपादिष्टम् तथापिसंसर्गिणस्तन्नातिदिश्यते सतस्यैवव्रतंकुर्यादितिव्रतस्यैवातिदेशात् मरणस्यचव्रतशब्दवाच्यत्वाभावात् अतोत्रकामकृतेपिसंसर्गेद्वादशवार्षिकमकामतस्तुतदर्द्धम् संसर्गश्चस्वनिबंधनकर्मभेदादनेकधाभिद्यतेतथाहवृद्धबृहस्पतिः एकशय्यासनंपंक्तिर्भांडपंक्त्यन्नमिश्रणम् याजनाध्यापनेयोनिस्तथाचसहभोजनम् नवधासंकरः प्रोक्तोनकर्त्तव्योधर्मैःसहेति देवलोपि संलापस्पर्शनिश्वाससहयानासनाशनात् याजनाध्यापनाद्योनात्सापंसंक्रमतेनृणामिति एकशय्यासनमेकरथ्यासनमेकपंक्तिभोजनमेकभांडपचनमन्नमिश्रणंसंसर्गस्तदीयान्नभोजनमितियावत् याजनंपतितस्यस्वस्यवातेन अध्यापनंवातस्यस्वस्यवातेन योनंतस्मैकन्यादानंतत्सकाशाद्वाकन्यायाःप्रतिग्रहः सहभोजनमेकामत्रभोजनम् संलापःसंभाषणम् स्पर्शोगात्रसंमर्दः निश्वासःपतितमुखवायुसंपर्कः सहयानमेकतुरंगाद्यारोहणम् एतेषांमध्येकेनकर्मणाकियताकालेनपातित्यमित्यपेक्षायांबृहद्विष्णुनोक्तम् संवत्सरेणपतितेनसहाचरन्नेकयानभोजनासनशयनैर्योनस्त्रीवमुख्यैस्तत्संबंधैःसद्यएवेति अत्रैकभोजनमेकपंक्तिभोजनम् एकामत्रभोजनेतुसद्यःपातित्यम् याजनंयोनिसंबंधःस्वाध्यायःसहभोजनम् कृत्वासद्यःपतत्येवपतितेननसंशयइतिदेवलस्मरणात् स्त्रीवशब्देनयाजनमभिधीयते मुखशब्देनमुखभवत्वेनाध्यापनम् यौन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीवसुरव्यैरितिसत्यपिद्वंद्वनिर्देशेप्रत्येकमेवतेषांपतनहेतुत्वम् यःपतितैः सहयौनमुखस्त्रीवानांसंबंधनामन्यतमसंबंधंकुर्यात्तस्याप्येतदेव प्रायश्चित्तमितिस्कंदस्मरणात् एकयानादिचतुष्टयस्यतुसमुदितस्यैवपतनहेतुत्वम् एकयानभोजनासनशय्यानैरितिइतरेतरयुक्तानांनिर्देशात् प्रत्येकानुष्ठानस्यपतनहेतुत्वाभावेपिदोषहेतुत्वमस्त्येव आसनाच्छयनाद्यानात्संभाषात्सहभोजनात् संक्रमंतिहिपापानितैलबिंदुरिवांभसीतिपराशरवचनेननिरपेक्षणामपिपापहेतुत्वावगमात् संलापस्पर्शनिःश्वासानांतुयानादिचतुष्टयेनात्तुषंगिकतयासमुच्चितानामेवपतनहेतुत्वंनपृथग्भूतानामल्पत्वात् पापहेतुत्वंपुनरस्त्येव संलापस्पर्शनिश्वासेतिदेवलवचनस्यदर्शितत्वात् अतःसंलापादिरहितेसहयानादिचतुष्टयेकृतेपंचमभागोनंद्वादशवार्षिकंप्रायश्चित्तंकुर्यात् तत्सहितेतुपूर्णमेवंचसतिएभिस्त्रिभिःसंवसेद्योवैवत्सरंसोपितत्समइतियोगीश्वरवचनमपिसहयानादिचतुष्टयपरमेवयुक्तम् अतःसंलापादीनांपृथक्पातित्यहेतुत्वंनास्त्यतएवमनुनासंवत्सरेणपतंतिपतितेनसहाचरन् याजनाध्यापनाद्योनान्नतुयानासनाशनादिति यानादिचतुष्टयस्यैवसंवत्सरेणपातित्यहेतुत्वमुक्तम् अत्रासनग्रहणंशयनस्याप्युपलक्षणम् अत्रचसंवत्सरेणपतंतिपतितेनसहाचरन् यानासनाशनादितिव्यवहितेनसंबंधः प्राग्दर्शितविष्णुवचनानुरोधात् तथा संवत्सरेणपतंतिपतितेनसहाचरन् भोजनासनशय्यादिकुर्वाणः सार्वकालिकमितिवचनाच्च नचान्वयदोषः यानासनाशनादिहेतोराचरन्नाचारंकुर्वन्निितिभेदविवक्षयासंबंधोपपत्तेः यथाएतयापुनराधेयसमितयेष्टेति यद्वाआचरन्निितिशतुर्हेत्वर्थस्यगमितत्वाद्यानासनानीतिद्वितीयार्थेपंचमी याजनाध्यापनाद्योनान्नतुसंवत्सरेणपततिकिंतुसद्यएव प्राचीनवचननिन्दयानुरोधादेव अतोयौनादिचतुष्टयेसद्यः पतनियानादिचतुष्टयेनसंवत्सरंनिरंतराभ्यस्तेनेतियुक्तम् संवत्सरंसोपितत्समइतिअत्यंतसंयोगवाचिन्याद्वितीयायादर्शनादंतरितदिवसगणनाकार्या यथाषष्ट्यधि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कशतत्रयदिवसव्यापितत्वंसंसर्गस्यभवति ततोन्यूनेतुनपतितप्रायश्चित्तंकिंत्वन्यदेव यथाहपराशरःसंसर्गमाचरन्विप्रःपतितादिष्वकामतः पंचाहंवादशाहंवाद्वादशाहमथापिवा मासार्धमासमेकंवामासत्रयमथापिवा अब्दार्धमेकमब्देवाभवेदूर्ध्वंतुतत्समः त्रिरात्रंप्रथमेपक्षेद्वितियेकृच्छ्रमाचरन् चरेत्सांतपनंकृच्छ्रं तृतीयेपक्षएवतु चतुर्थेदशरात्रंस्यात्पराकःपंचमेततः षष्ठेचांद्रायणंकुर्यात्सप्तमेत्वेदवद्भवेयम् अष्टमेचनथाप्येषण्मासान्कृच्छ्रमाचरेदिति कामतःसंसर्गेपुनर्विशेष स्तमंतुः पंचाहेतुचरेत्कृच्छ्रं दशाहेतप्तकृच्छ्रकम् पराकस्त्वर्धमासेस्यान्मासेचांद्रायणंचरेदिति मासत्रयेप्रकुर्वीतकृच्छ्रंचांद्रायणांतरम् षाण्मासिकंतुसंसर्गेकृच्छ्रंत्वब्दार्धमाचरेत् संसर्गेत्वब्दिकेकुर्यादब्दंचांद्रायणंनरइति अत्रचाब्दिकेसंसर्गइतिकिंचिन्न्यूनइतिद्रष्टव्यम् पूर्णेतुवत्सरेमन्वादिभिर्द्वादशवार्षिकस्मरणात् यत्तुबार्हस्पत्यवचनम् षण्मासिकेतुसंसर्गेयाजनाध्यापनादिना एकभ्रासनशय्याभिः प्रायश्चित्तार्धमाचरेदितियाजनाध्यापनाद्योनेकपात्रभोजनानांषण्मासात्पातित्यवचनमेतदकामतोत्पतापदिपंचमहायज्ञादिप्रायेयाजनेगाध्यापनेदुहितृभगिनीव्यतिरिक्तेचयोनिसंबंधेद्रष्टव्यम् प्रकृष्टयाजनादिभिःसद्यःपातित्यस्योक्तत्वात् एतद्विगवलंबनेनेवदुहितृभगिनीस्नुषागाम्यतिपातकिसंसर्गिणांकामतोनववार्षिकम् अकामतःसार्धचतुर्वार्षिकंकल्पनीयम् सखिपितृव्यदारादिगामिपातकिसंसर्गिणांकामतः षड्वार्षिकमकामतस्त्रैवार्षिकम् अथोपपातक्यादिसंसर्गिणामपिकामतस्तदीयमेवत्रैमासिकमकामतोद्धर्मित्यूहनीयम् पुरुषवत्स्त्रीणामपिमहापातक्यादिसंसर्गात्पातित्यमविशिष्टम् यथाहशौनकः पुरुषस्ययानिपतननिमित्तानिस्त्रीणामपितान्येव ब्राह्मणीहीनवर्णसेवायामधिकंपततीति अतस्तासामपिमहापातकिप्रभृतीनांमध्येयेनसहसंसर्गस्तदीयमेवप्रायश्चित्तमर्धकृत्यायोजनीयम् एवंबालवृद्धातुराणामपिकामतोधर्मकामतःपादः तथानुपनीतस्यापिबालस्यकामतः पादोकामतस्तदर्धमित्येषादिक् पतितसंसर्गप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिषेधेनप्रतिषिद्धस्य यौनसंबधस्यकचित्प्रतिप्रसवमाह एषांपतितानांकन्यांपतितावृस्थायासुसन्नांसोपवासांकृततत्संसर्गकालोचितप्रायश्चित्तामकिंचनामगृहीतवस्त्रालंकारादिपिवृधनामुद्वहेत् कन्यांसमुद्वहेदितिवदन्स्वयमेवकन्यात्यक्तपतितसंसर्गांसमुद्वहेन्नपुनः पतितहस्तात्प्रतिगृण्हीयादितिदर्शयति एवंचसतिपतितयौनसंसर्गप्रतिषेधविरोधोपिपरिहृतोभवतिभवति अयंचार्थोवृद्धहारीतेनस्पष्टीकृतः पतितस्यतुकुमारींपिवस्त्रामहोरात्रमुपोषितांप्रातः शुक्लनाहतेनवाससाच्छादितांनाहमेतेषांनमममैनइतित्रिरुच्चैरभिदधानांतीर्थेस्वगृह्येवोद्वहेदिति तथाएषांकन्यांसमुद्वहेदितिवचनात्स्त्रीव्यतिरिक्ततदीयापत्यस्यसंसर्गानर्हतांदर्शयति अतएववसिष्ठः पतितेनोत्पन्नः पतितोभवति अन्यत्रस्त्रियाःसाहिपरगामिनी-

कन्यांसमुद्वहेदेपांसोपवासामकिंचनाम् २६१ चांद्रायणंचरेत्सर्वानवरुष्टान्निहन्यतु

मातूरिक्थमुपेयादिति इतिसंसर्गप्रायश्चित्तप्रकरणम् २६१ निषिद्धसंसर्गप्रसंगान्निषिद्धसंसर्गोत्पन्नप्रतिलोमवधेप्रायश्चित्तमाह अवरुष्टःसूतमागधादयः प्रतिलोमोत्पन्नास्तेषांप्रत्येकंहनने चांद्रायणम् तथाचशंखः सर्वेषामवरुष्टानांवधेप्रत्येकंचांद्रायणमिति यच्चांगिरसोवचनम् सर्वात्यजानांगमनेभोजनेसंप्रमापणे पराकेणविशुद्धिःस्यादित्यंगिरसभाषितमितिपराकंकुर्यात् तत्रकामतः सूतादिवधेचांद्रायणम् अकामतस्तुसूतवधेपराकः वैदेहकवधेपादोनः चाडालवधेद्विपादः मागधवधेपादोनःपराकः क्षत्तरिद्विपादः आयोगवेचपादद्वयम् अनयैवदिशाचांद्रायणस्यापितारतम्यंकल्प्यम् यत्तुब्रह्मगर्भवचनम् प्रतिलोमप्रसूतानांस्त्रीणांमासावधिःस्मृतः अंतरप्रभवानांचसूतादीनांचतुर्द्विषडिति तदावृत्तिविषयम् तत्रसूतव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेषण्मासाः वैदेहकवधेचत्वारः चांडालवधेद्वावितियोग्यतयान्वयः तथामागधवधेचत्वारः क्षत्तरिद्वैमासिकं आयोगवेत्रैमासिकमितिव्यवस्था नैमित्तिकव्रतानांजपादिसाध्यत्वाद्विद्याविरहिणांचशूद्रादीनांतदनुपपत्तेराज्यवेक्षणादिसाध्येष्विवाधानामनधिकारमाशंक्याह यद्यपिशूद्रोजपाद्यधिकारहीनः तथाप्यननदशवार्षिकादिकालसंपाद्येनव्रतेनशुद्ध्यति शूद्रग्रहणस्त्रीणांप्रतिलोमजानांचोपलक्षणं यद्यपितस्यगायत्र्यादिजपासंभवः तथापिनमस्कारमंत्रजपोभवति अतएवस्मृत्यंतरेभिहितम् उच्छिष्टंचास्यभोजनमनुज्ञातोस्यनमस्कारोमंत्रइति यद्वावचनबलाज्जपादिरहितमेवव्रतंकुर्यात् तस्माच्छूद्रंसमासाद्यसदाधर्मपथेस्थितम् प्रायश्चित्तंप्रदातव्यंजपहोमविवर्जितमित्यंगिरसःस्मरणात् तथापरमपितेनैवोक्तम्

शूद्रोधिकारहीनोपिकालेनानेनशुद्ध्यति२६२

शूद्रः कालेनशुद्ध्येतगोब्राह्मणहितेरतः दानेर्वाप्युपवासैर्वाद्विजशुश्रूषयातथेति यत्तुमानवम् नचास्योपदिशेद्धर्मंनचास्यव्रतमादिशेदिति शूद्रस्यव्रतोपदेशनिषेधपरंवचनं तदुपसन्नशूद्राभिप्रायम् यदपिस्मृत्यंतरवचनं कृच्छ्राण्येतानिकार्याणिसदावर्णत्रयेणतु कृच्छ्रेष्वेतेषुशूद्रस्यनाधिकारोविधीयतेइति तत्काम्यकृच्छ्राभिप्रायं अतःस्त्रीशूद्रयोःप्रतिलोमजानांचत्रैवर्णिकवत्व्रताधिकारइतिसिद्धं यत्तुगौतमवचनंप्रतिलोमाधर्महीनाइतितदुपनयनादिविशिष्टधर्माभिप्रायम् इतिमहापातकप्रायश्चित्तप्रकरणम् २६२ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महापातकादिपंचकमध्येमहापातकप्रायश्चित्तान्युक्त्वाधुनोपपातकप्रायश्चित्तानिव्याचक्षाणः पाठक्रमप्राप्तगोवधप्रायश्चित्तंतावदाह गांहंतीतिगोघ्नः मूल विभुजादित्वात्कप्रत्ययः असोमासंसमाहितआसीत् किंकुर्वन्पंचतानिगव्यानिगोमूत्रगोमयक्षीरदधिघृतानियथाविधिमिश्रितानिपिबन् आहारांतर परित्यागेनभोजनकार्येतस्यविधानात् तथागोष्ठशयः प्राप्तशयनानुवादेनगोष्ठविधानेनदिवात्वस्यापप्रतिषेधाद्रात्रौगोघ्नोगोशालायांशयनोगाअनुगच्छ तितदस्यव्रतमितिगोनुगामी व्रतेणिनिः अतश्चयासांगोष्ठशेतेसन्निधानात्ताएवगाः प्रातर्वनंविचरंतीरनुगच्छेत् अनुगच्छेदितिवचनाद्यतागच्छंतित दैवस्वयमनुगच्छेद्यदानुतिष्ठंत्यासतेवातदापश्चाद्गमनस्याशक्यकरणत्वात्स्वयमपितिष्ठदासीतवेतिगम्यते अनुगमनविधानादेवताभिः सायंगोष्ठंव्रजंती

पंचगव्यंपिबेद्गोघ्नोमासमासीतसंयमः गोष्ठेशयोगोनुगामीगोप्रदानेनशुध्यति २६३
कृच्छ्रंचैवातिकृच्छ्रंचचरेद्यापिसमाहितः दद्यात्त्रिरात्रंचोपोष्यवृषभैकादशास्तुगाः २६४

भिःसहगोष्ठप्रवेशोप्यर्थसिद्धः एवंकुर्वन्मासांतेगोप्रदानेनएकांगांदत्वातावताशास्त्रार्थस्यसंपत्तेर्गोहत्यायाः शुध्यतीत्येकंव्रतम् मासंगोष्ठेशयोगोनुगामी त्यनुवर्त्तते पंचगव्याहारस्यतुनिवृत्तिः कृच्छ्रविधानादेव अतश्चमासंनिरंतरंकृच्छ्रंसमाहितश्चरेदित्यपरम् अतएवजाबालेनमासंप्राजापत्यस्यपृथक्प्रा यश्चित्तत्वमुक्तम् प्राजापत्यंचरेन्मासंगोहंतावेदकामतः गोहितोगोनुगामीस्याद्गोप्रदानेनशुद्ध्यतीति अतिकृच्छ्रंवातथैवसमाचरेदित्यन्यत् कृच्छ्रातिकृ-च्छ्रयोर्लक्षणमुत्तरत्रवक्ष्यते अथवात्रिरात्रमुपवासंकृत्वावृषभानेकादशोयासांगावातावद्द्यादितिव्रतंचतुष्टयम् तत्राकामकृतेजातिमात्रब्राह्मणस्वामिकगो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मात्रवधेऽपवासंकृत्वावृषमैकादशगोदानसहितस्त्रिरात्रोपवासोद्रष्टव्यः विशिष्टस्वामिकायाविशिष्टगुणवत्याश्चवधेगुरुप्रायश्चित्तस्यवक्ष्यमाणत्वात् क्षत्रियसंबंधिन्यास्तुताद्दग्विधेव्यापादनेमासंपंचगव्याशित्वंप्रथमंप्रायश्चित्तम् अत्रमासंपंचगव्याशानस्यस्वल्पत्वात् मासोपवासतुल्यत्वंततश्चषड्भिःषड्भिरुपवासैरेकैकप्राजापत्यकल्पनयापंचकृच्छ्राणांप्रत्याम्नायेनपंचधेनवोमासांतेचदीयमानागोरेकेतिषट्धेनवोभवंतीति वृषमैकादशगोदानंसहितंत्रिरात्रव्रतालघीयस्त्वम् कथंपुनर्ब्राह्मणगवीनांगुरुत्वम् देवब्राह्मणराज्ञांतुविज्ञेयद्रव्यमुत्तममितिनारदेनतत्तद्द्रव्यस्योत्तमत्वाभिधानात् गोषुब्राह्मणसंस्थास्तिवतिदंडभूयस्त्वदर्शनाच्च वैश्यसंबंधिन्यास्तुताद्दग्विधेव्यापादनेमासमतिकृच्छ्रंकुर्यात् अतिकृच्छ्रस्याद्येत्रिरात्रत्रयेणापिपूरान्नभोजनमुक्तम् अतोत्रिरात्रेऽन्नशनम् अतोतिकृच्छ्रधर्मेणमासंव्रतेक्रियमाणेषड्रात्रमुपवासोभवति चतुर्विंशत्यहंचमतेपाणिपूरान्नभोजनम् ततश्चकृच्छ्रप्रत्याम्नायकल्पनयाकिंचिन्न्यूनंधेनुपंचकंभवतीतिपूर्वस्माद्व्रतद्वयाल्लघिष्ठत्वेनवैश्यस्वामिकगोवधविषयतायुक्ता तादृशएवविषयेशूद्रस्वामिकेगोहत्यायांमासंप्राजापत्यव्रतंद्वितीयं तत्रचसार्द्धप्राजापत्यद्वयात्मकेनप्रत्याम्नायेनकिंचिदधिकंधेनुद्वयंभवतीतिपूर्वेभ्योलघुनमत्वाच्छूद्रविषयतोचिता अथचैतत्प्रायश्चित्तचतुष्टयंसाक्षात्कर्तृव्याहकप्रयोजकानुमंतृषुगुरुलघुभावतारतम्यापेक्षयापूर्वोक्त एवविषयेयोजनीयम् यत्तुवैष्णवंव्रतत्रयम् गोघ्नस्यपंचगव्येनमासमेकंपलत्रयम् प्रत्यहंस्यात्सराकोवाचांद्रायणमथापिवेति यच्चकाश्यपीयम् गांहत्वातच्चर्मणाप्रावृत्तोमासंगोष्ठेशयस्त्रिषवणस्नायीनित्यंपंचगव्याहारइति यच्चशातातपीयम् मासंपंचगव्याहारइति तत्पंचकमपियाज्ञवल्कीयपंचगव्याहारविषयं यच्चशंखप्रचेताभ्यामुक्तं गोघ्नःपंचगव्याहारःपंचविंशतिरात्रमुपवसेत्सशिरस्कंवपनंकृत्वागोचर्मणाप्रावृतोगाश्चानुगच्छन्गोष्ठेशयोगांचदद्यादिति एतच्चयाज्ञवल्कीयमासातिकृच्छ्रव्रतसमानविषयम् दद्यात्त्रिरात्रंचोपोष्येत्येतद्विषयेचात्यंतगुणिनोहंतुर्वेदितव्यं अत्रैवविषयेपंचगव्याशक्तस्यतुद्वितीयम् काश्यपीयंमासंपंचगव्येनेतिप्रतियाद्यष्ठकालेपयोभक्षोवागच्छंतीस्त्वनुगच्छेत्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूक्षरोपविष्टारूक्षचोपविशेन्नातिपूर्वंगच्छेत्तानिविषमेणावतारयेन्नात्योदकेपाययेदंतेब्राह्मणान्भोजयित्वातिलधेनुंदद्यादितिद्रष्टव्यम् अत्राप्यशक्तस्यगो
घ्नोमासंयवागुंप्रसृततंदुलभृतांभुंजानोगोभ्यःप्रियंकुर्वन्रुद्धनीतिपैठीनसिनोक्तंवेदितव्यम् यत्तुसौमंतवम् गोघ्नस्यगोप्रदानंगोष्ठेशयनंद्वादशरात्रंप
ंचगव्यप्राशनंगवानुगमनंचेति यच्चसंवर्त्तेनोक्तम् सक्तुयावकभैक्षाशीपयोदधिघृतंसकृत् एतानिक्रमशोश्नीयान्मासार्द्धंतुसमाहितः ब्राह्मणान्भोजयि
त्वातुगोदद्यादात्मशुद्धयेइति यच्चबार्हस्पत्यं द्वादशरात्रंपंचगव्याहारइति तत्त्रितयमपियाज्ञवल्क्यीयमासप्राजापत्येनसमानविषयम् मृतकल्पगोहत्याविषयं
वापिविषमप्रदेशत्रासेनजनितव्याधितोमरणविषयंवावेदितव्यम् तदिदंसर्वप्रागुक्तकामविषयम् यदापुनरीदृग्विधामविशिष्टविप्रस्वामिकविशिष्टांगांकामतः
प्रमापयतितदामनुनामासंयवागूपानंमासद्वयं हविष्येणचतुर्थकालभोजनंमासत्रयंवृषभैकादशगोदानयुक्तं शाकटादिनावर्तनमितित्रतत्रितयमाम्नात
यथाह उपपातकसंयुक्तोगोघ्नोमासंयवान्पिबेत् कृतवापोवसेद्गोष्ठेचर्मणाद्रेणसंवृतः चतुर्थकालमश्नीयादक्षारलवणंमितम् गोमूत्रेणचरेत्स्नानंद्वौ
मासौनियतेंद्रियः दिवानुगच्छेत्तागास्तिष्ठन्नूर्ध्वंरजःपिबेत् शुश्रूषित्वानमस्कृत्वारात्रौवीरासनंव्रजेत् तिष्ठंतीष्वनुतिष्ठेत्तुव्रजंतीष्वप्यनुव्रजेत् आ
सीनासुतथासीतनियतोवीतमत्सरः आतुरामभिषिक्तांवाचौरव्याघ्रादिभिर्भयैः पतितांपंकलग्नांवासर्वप्राणैर्विमोक्षयेत् उष्णेवर्षतिशीतेवावातेवातिवा
हृशम् नकुर्वीतात्मनस्त्राणंगोरक्षत्वातुशक्तितः आत्मनोयदिवान्येषांगृहेक्षेत्रेथवाखले भक्षयंतींनकथयेत्सिवंतंचैवभक्षकम् अनेनविधिनायस्तुगोघ्नोगा
मनुगच्छति सगोहत्याकृतंपापत्रिभिर्मासैर्व्यपोहति ऋषभैकादशागाश्चदद्यात्सुचरितव्रतः अविद्यमानेसर्वस्वंवेदविद्भ्योनिवेदयेत् एतत्त्रितययाज्ञवल्क्ी
यमासप्राजापत्यमासपंचगव्याशनवृषभैकादशगोदानयुक्तत्रिरात्रोपवासरूपव्रतत्रितयविषयंयथाक्रमेणद्रष्टव्यम् यत्तंगिरसामानवेतिकर्त्तव्यतायुक्तंत्रैमा
सिकमभिधायाधिकमभिहितम् अक्षारलवणंरुक्षंषष्ठकालेस्यभोजनम् गोमतीवाजपेद्विद्यामोंकारंवेदमेवच्च व्रतवद्धारयेद्दंडंसमंत्रांचैवमेखलामिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्मानवविषयएव पुष्टितरुण्यादिकिंचिद्गुणानिशययोगिन्यांद्रष्टव्यम् अतिबालामतिवृद्धांचरोगिणीम् हत्वापूर्वविधानेनचरेदर्द्धव्रतंद्विजइति पुष्टितारुण्यादिरहितायांगव्यर्द्धप्रायश्चित्तदर्शनात् यदातुयाज्ञवल्क्यीयमासातिकृच्छ्रव्रतनिमित्तभूतांगामविशिष्टस्वामिकांजातिमात्रयोगिनींकामतोव्यापादयतितदाविहितंयदकामानांकामात्तुद्विगुणंचरेदितिन्यायेनपूर्वोक्तमेवाकामविहितंमासातिकृच्छ्रव्रतंद्विगुणंकुर्यात् यत्तुहारीतेन गोघ्नस्तच्चर्मोर्ध्ववालंपरिधायेत्यादिनामानवीमितिकर्त्तव्यतामभिधायोक्तम् वृषभैकादशाश्चगादत्वात्रयोदशेमासेपूतोभवतीति तत्सवनस्थश्रोत्रियगोवधेअकामकृतेद्रष्टव्यम् यत्तुवसिष्ठेनगांचेद्धन्यात्तस्याश्चर्मणार्द्रेणपरिवेष्टितःषण्मासान्कृच्छ्रंतप्तकृच्छ्रावातिष्ठेद्वृषगवेहतोदद्यात्तामित्यृषण्मासिकंकृच्छ्रंतप्तकृच्छ्रानुष्ठानमुक्तम् यदपिदेवलेन गोघ्नःषण्मासांस्तच्चर्मपरिवृतोगोग्रासाहारोगोव्रजनिवासीगोभिरेवसहचरन्प्रमुच्यतइति तत्तूभयमपिहारीतीयेनसमानविषयम् तत्रैवकामकारकृतकात्यायनीयंत्रैवार्षिकं गोघ्नस्तच्चर्मसंवीतोवसेद्गोष्ठेयवापुनः गाश्चानुगच्छेत्ततंमौनीवीरासनादिभिःवर्षशीतातपक्लेशवन्हिपंकभयार्दितः मोक्षयेत्सर्वयत्नेनपूयतेवत्सरैस्त्रिभिरितिद्रष्टव्यम् यच्चशांखंत्रैवार्षिकं पादंतुशूद्रहत्यायामुदक्यागमनेतथागोवधेचतथाकुर्यात्परस्त्रीगमनेतथेति तदपिकात्यायनीयव्रतसमानविषयम् यत्तुयमेनांगिरसीमितिकर्त्तव्यतामभिधाय गोसहस्रंशतंवापिदद्यात्स्फचरितव्रतः अविद्यमानेसर्वस्वंवेदविद्भ्योनिवेदयेदिति गोसहस्रयुक्तंगोशतयुक्तंद्वैमासिकंव्रतद्वयमभिहितम् तत्रयदासवनस्थश्रोत्रियातिदुर्गतबहुकुटुंबब्राह्मणसंबंधिनींकपिलांकर्मागभूतांगर्भिणींबहुक्षीरतरुणिमादिगुणशालिनींनिर्गुणोधनवान्सयत्नंखड्गादिनाव्यापादयतितदागोसहस्रयुक्तंद्वैमासिकंकुर्यात् गर्भिणींकपिलांदोग्ध्रींहोमधेनुंचस्फव्रताम् खड्गादिनाघातयित्वाद्विगुणंव्रतमाचरेदिति विशिष्टायांगविबार्हस्पत्येप्रायश्चित्तस्यदर्शनात् अतएवप्रचेतसास्त्रीगर्भिणीगोगर्भिणीबालवृद्धवधेषुभ्रूणहाभवतीति ईदृग्विधमेवगोवधमभिसंधायब्रह्महत्याव्रतमतिदिष्टम् द्विती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंतुधान्यंगोशतयुक्तंद्वैमासिकंव्रतंकात्यायनीयव्रतविषयेधनवतोद्रष्टव्यम् यत्तुगोनमेनवृषभैकगोशतदानसमुच्चितंत्रैवार्षिकं प्राकृतंब्रह्मचर्यवैश्य
वधेभिधायगोवधेतिदिष्टम् गांचहत्वावैश्यवृदिति एतच्चत्रैवार्षिकव्रतप्रत्यास्नायभूतनवतिधेनुभिः सार्धमृषभैकशतंगावोनवन्यूनद्विशतंभवती
तिगोसहस्रयुक्तद्वैमासिकव्रतान्न्यूनत्वात्पूर्वोक्तविषयेएवकामतोवधे यद्वातत्रैवविषयेगर्भरहितायाः कामतोवधेद्रष्टव्यम् तादृग्विधायाएवगर्भरहिता
यास्त्रकामतोहननेपिकात्यायनीयमेवत्रैवार्षिकंकल्प्यम् यत्तुयमेनोक्तं काष्ठलोष्टाश्मभिर्गावः शस्त्रैर्वानिहतायदि प्रायश्चित्तंकथंतत्र शस्त्रेशस्त्रे
विधीयते काष्ठेसांतपनंकुर्यात्प्राजापत्यंतुलोष्टके तप्तकृच्छ्रंतुपाषाणेशस्त्रेचाप्यतिकृच्छ्रकम् प्रायश्चित्ततश्त्रीणिकुर्याद्ब्राह्मणभोजनम् त्रिंशद्वृष
भंचैकंदद्यात्तेभ्यश्चदक्षिणामिति तत्पूर्वोक्तगोसहस्रशतादिदानत्रैवार्षिकादिव्रतविषयेषवकाष्ठादिसाधनविशेषजनितवधनिमित्तसांतपनादिपर्वकल्पप्रतिपा
दनपरंनतुनिरपेक्ष्यलघुत्वाद्व्रतस्य तथाबयोविशेषादपिप्रायश्चित्तविशेषउक्तः अतिवृद्धामतिकृशामतिबालांचरोहिणीम् हत्वापूर्वविधानेन चरेद्धेमव्रतं
द्विजः ब्राह्मणान्भोजयेच्छक्त्याद्यावद्धेमतिलांस्तथेति निरोगादिवधेयद्धितंतत्स्यार्धम् बृहत्पचेतसाप्यत्रविशेषउक्तः एकवर्षेहतेवत्सेकृच्छ्र
पादोविधीयते अबुद्धिपूर्वेपुंसस्त्याद्विपादस्तद्विहायने त्रिहायनेत्रिपादःस्यात्प्राजापत्यमतःपरमिति तथागर्भिण्यावधेयदागर्भोपिनिहतोभवतित
दाप्रतिनिमित्तंनैमित्तिकमावतद्वतिन्यायेनाविशेषेणद्विगुणव्रतप्राप्तौषट्त्रिंशान्मतेविशेषउक्तः पादउत्सन्नमात्रेतुद्वौपादौदृढतांगते पादोनंव्रतमु
द्दिष्टंहत्वागर्भमचेतनम् अंगप्रत्यंगसंपूर्णेगर्भेचेतःसमन्विते द्विगुणंगोव्रतंकुर्यादेषागोघ्नस्यनिष्कृतिरिति बहुकर्तृकेतुहननेसंवर्त्तापस्तंबाभ्यांवि
शेषउक्तः एकाचेद्बहुभिःकाचिद्दैवाद्यापादिताक्वचित् पादंपादंतुहत्यायाश्चरेयुस्तेपृथक्पृथगिति यादृग्विधगोहत्यायांयद्व्रतमुपदिष्टतत्पादंप्रत्येक
कुर्युर्वचनात् एकाचेदित्युपलक्षणम् अतोबहुभिर्हत्योर्बहूनांचव्यापादनेप्रतिपुरुषंपादद्वयंपादोनंवाकल्पनीयम् तच्चाकामतोवधेद्रष्टव्यम् दैवादितिविशेष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पोपादानात् कामकारेणबहूनामपिप्रत्येकंकृत्स्नदोषसंबधात्कृत्स्नव्रतसंबंधोयुक्तः सन्निणामिवप्रतिपुरुषंकृत्स्नव्यापारसमवायात् एकंघ्नतांबहूनांतु यथोक्तोद्विगुणोदमइतिप्रत्येकंदंडद्वैगुण्यदर्शनाच्च यदात्वेकेनैवबंधनादिव्यापरिणबहवोगावोव्यापादितास्तत्रसंवर्त्तापस्तंबाभ्यांविशेषउक्तः व्यापन्नानांबहूनांतुरोधनेबंधनेतथाभिषङ्मिथ्योपचारेचद्विगुणंगोव्रतंचरेदिति बहुष्वपिव्यापन्नेषुनप्रतिनिमित्तिकानुष्ठानम् नापितंत्रेण किंतुवचनबलाद्विगुणमेव तथाभिषगपिविरुद्धौषधदानेनैकस्याप्यकामतोव्यापादनेद्विगुणंगोव्रतंकुर्यात् भिषग्व्यतिरिक्तस्यकेवलंउपकारार्थंप्रवृत्तस्यत्वकामतः प्रतिकूलौषधदानेव्यासआह औषधंलवणंचैवपुण्यार्थमपिभोजनम् अतिरिक्तंनदातव्यंकाल्पेस्वल्पंतुदापयेत् अतिरिक्तेविपत्तिश्चेत्कृच्छ्रापादोविधीयतइति यत्तापस्तंबेनोक्तं पादमेकंचरेद्रोधेद्वौपादौबंधनेचरेत् योजनेपादहीनंस्याच्चरेत्सर्वनिपातनइति तद्व्यवहितव्यापारिणोनिमित्तकर्त्तुर्विज्ञेयम् नसाक्षात्कर्त्तृनिमित्तिनोश्वभेदस्तैनैवदर्शितः पाषाणेर्लकुटैर्वापिशस्त्रेणान्येनबाबलात् निपातयंतियेगास्तेकृत्स्नंकुर्युर्व्रतंहिते तथैवबाहुजंघोरुपार्श्वग्रीवांघ्रिमोटनैरिति एतदुक्तंभवति पाषाणखड्गादिभिर्ग्रीवामोटनादिनावायेगांनिपातयंतितेसाक्षाद्घातारस्तेषवकृत्स्नंप्रायश्चित्तम् येतुव्यवहितरोधबंधादिव्यापारयोगिनस्तेनिमित्तिनस्तेषांनकृत्स्नव्रतसंबंधः किंतुतदवयवैरेवपादद्विपादादिभिरिति तत्रचरोधादीनांव्यवहितव्यापारत्वाविशेषेपिवचनात्कचित्पादः कचिद्द्विपादंपादोनंकचिदितियुक्तम् अत्राहपाराशरः गवांबंधनक्लेशैस्तुभवेन्मृत्युरकामतः अकामकृतपापस्यप्राजापत्यंविनिर्दिशेत् प्रायश्चित्तंतश्चीर्णेकुर्याद्ब्राह्मणभोजनम् अनड्वत्सहितांगांचददाद्विप्रायदक्षिणामिति अयंचप्राजापत्योयदिरोधादिकंकृत्वातज्जन्यप्रमादपरिजिहीर्षयाप्रत्यवेक्षमाणआस्तेतदाद्रष्टव्यः अकामकृतपापस्येतिविशेषणोपादानात् यदानप्रमादंसंरक्षणंकरोतितदापादमेकंचरेद्रोधेद्वौपादौबंधनेचरेत् योजनेपादहीनंस्याच्चरेत्सर्वनिपातनइत्यंगिरोक्तंद्रष्टव्यम् त्रैमासिकपादंकिंचिदधिकंवाविंशत्यहर्गोवधव्रतंकुर्यात् आपस्तंबेनापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषउक्तः अतिदाहातिवाहाभ्यांनासिकाच्छेदनेतथा नदीपर्वतसंरोधेमृतेपादोनमाचरेदिति लक्षणमात्रोपयोगिनितुदाहेनदोषः अन्यत्रांकनलक्षाभ्यांवाहनेमोचनेतथा सायंसंगोपनार्थंचनदुष्येद्बोधबंधनेइतिपराशरस्मरणात् अंकनंस्थिरचिन्हकरणम् लक्षणंसाम्प्रतोपलक्षणम् वाहनेशास्त्रोक्तमार्गेण रक्षणार्थमपिनालिकेरादिभिर्बंधनेभवत्येवदोषः ननालिकेरेणनशाणवालैर्नचापिमौंजेननबध्नश्रृंखलैः एतैस्तुगावोननिबंधनीयाबध्वानुतिष्ठेत्सरज्जंगृहीत्वा कुशैःकाशैश्चबध्नीयात्स्थानेदोषविवर्जितेइतिव्यासस्मरणात् तथान्योपिविशेषस्तेनैवोक्तः घंटाभरणदोषेणविपत्तिर्यदिगोर्भवेत् कृच्छ्रार्द्धंतुभवेत्तत्रभूषणार्थंहितत्स्मृतम् अतिदोहातिदमनेसंधातेचैवयोजने बध्वाश्रृंखलपाशैश्चस्मृतपादोनमाचरेदिति पालनकरणादिनोपेक्षायांकश्चित्प्रायश्चित्तविशेषस्तेनैवोक्तः जलौघपल्वलेमग्नामेघविद्युद्धतापिवा गर्त्तायांपतिताकस्माच्छापदेनाप्यभक्षिता प्राजापत्यंचरेत्कृच्छ्रंगोस्वामीव्रतमुत्तमम् शीतवातहतावास्यादुद्बंधनहतापिवा शून्यागारउपेक्षायांप्राजापत्यंविनिर्दिशेदिति इदंतुकार्यांतरविरहेप्युपेक्षायावेदितव्यम् कार्यांतरव्यग्रतयोपेक्षयात्वर्धं पल्वलौघमृगव्याघ्रशापदादिनिपातने श्वभ्रप्रपातसर्पाद्यैर्मृतेकृच्छ्रार्धमाचरेत् अपालत्वात्तुकृच्छ्रःस्याच्छून्यागारउपपूर्वइतिविष्णुस्मरणात् तथासत्यपिव्यापादनेकश्चिदुपकारार्थंप्रवृत्तोवचनाद्दोषाभावः यथाहसंवर्त्तः यंत्रणेगोर्चिकित्सार्थेगूढगर्भविमोचने यत्नेकृतेविपत्तिःस्यान्नसपापेनलिप्यतेइति यंत्रणंव्याध्यादिनिर्यातनार्थंसंदंशांकुशादिप्रवेशनम् तथा औषधंस्नेहमाहारंददद्दोब्राह्मणेद्विजेः दीयमानेविपत्तिश्चेन्नसपापेनलिप्यते ग्रामघातेशिरोघेणवेश्मभंगान्निपातने तथा दाहच्छेदशिराभेदप्रयोगैरुपकुर्वताम् द्विजानांगोहितार्थंचप्रायश्चित्तंनविद्यते अत्रपराशरोप्याह अतिवृष्टिहतानांच प्रायश्चित्तंनविद्यते कूपपातेचधर्मार्थंगृहदाहेचयेमृताः ग्रामदाहेतथाघोरप्रायश्चित्तंनविद्यतेइति इदंतुबंधनरहितस्यैवपशोःकथंचित्तद्गृहादिदानेनमृतविषयम् इतरथापस्तंबोक्तम् कांतारेषथदुर्गेषुगृहदाहेखलेषुच यदितत्रविपत्तिःस्यात्सादएकोविधीयतेइति तथास्यादिभंगे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरणाभावेक्वचित्प्रायश्चित्तमुक्तम् अस्थिभंगंगवांकृत्वालांगूलच्छेदनंतथा पादनंदंतशृंगाणांमासार्द्धंचयवान्पिबेदिति यत्त्वांगिरसम् शृंगदंतास्थिभंगे वाचर्मनिर्मोचपिवा दशरात्रंपिबेद्गंस्वस्थापियदिगोर्भवेदिति वज्रशब्दवाच्यंक्षीरादिवर्त्तनमुक्तंतदशक्तविषयम् इदंचप्रायश्चित्तंगोस्वामिनेव्यापन्न- गोसदृशींगांदत्वैवकार्यम् यथाहपराशरः प्रमापणेप्राणभृतांदद्यात्तत्प्रतिरूपकम् तस्यानुरूपंमूल्यंवादद्यादित्यब्रवीन्मनुरिति मनुरपि योयस्यहिंस्या द्द्रव्याणिज्ञानतोज्ञानतोपिवा सतस्योत्सादयेत्तुष्टिंराज्ञेदद्याच्चतत्सममिति एतच्चपूर्वोक्तप्रायश्चित्तजातंब्राह्मणस्यैवहंतुर्वेदितव्यं क्षत्रियादेस्तुहंतुर्बृ हद्विष्णुनाविशेषाभिहितः विप्रेतुसकलंदेयंपादोनंक्षत्रियेस्मृतम् वैश्यर्धंपादएकस्तुशूद्रजातिषुशस्यतइति यत्संगिरोवचनम् पर्षद्यब्राह्मणानातु साराज्ञोद्विगुणामता वैश्यानांत्रिगुणाप्रोक्तापर्षद्वच्चव्रतंस्मृतमिति तत्प्रतिलोम्येनवाग्दंडपारुष्यादिविषयम् तथास्त्रीवृद्धबालादीनांत्वर्धं अनु पनीतस्यबालस्यपादइतिचप्रागुक्तमनुसंधेयम् स्त्रीणांपराशरेणविशेषाभिहितः वपनंनैवनारीणांनानुव्रज्याजपादिकम् नगोष्ठेशयनंतासांनवसीरन् गवाजिनम् सर्वान्केशान्समुद्धृत्यच्छेदयेदंगुलद्वयम् सर्वत्रैवहिनारीणांशिरसोमुंडनंस्मृतमिति पुरुषेषुचविशेषः संवर्त्तेनदर्शितः पादंगरोमवपनंद्विपा देश्मश्रुणोपिच त्रिपादंतुशिरवावर्जंसशिरवंतुनिपाननेइति पादप्रायश्चित्तार्हस्यकंठादधस्तनांगरोम्णामेववपनम् अर्धप्रायश्चित्तार्हस्यतुश्मश्रूणा मपि पादोनप्रायश्चित्तार्हस्यपुनः शिरोगतानामपिशिरवावर्जितानां पादचतुष्टयार्हस्यतुशिरवस्यसकलकेशजातस्येति एवमेतद्गिरवलंबनेनान्येषा मपिस्मृतिवचसांविषयोनिरूपणीयः इतिगोवधप्रायश्चित्तप्रकरणम् २६३ २६४ अधुनान्येषामुपपातकानांप्रायश्चित्तमाह एवमुक्तेनगो वधव्रतेनमासंपंचगव्याशनादिनान्येषांव्रात्यतादीनामुपपातकानांशुद्धिर्भवेत् चांद्रायणेनवावक्ष्यमाणलक्षणेनमासंपयोव्रतेनवापराकेणवाशुद्धिर्भ वेत् अत्रातिदेशसामर्थ्यात्गोचर्मवसनगोपरिचर्यादिभिर्गोवधासाधारणैः कतिपयैर्न्यूनत्वमवगम्यते एतच्चव्रतचतुष्टयमकामकारशक्त्यपेक्षयावि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्पितंद्रष्टव्यम् कामकारेतु एतदेवव्रतंकुर्युरुपपातकिनोद्विजाः अवकीर्णिवर्जंशक्त्यर्थंचांद्रायणमथापिवेतिमनूक्तंत्रैमासिकंद्रष्टव्यम् अतएववचनादयंप्रायश्चित्तातिदेशः सर्वेषामुपपातकगणपठितानामुक्तप्रायश्चित्तानामनुक्तप्रायश्चित्तानांचावकीर्णिवर्जितानामविशेषणवेदितव्यः अवकीर्णिनस्कृप्रतिपदोक्तमेव नन्वनुक्तप्रायश्चित्तविषयतयैवातिदेशतायुक्ता इतरथाप्रतिपदोक्तप्रायश्चित्तवधेसापेक्ष्यत्वप्रसंगात् मैवं तथा सत्यकृतनिष्कृतीनामुपपातकगणपाठोनर्थकःस्यात् यदिपरमुपपातकमध्येसामान्यतःपठितस्यान्यत्रविशेषतःप्रायश्चित्तांतरमुच्यते तथा आज्यानांचयाजनंत्रीन्कृच्छ्रानाचरेत् व्रात्ययाजकोभिचरन्नपीति सएवविषयःकेवलंपरिह्रीयेत नपुनर्विशेषतःपठितस्यान्यत्रापिविशेषतएवप्रायश्चित्तमुच्यते सोपियथाइंधनार्थंद्रुम

उपपातकशुद्धिः स्यादेवंचांद्रायणेनवा पयसावापिमासेनपराकेणाथवापुनः २६५

च्छेदः वृक्षगुल्मलतावीरुधच्छेदनेजप्यमृक्शतमिति अतोव्रात्यतादिषुअस्मिन्शास्त्रेशास्त्रांतरेवादृष्टैः प्रायश्चित्तैःसहोपपातकशुद्धिःस्यादेवमित्यादिनाप्रतिपादितव्रतचतुष्टयस्यसमविषमताकल्पनेनविकल्पोविषयविभागोवाश्रयणीयः तानिस्मृत्यंतरदृष्टप्रायश्चित्तानिपाठक्रमेणव्रात्यतादिषुयोजयिष्यामः तत्रव्रात्यतायांमनुनेदमुक्तम् येषांद्विजानांसावित्रीनानूच्येतयथाविधि तांश्चारयित्वात्रीन्कृच्छ्रान्यथाविध्युपनायनेदिति एतच्चयमेनोक्तं सावित्रीपतितायस्यदशवर्षाणिपंचच सशिखंवपनंकृत्वाव्रतंकुर्यात्समाहितः एकविंशतिरात्रंचपिबेत्पंचसुतयावकम् हविष्यंभोजयित्वैवंब्राह्मणान्सप्तपंचच ततोयावकशेषस्यतस्योपनयनंस्मृतमिति तदुभयमपियाज्ञवल्क्यीयमासपयोव्रतविषयम् यत्तुवसिष्ठेनोक्तम् पतितसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विन्नीकउद्वालकव्रतंचरेत् द्वौमासौयावकेनवर्त्तयेन्मासंपयसापक्षमामिक्षयाष्टरात्रंघृतेनषड्रात्रमयाचितेनत्रिरात्रमब्भक्षोहोरात्रमुपवसेदश्वमेधावभृथं गच्छेद्वात्यस्तोमेनयायजेतेति अत्रेयंव्यवस्था यस्योपनेत्राद्यभावेनतत्कालातिक्रमस्तस्ययाज्ञवल्क्यीयव्रतानामन्यतमशक्त्यपेक्षयाभवति अनापद्यतिक्रमेतुमानवंत्रैमासिकम् तत्रैवपञ्चदशवर्षादूर्ध्वमपिक्रियत्कालातिक्रमेदुद्वालकव्रतम् व्रात्यस्तोमोवेति येषांतुपित्रादयोनुपनीतास्तेषामापस्तंबोक्तम् यस्यपितापितामहावनुपनीतोस्यातांतस्यसंवत्सरंत्रैविद्यकंब्रह्मचर्यम् यस्यप्रपितामहादेर्नानुस्मर्यतउपनयनंतस्यद्वादशवर्षाणित्रैविद्यकंब्रह्मचर्यमिति तथास्तेयेष्वुपपातकसाधारणप्रायश्चित्तचतुष्टयापवादकंप्रायश्चित्तमनुनोक्तम् धान्यान्नधनचौर्याणिरूप्याकामात्तुद्विजोत्तमः सजातीयगृहादेवकृच्छ्राब्देनविशुध्यतीतिद्विजोत्तमस्यसजातीयोब्राह्मणएवातोविप्रपरिग्रहेब्राह्मणस्यहर्त्तुरिदंक्षत्रियादेस्तत्स्वल्पकल्प्यं अथाष्टापाद्यस्तेयकिल्बिषंशूद्रस्यद्विगुणोत्तरागीतरेषांप्रतिवर्णंविदुषोतिक्रमेदंडभूयस्त्वमिति क्षत्रियादेरपहर्त्तुर्दंडाल्पत्वस्यदर्शनात् तथा विप्रेतुसकलंदेयंपादोनंक्षत्रियेस्मृतमिति पादपादहान्याप्रायश्चित्तदर्शनात् तथा क्षत्रियादिपरिग्रहेणापिदंडानुसारेणप्रायश्चित्तात्सेतंकल्प्यं अतःक्षत्रियपरिग्रहेचैर्यषाण्मासिकम् वैश्यपरिग्रहेत्रैमासिकंगोवधव्रतम् शूद्रपरिग्रहेचांद्रायणंकल्प्यम् एवमुत्तरत्राप्यूहनीयम् इदंचदशकुंभधान्यापहारविषयम् अधिकेतु धान्यंदशभ्यःकुंभेभ्योहरतोदमउत्तमः पलसहस्रादधिकेवधइतिदर्शनात् कुंभश्चपंचसहस्रपलपरिमाणः धान्यसाहचर्यादन्यधनेचैतावद्धान्यपरिमितेवेदितव्यम् अन्नशब्देनतंदुलादिकमभिधीयते धनशब्देनताम्ररजतादिकं इदंतुप्रायश्चित्तंकामकारविषयम् अकामतस्तुत्रैमासिकंगोवधव्रतम् तथा मनुष्याणांचहरणेस्त्रीणांक्षेत्रगृहस्यच कूपवापीजलानांचशुद्धिश्चांद्रायणेनेतिसार्द्धशतद्रव्यपणलभ्यजलापहारेइदंचांद्रायणंप्राप्तमपीतरगोवधव्रतनिवृत्यर्थंविधीयते तावन्मूल्यजलापहारेपानीयस्यतृणस्यच तन्मूल्यद्विगुणोदंड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिपंचशतम् तथेतिचांद्रायणविषयेपंचशतदंडविधानात्तावत्परिमाणदंडचांद्रायणयोर्गोवधादौसहचरितत्वात्तथाकृच्छ्रातिकृच्छ्रैर्द्वयोःपण
पंचशतंतथेतिचांद्रायणविषयेपंचशतपणदंडविधानाच्च एतच्चक्षत्रियादिद्रव्यापहारेद्रष्टव्यम् ब्राह्मणसंबंधिद्रव्यापहारेतु निक्षेपस्यापहरणे
नराश्वरजतस्यच भूमिवज्रमणीनांचरुक्मस्तेयसमंस्मृतमितिद्रष्टव्यम् तथाद्रव्याणामल्पसाराणांस्तेयंकृत्वान्यवेश्मनः चरेत्सांतपनंकृच्छ्रं
तन्निर्यात्यात्मशुद्धयइत्यनेनाल्पप्रयोजनत्रपुसीसादिद्रव्यापहारविशेषेणस्तेयसामान्योपपातकप्रायश्चित्तापवादद्वंद्वंचचांद्रायणनिमित्तभूता-
र्द्धतृतीयशतमूल्यस्यपंचदशांशार्द्धत्रपुसीसाद्यपहारेप्रायश्चित्तम् चांद्रायणपंचदशांशत्वात्तस्य तथाद्रव्यविशेषेणाप्युपपातकसामान्यप्राप्तेव्र
तापवादः भक्ष्येभोज्यापहरणेयानशय्यासनस्यच पुष्पमूलफलानांचपंचगव्यंविशोधनमिति एकवारभोजनपर्याप्तभक्षभोज्यापहारइदं द्विवार
भोजनपर्याप्तापहारेत्रिरात्रं यथाहपैठीनसिः भक्ष्यभोज्यान्नस्योदरपूरणमात्रहरणेत्रिरात्रमेकरात्रंवापंचगव्याहरतेति यानादीनामप्येत
त्साहचर्यादेतावन्मूल्यानामेवापहरणेएतत्प्रायश्चित्तम् सर्वत्रापिह्रीयमाणद्रव्यन्यूनाधिकभावेनप्रायश्चित्तस्यापिगुरुलघुभावः कल्पनीयः तथा तृणकाष्ठ
द्रुमाणांचशुष्कान्नस्यगुडस्यच तैलचर्मामिषाणांचत्रिरात्रंस्यादभोजनमिति एषांचतृणादीनांभक्षादित्रिगुणत्रिरात्रप्रायश्चित्तस्यदर्शनात् नत्रि
गुणमूल्यार्थीनामेतत्प्रायश्चित्तं तथा मणिमुक्ताप्रवालानांताम्रस्यरजतस्यच अयस्कांस्योपलानांचद्वादशाहंकणान्वितेति अत्रापिभक्षादि
द्वादशगुणप्रायश्चित्तदर्शनात्तन्मूल्यद्वादशगुणमूल्यमणिमुक्ताद्यपहारिएतत्प्रायश्चित्तमिदंद्रष्टव्यम् तथाकार्पासकीर्णजीर्णानांद्विखरैक
खुरस्यच पक्षिगंधौषधीनांचरज्वाश्चैवंव्यहंपयइति अत्रापिभक्ष्यादित्रिगुणप्रायश्चित्तदर्शनात्तत्त्रिगुणमूल्यानामपहारएवैतत्प्रायश्चित्तम् ह्रीय
माणद्रव्यन्यूनाधिकभावेनप्रायश्चित्तात्स्वल्पमहत्त्वंकल्प्यमेव इदंचस्तेयप्रायश्चित्तमपहृतद्रव्यदानोत्तरकालमेवद्रष्टव्यम् यथाहविष्णुः दत्त्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पहृतंद्रव्यंस्वामिनेव्रतमाचरेदिति ऋणापाकरणंचपुत्रपौत्रैरृणंदेयमितिविहितंतस्यानपाकरणेतथावैदिकस्यचजायमानोवैब्राह्मणइत्येनद्वाक्येनर्णसंस्कृतय ज्ञाद्यकरणेच उपपातकशब्दिःस्यादेवमित्यादिनोपपातकसामान्यविहितंव्रतंचतुष्टयंशक्त्यपेक्षयायोज्यम् प्रायश्चित्तांतरमप्यत्रमनुनोक्तम् इष्टिंवैश्वानरींचैवनिर्वपेदब्दपर्यये लुप्तानांपशुसोमानांनिष्कृत्यर्थमसंभवइति अब्दपर्ययेसंवत्सरांते तथाधिकृतस्यानाहिताग्नित्वेप्येतदेवव्रतंचतुष्टयम् वत्सराद्ध्वमापदिशक्त्यपेक्षयायोज्यम् अनापदितुमानवंत्रैमासिकं अर्वाक्पुनर्वत्सरात्काण्वाजिनिर्विशेषमाह कालेत्वाधायकर्माणिकुर्याद्विप्रोविधानतः तदकुर्वन्त्रिरात्रेणमासिमासिविशुद्ध्यति अनाहिताग्नेपित्रादेर्यक्ष्यमाणःसुतोयदि सहिभ्रात्येनपशुनायजेत्तन्निष्क्रयायेति एकाग्नेरपिविशेषस्तेनैवोक्तः सुतदारोगृहेज्येष्ठोयोनादध्यादुपासनम् चांद्रायणंचरेद्वर्षंप्रतिमासमहोपिवेति यथापण्यानांविक्रयेचस्मृत्यंतरेप्रायश्चित्तविशेषउक्तः यथाहहारीत गुडतिलपुष्पमूलफलपक्वान्नविक्रयेसोमपानम् सोमशुच्छ्रः लाक्षालवणमधुमांसतैलक्षीरदधिघृतगंधवस्त्रमद्यविक्रयेचांद्रायणं तथा ऊर्णाकेशकेशरशृंगधेनुवेश्माश्मशस्त्रविक्रयेचभक्षमांसरत्नास्थिशृंगनखशुक्तिविक्रयेतप्तकृच्छ्रः हिंगुगुग्गुलुहरितामनःशिलांजनगैरिकलाक्षालवणमणिमुक्ताप्रवालवेणुवेणुशृन्मयेषुचतप्तशुच्छ्रः आरामतडागोदपानपुष्करिणीशुशुतविक्रयेत्रिषवणस्नाय्यधःशायीच तुर्थकालाहारोदशसहस्रंजपन्संवत्सरेणपूतोभवति हीनमानोन्मानसंकरसंकीर्णविक्रयेचेति एवमन्यैरपिशंखविष्ण्वाद्युक्तवचनैर्युक्तप्रायश्चित्तविशेषोक्तंतत्रानापदिमानवमुपपातकसाधारणतः प्राप्तंत्रैमासिकम् आपदितुयाज्ञवल्क्यीयंव्रतंचतुष्टयंशक्त्यपेक्षयायोज्यं तथा परिवेत्तरिच्यवसिष्ठेनप्रायश्चित्तविशेषउक्तः परिविविदानः शुच्छ्रातिशुच्छ्रौचरित्वातांतस्मैदत्वापुनर्निविशेत् नांचैवोपयच्छेतेति परिविविदानः परिविन्निरुच्यते तत्स्वरूपंचप्राग्व्याख्यातम् अस्मैशुच्छ्रातिशुच्छ्रौचरित्वातस्मैज्येष्ठायतांस्तोदांदत्वाब्रह्मचर्याहतभैक्षवद्गुरुपरिभवपरिहारार्थंनिवेद्यपुनरुद्वहेत् का

मि॰प्रा॰ ३

८६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिन्यपेक्षयामुक्तम् तामेवोपयच्छेतेतितामेवस्वोढांज्येष्ठायनिवेदितांतेनचानुज्ञातामुद्वहेत् यत्तुहारीतेनोक्तम् ज्येष्ठेनिविष्टेकनीयान्विशमानःपरि
वेत्ताभवतिपरिवित्तिर्ज्येष्ठः परिवेदनीकन्या परिदायीदातापरियष्टायाजकः तेसर्वेपतिताः संवत्सरंप्राजापत्येनकृच्छ्रेणपावयेयुरिति यदपिशंखेनोक्तम्
परिवित्तिःपरिवेत्ताचसंवत्सरंब्राह्मणगृहेषुभैक्ष्यंचरेयातामिति तदुभयमपिकामकारेणकन्यापित्राद्यनुज्ञातोद्वाहविषयम् प्रायश्चित्तस्यगुरुत्वात् य
दापुनःकामतोकन्यांपित्रादिदत्तामेवपरिणयतितदामानवंत्रैमासिकम् पूर्वोक्तौकृच्छ्रातिकृच्छ्रौयाज्ञवल्कीयव्रतचतुष्टयमज्ञातविषयम् यमेनाप्यत्र
विशेषउक्तः कृच्छ्रौद्वयोःपारिवेद्येकन्यायाः कृच्छ्रएवच अतिकृच्छ्रंचरेद्दाताहोताचांद्रायणंचरेदिति एतच्चपर्याहिताग्न्यादीनामपिसमानम् एकयोग
निर्देशात् यथाहगौतमः परिवित्तिपरिवेतृपर्याहितपर्याधात्रग्रेदीधिषुदिधिषूपतीनांसंवत्सरंप्राकृतब्रह्मचर्यमिति अतएववसिष्ठेनाग्रेदिधिषूपत्या-
दाविदमेवप्रायश्चित्तमुक्तम् अग्रेदिधिषूपतिः कृच्छ्रंद्वादशरात्रंचरित्वानिर्विशेत् तांचैवोपयच्छेतदिधिषूपतिः कृच्छ्रातिकृच्छ्रौचरित्वातस्मैदत्तांपुन
र्निर्विशेतेति अग्रेदिधिष्वादेर्लक्षणंस्मृत्यंतरेभिहितम् ज्येष्ठायांयद्यनूढायांकन्यायामूह्यतेनुजा यासाग्रेदीधिषूर्ज्ञेयापूर्वातुदिधिषूस्मृतेति त
त्राग्रेदधिषूपतिः प्राजापत्यंकृत्वातामेवज्येष्ठांपश्चादन्येनोढामुद्वहेत् दिधिषूपतिस्तुकृच्छ्रातिकृच्छ्रौकृत्वास्वोढांज्येष्ठांकनीयस्याःपूर्वंविप्रेंद्रेदत्वान्या
मुद्वहेदितिपरिवेदनम् तथा भृतकाध्यापकभृतकाध्यापितयोश्चपयसाब्रह्मसुवर्चलांपिबेदित्यधिकृत्यविष्णुनोक्तम् भृतकाध्यापनंकृत्वाभृतकाध्यापित-
स्तथा अनुयोगप्रदानेनत्रीन्पक्षान्नियतःपिबेदिति उत्कर्षहेतोरधीयानस्यनाशितंत्वयेत्येवंपर्यनुयोगोनुयोगप्रदानम् अतएवस्मृत्यंतरे दत्ता
नुयोगानध्येतुःपतितान्मनुरब्रवीदित्युक्तं अत्रापिपूर्वोक्तव्रतैःसहास्यशक्त्याद्यपेक्षयाविकल्पः इतिभृतकाध्यापकाध्यापितप्रकरणम् तथापारदार्ये-
प्युपपातकसामान्येप्राप्तमानवत्रैमासिकस्ययाज्ञवल्कीयव्रतचतुष्टयस्यापिगुरुदारादावपवादउक्तः तथान्यत्रापिगौतमादिभिःपारदार्यविशेषेणापवाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तः यथाह गौतमः द्वेपरदारेत्रीणिश्रोत्रियस्येति तथावार्षिकंप्राकृतंब्रह्मचर्यं प्रकृत्यतेनैवेदमभिहितम् उपपातकेष्वेवमिति तत्रैवंव्यवस्था ऋतुकालेकामतोजातिमात्रब्राह्मणीगमनेवार्षिकंप्राकृतब्रह्मचर्यं तस्मिन्नेवकालेकर्मसाधनत्वाद्विगुणशालिन्याब्राह्मण्यागमनेद्वेवर्षेप्राकृतंब्रह्मचर्यं तादृश्याएवश्रोत्रियभार्यायागमनेत्रीणिवर्षाणिप्राकृतब्रह्मचर्यं यदाश्रोत्रियपत्न्यांगुणवत्यांब्राह्मण्यांत्रैवार्षिकम् तादृग्विधायामेवक्षत्रियायांद्वैवार्षिकम् तादृश्यामेववैश्यायांवार्षिकमितिव्यवस्था एतत्समानदृष्ट्याशूद्रायांषाण्मासिकंप्राकृतंब्रह्मचर्यंकल्पनीयम् अतएवशंखेनवैश्यायामवकीर्णःसंवत्सरं ब्रह्मचर्यंत्रिषवणंचानुतिष्ठेत्क्षत्रियायांद्वेवर्षेत्रीणिब्राह्मण्यावैश्योयांशूद्रायांब्राह्मणपरिणीतायामितिवर्णक्रमेणह्रासोदर्शितः एवंक्षत्रियस्यापिक्षत्रियादिषुत्रीषुक्रमेणद्विवार्षिकवार्षिकषाण्मासिकानिपूर्वोक्तएवविषयेयोजनीयानि वैश्यस्यवैश्याशूद्योर्वार्षिकषाण्मासिके न्यूनद्रस्यशूद्रांपरभार्यायांषाण्मासिकमेव यत्त्वापस्तंबीयम् सवर्णीयामनन्यपूर्वायांसत्कृत्संनिपातेपादःपतत्येवमभ्यासेपादःपादश्चतुर्थंसर्वमिति तद्गौतमीयत्रिवार्षिकेणसमानविषयम् अनन्यपूर्विकायांचतुरभ्यासेद्वादशवार्षिकप्रायश्चित्तविधानादेकस्यामेवगमनाभ्यासेनेदंप्रायश्चित्तंकिंतुप्रतिगमनंपादपादन्यूनंकल्प्यम् एतत्सर्वंकामकारविषयम् अकामतःपुनरेतदेवार्द्धकृच्छ्रापूर्वोक्तविषयेयोजनीयम् अनृतुकालेतुजातिमात्रब्राह्मण्यांकामतोगमनेमानवंत्रैमासिकम् जातिमात्रक्षत्रियादिषुस्त्रीषुपुनरस्मिन्नेवविषयेतदीयान्येवद्वैमासिकचांद्रायणषण्मासिकानियोजनीयानि क्षत्रियादीनांक्षत्रियादिषुस्त्रीषुद्वैमासिकादीन्येव अकामतः पुनरेतास्वेवार्षिकानांयाज्ञवल्क्यीयमृषभैकादशगोदानम् मासंपंचगव्याद्यानंमासंप्राजापत्यचरणंचक्रमेणद्रष्टव्यम् शूद्रागमनेतुकामतोविहितं मासव्रतमेवार्द्धकृच्छ्रायोजनीयम् अतएवसंवर्तः शूद्यांतुब्राह्मणोगत्वामासंमासार्द्धमेववा गोमूत्रयावकाहारस्तिष्ठेत्तत्सापमुक्तयइत्यकामतोर्द्धमासिकमित्यभिप्रेतम् ब्राह्मणश्चेदंप्रेक्षापूर्वकं ब्राह्मणदारानभिगच्छेन्निवृत्तधर्मकर्मणः कृच्छ्रोनिवृत्तधर्मकर्मणोतिकृच्छ्रइति तद्ब्राह्मणभार्यायां-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शूद्रायां द्रष्टव्यम् द्विजातिस्त्रीषु च विप्रोढासु द्विस्त्रिर्व्यभिचारितासु अबुद्धिपूर्वगमने वा तथा च संवर्त्तः विप्रास्वजानता गत्वा प्राजापत्यं समाचरेदिति का
मतस्तु राज्ञीं प्रव्रजितां धात्रीं साध्वीं वर्णोत्तमामिति कृच्छ्रद्वयं प्रकुर्वीत सगोत्रामभिगम्य चेति यमोक्तं कृच्छ्रद्वयं द्रष्टव्यम् चतुराद्यभ्यासे तु व्यभिचारस्य
स्वैरिण्यां वृषल्यामवकीर्णः सचैलं स्नात्वोदकुंभं दद्याद्ब्राह्मणाय वैश्यायां च चतुर्थकालाहारो ब्राह्मणान्भोजयेद्यवसभारं च गोभ्यो दद्यात् क्षत्रियायां त्रिरा
त्रोपोषितो घृतपात्रं दद्यात् ब्राह्मण्यां षड्रात्रोपोषितो गां दद्याद्गोष्ववकीर्णः प्राजापत्यं चरेत् अनूढायामवकीर्णः पलालभारं सीसमास्वकं च दद्यात् इति शं
खोक्तं वेदितव्यम् चतुराद्यभ्यासविषयत्वं चास्य चतुर्थे स्वैरिणी प्रोक्ता पंचमे बंधकी मतेति स्मृत्यंतरादवगम्यते अत्रैव विषये षट्त्रिंशन्मतेप्यु
क्तम् ब्राह्मणीं बंधकीं गत्वा किंचिद्दद्यात् द्विजातये राजन्यां चेद्धनुर्दद्याद्वैश्यां गत्वा तु चैलकम् शूद्रां गत्वा तु वै विप्र उदकुंभं द्विजातये दिवसोपोषितो
वास्याद्दद्याद्विप्राय भोजनमिति अनुलोमव्यवाये गर्भे द्विगुणं यदि सा अतिदूषिता न प्रतिलोमगा न भवति तदैव अन्यजातिगमने द्वैगुण्यं प्रतिलो
मदूषितासु अंत्यावसायिस्त्रीषु च चांडालीगर्भे यथा गुरुतल्पव्रतं तथा किंचिन्न्यूनं तारतम्यं कल्प्यम् चांडालीगमने वार्षिकम् गर्भे गुरुतल्पत्वं तथैव ज्ञे
यं इदं प्रायश्चित्तजातं गर्भानुत्पत्तिविषयम् तदुत्पत्तौ तु यद्विशेषेण यत्प्रायश्चित्तमुक्तं तदेव तत्र द्विगुणं कुर्यात् गमने तु व्रतं यत्स्याद्गर्भे तद्द्विगुणं चरेदि
त्युशनसः स्मरणात् शूद्र्यां गर्भमादधतश्चतुर्विंशतिमते विशेष उक्तः वृषल्यामभिजातस्तु त्रीणि वर्षाणि चतुर्थकालसमये नक्तं भुंजीतेति यत्तु मनुवच
नम् शूद्र्यां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयत इति तत्पापगौरवाख्यापनं परम् प्रातिलोम्यव्यवाये तु सर्वत्र पुरुषस्य
वध एव प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्त्तनमिति वचनात् यत्तु प्रचेतसो वचनं शूद्रस्य ब्राह्मणीं मोहाद्गच्छतः शुद्धिं इच्छतः पूर्णमेतद्व्रतं देयं माता यस्माद्धि तस्य सा-
पादहान्यान्यवर्णासु गच्छतः सार्ववर्णिकमिति द्वादशवर्षातिदेशकं तत्स्वभार्याभ्रांत्या गच्छतो वेदितव्यम् मोहादिति विशेषणोपादानात् यत्तु सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्त्तवचनम् कथंचिद्ब्राह्मणींगच्छेत्क्षत्रियोवैश्यएववा रुच्छ्रंसांतपनंवास्यात्प्रायश्चित्तंविशुद्धये शूद्रस्तुब्राह्मणींगच्छेत्कथंचित्कामसोहितः गोमूत्रयाव
कान्हारोमासैनैकेनशुद्ध्यतीति तदत्यंतव्यभिचरितब्राह्मणीविषयं अंत्यजागमनेपिप्रायश्चित्तंबृहत्संवर्त्तेनोक्तम् रजकव्याधशैलूषवेणुचर्मोपजीवि
नाम् एतास्तुब्राह्मणोगत्वाचरेच्चांद्रायणद्वयमिति इदंब्राह्मणस्यकामतःसकृद्गमनविषयम् क्षत्रियादीनांतुपादहीनंकल्प्यम् अत्रैवापस्तंबेनोक्तम्
म्लेच्छींनटींचर्मकारींरजकींबुरुडींतथा एतासुगमनंकृत्वाचरेच्चांद्रायणद्वयमिति अंत्यजाश्चैतेनैवदर्शिताः रजकश्चर्मकारश्चनटोबुरुडएवच कैव
र्त्तमेदभिल्लाश्चसप्तैतेत्यावसायिनः अंत्यजास्मृताइति येतुचांडादयोत्यावसायिनस्तत्स्त्रीगमनेनगुरुतरंप्रायश्चित्तंगुरुतल्पप्रकरणेदर्शितम् एता
सांचांत्यजस्त्रीणांमध्येयदेकस्याव्यवायेप्रायश्चित्तमभिहितंतत्सर्वासुभवति सर्वासांसदृशत्वात् तथाहोशनाः बहूनामेकधर्माणामेकस्यापियदुच्यतेस
र्वेषांतद्भवेत्कार्यमेकरूपाहितेस्मृताइति अकामतस्तुगमने चंडालमेदश्वपकपालव्रतचारिणाम् अकामतःस्त्रियोगत्वापराकव्रतमाचरेदित्यापस्तंबोक्तद्र
ष्टव्यम् यच्चसंवर्त्तवचनम् रजकव्याधशैलूषवेणुचर्मोपजीविनाम् स्त्रियोविप्रीयदागच्छेत्कृच्छ्रंचांद्रायणंचरेदिति तदप्यकामविषयम् यत्तुशा
तातपेनोक्तम् कैवर्त्तीरजकींचैववेणुचर्मोपजीविनीम् प्राजापत्यविधानेनकृच्छ्रेणैकेनशुद्ध्यतीति तद्वेतसेकात्माङ्निवृत्तिविषयम् यत्तूशनसोक्तम्
कापालिकान्नभोक्तृणांतन्नारीगामिनांतथा ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैंदवंस्मृतमिति तदभ्यासविषयम् यदातुचांडाल्यादिषुगच्छतोगर्भोभव
तितदा चांडाल्यांगर्भमारोप्यगुरुतल्पव्रतंचरेदित्युशनसोक्तंद्वादशवार्षिकंद्रष्टव्यंयत्त्वंत्यजायांप्रसूतस्यनिष्कृतिर्नविधीयते निर्वासनंकृतांकस्यतस्य
कार्यमसंशयमित्यापस्तंबवचनम् तत्कामकारविषयम् स्त्रीणामपिसवर्णानुलोमव्यवायेपुरुषस्योक्तंत्रिवार्षिकादितदेवभवति यत्पुंसः परदारेषुतच्चैनांचा
रयेद्व्रतमितिमनुस्मरणात् प्रातिलोम्येनव्यवायेएपरस्त्रीपुंसयोःप्रायश्चित्तभेदः तथाहवसिष्ठः शूद्रश्चेद्ब्राह्मणीमभिगच्छेद्वैरणेवेष्टयित्वाशूद्रमग्नौप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्येत् ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरखरमारोप्य महापथमनुसंव्राजयेत् पूताभवतीति वैश्यश्चेद्ब्राह्मणीमभिगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्य ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरखरमारोप्य महापथमनुसंव्राजयेत् पूताभवतीति राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरखरमारोप्य महापथमनुसंव्राजयेत् पूताभवतीति विज्ञाय तदिति एवं वैश्यो राजन्यां शूद्रश्च राजन्यां वैश्ययोरिति पूताभवतीति वचनाद्राजवीथि परिव्राजनमेव दण्डरूपप्रायश्चित्तांतरनिरपेक्षं शुद्धिसाधनमिति दर्शयति ब्राह्मण्याः प्रातिलोम्येन द्विजातिव्यवाये प्रायश्चित्तांतरमप्युक्तं संवर्त्तेन ब्राह्मण्यकामागच्छेच्चेत्क्षत्रियं वैश्यमेववा गोमूत्रयावकैर्मासात्तदर्थार्द्धाद्विशुद्ध्यतीति कामतस्तूक्तद्विगुणं कर्त्तव्यम् कामात्तद्विगुणं भवेदितिवचनात् षट्त्रिंशन्मतेपि ब्राह्मणीक्षत्रियवैश्यसेवायामतिकृच्छ्रं कृच्छ्रातिकृच्छ्रौ चरेत्क्षत्रिययोषितां ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रार्द्धं प्राजापत्यमतिकृच्छ्रं वैश्ययोषितां ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रपादकृच्छ्रार्द्धं प्राजापत्यं शूद्रायाः शूद्रसेवनैप्राजापत्यम् ब्राह्मणराजन्यवैश्यसेवायां त्वहोरात्रत्रिरात्रं कृच्छ्रार्द्धमिति शूद्रसेवायां तु विशेषो बृहत्पत्रेतसोक्तः विप्रा शूद्रेण संपृक्तानचेत्तस्मात्प्रसूयते प्रायश्चित्तं स्मृतं तस्याः कृच्छ्रं चांद्रायणत्रयम् एतदनिच्छंत्यांस्वपतिभ्रात्योर्वावेदितव्यम् चांद्रायणेद्वे कृच्छ्रश्च विप्रायावैश्यसेवने कृच्छ्रं चांद्रायणेस्यातां तस्याः क्षत्रियसंगमे क्षत्रियाशूद्रसंपर्के कृच्छ्रं चांद्रायणद्वयम् चांद्रायणं सकृच्छ्रं तु चरेद्वैश्येनसंगता शूद्रगत्वाचरेद्वैश्याकृच्छ्रं चांद्रायणोत्तरम् आनुलोम्येप्रकुर्वीत कृच्छ्रं पादांतरोपितमिति प्रजातायास्तूक्तचतुर्विंशतिमतेविशेषउक्तः विप्रगर्भेपराकः स्यात्क्षत्रियस्यतथैंदवम् ऐंदवश्चपराकश्च वैश्यस्याकामकारतः शूद्रगर्भेभवेत्यागश्चांडालोजायतेयतः गर्भस्त्रैवर्धातु दोषैश्चरेच्चांद्रायणत्रयमिति अकामकारतइतिविशेषणोपादानात् कामकारेणुनः पराकादिकं द्विगुणंकुर्यात् यदात्वनिःसृतगर्भेचदशममासंस्थित्वाप्रजायते तदाप्रायश्चित्ताभावः ब्राह्मणक्षत्रियविशांभार्याशूद्रेणसंगताः अप्रजाता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या॰स्मृ॰ ८९

विशुद्ध्यंतिप्रायश्चित्तेनतेतराइतिवसिष्ठस्मरणात् यदात्वाहितगर्भैवपश्चाच्छूद्रादिभिर्व्यभिचरतितदागर्भपातशंकयाप्रसवोत्तरकालमेवप्रायश्चित्तंकुर्या
त् अंतर्वत्नीतुयानारीसमेताक्रम्यकामिना प्रायश्चित्तंनकुर्यात्सायावद्गर्भोननिःसृतः जातेगर्भेव्रतंपश्चात्कुर्यान्मासंतुयावकम् नगर्भदोषस्तस्यास्ति
संस्कार्यःसयथाविधीतिस्मृत्यंतरदर्शनात् यदात्वौद्धत्यात्प्रायश्चित्तंनकुर्वंतितदानार्याःकर्णादिकर्त्तनमितिद्रष्टव्यम् अंत्यजगमनेपिस्त्रीणांस्मृत्यंतरेप्रा
यश्चित्तंदर्शितम् रजकव्याधशैलूषवेणुचर्मोपजीविनः ब्राह्मण्येतान्यदागच्छेदकामादैंदवत्रयमिति तथाचांडाल्याद्यंत्यजागमनेपितितंतथा ब्राह्मण्यका
मतोगत्वाचांद्रायणचतुष्टयमिति अकामतइतिवचनात्कामतोद्विगुणंकल्प्यम् तथा चांडालेनतुसंपर्कंयदिगच्छेत्कथंचन सशिखंवपनंकुर्याद्भुंजायाद्याव
कौदनम् त्रिरात्रमुपवासःस्यादेकरात्रंजलेवसेत् आत्मनासंमितेकूपेगोमयोदककर्दमे तत्रस्थित्वानिराहारासात्रिरात्रंततःक्षिपेत् शंखपुष्पीलतामूलं-
पत्रंवाकुसुमंफलम् क्षीरेसुवर्णसंमिश्रंक्वाथयित्वाततःपिबेत् एकभुक्तंचरेत्पश्चाद्यावत्पुष्पवतीभवेत् बहिस्तावच्चनिवसेद्यावच्चरतितद्व्रतम् प्रायश्चि
त्तेततश्चीर्णेकुर्याद्ब्राह्मणभोजनम् गोद्वयंदक्षिणांदद्याच्छुद्ध्येत्स्वायंभुवोब्रवीदिति एतदप्यकामविषयमेव यदिगच्छेत्कथंचनेतिवचनात् ऋष्य
शृंगेणाप्यंत्यजाव्यवायेप्रायश्चित्तांतरमुक्तम् संपृक्तास्यादथांत्वैर्यासाकृच्छ्राब्दंसमाचरेदिति कामतःसकृद्गमनेइदं यदात्वाहितगर्भायाएवप-
श्चाच्चांडालादिव्यवायस्तदातेनैवविशेषउक्तः अंतर्वत्नीतुयुवतिःसंपृक्ताचांत्ययोनिना प्रायश्चित्तंनसाकुर्याद्यावद्गर्भोननिःसृतः नप्रचारंगृहेकुर्या
न्नचांगेषुप्रसाधनम् नशयीतसमंभर्त्रानवाभुंजीतबांधवैः प्रायश्चित्तंगतेगर्भेविधिंकृच्छ्राब्दिकंचरेत् हिरण्यमथवाधेनुंदद्याद्विप्रायदक्षिणामिति
यदातुकामतोत्यंतसंपर्कंकरोतितदाअंत्यजेनतुसंपर्केभोजनेमैथुनेकृते प्रविशेत्संप्रदीप्तेग्नौमृत्युनासाविशुद्ध्यतीतित्युशनसोक्तंद्रष्टव्यम् यदातूक्तं
प्रायश्चित्तंनकरोतितदापुल्लिंगेनांकनीयावध्यावाभवेत् हीनवर्णोपभुक्तायासांक्यावध्याथवाभवेदितिपाराशर्यस्मरणात् इतिपारदार्यप्राय

मि॰प्रा॰ ३

८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चित्तप्रकरणम् तथापरिविन्तिप्रायश्चित्तानामपिपरिवेत्तृप्रायश्चित्तवद्व्यवस्थाविज्ञेया इयांस्तुविशेषः परिवेत्तुर्यस्मिन्विषयेकृच्छ्रातिकृच्छ्रौतत्रपरिवि
त्तेः प्राजापत्यइति परिविन्तिःकृच्छ्रंद्वादशरात्रंचरित्वापुनर्निर्विशेत्तांचैवोपयच्छेदितिवसिष्ठस्मरणात् इतिपरिविन्तिप्रकरणम् २६५ वार्धुष्यलवणक्रययो
स्तुमनुयोगीश्वरोक्तसामान्योपपातकप्रायश्चित्तानिजातिशक्तिगुणाद्यपेक्षयायोज्यानि लवणक्रयानंतरंस्त्रीशूद्रविट्क्षत्रवधइत्युपपातकमध्येपठितंतत्रप्रा
यश्चित्तांतरमप्याह एकमधिकंयस्मिन्सहस्रेतदेकसहस्रंतस्यपूरणएकसहस्रऋषभएकसहस्रोयासांगवांताः ऋषभैकसहस्रास्ताः क्षत्रवधेदद्यात् अथवा
बृहत्प्रायश्चित्तंब्रह्महत्याव्रतंवर्षत्रयंकुर्यात् वैश्यघातीपुनरेतत्ब्रह्महत्याव्रतमेकवर्षंचरेत् गवामृषभैकशतंवादद्यात् शूद्रघातीतुब्रह्महत्याव्रतंषण्मा

ऋषभैकसहस्रागादद्यात्क्षत्रवधेपुमान् ब्रह्महत्याव्रतंवापिवत्सरत्रितयंचरेत् २६६
वैश्यहाब्दंचरेदेतद्दद्याद्वैकशतंगवाम् षण्मासान्छूद्रहाप्येतद्धेनूर्दद्याद्दशाथवा २६७

संचरेत् यद्वादशधेनूरविरप्रसूताःसवत्सादद्यात् इदमकामतोजातिमात्रक्षत्रियादिवधविषयम् अकामतस्तुराजन्यंविनिपात्येतिप्रकम्यैतेषामेव
प्रायश्चित्तानामानवेभिधानात् दानतपसोश्चशक्त्यपेक्षयाव्यवस्था ईषद्वृत्तस्थयोस्तुविट्शूद्रयोस्तुरीयोब्रह्महत्यायाः क्षत्रियस्यवधेस्मृतः वै-
श्येष्टमांशोवृत्तस्थेशूद्रेज्ञेयस्तुषोडशइतिमनूक्तंद्रष्टव्यम् वृत्तस्थेक्षत्रियेतुसार्द्धंचतुर्वार्षिकंकल्प्यम् वृत्तशब्देनचात्मगुणादिकमुच्यते गुरुपूजा
घृणाशौचंसत्यमिंद्रियनिग्रहः प्रवर्त्तनंहितानांचतत्सर्ववृत्तमुच्यतइतिमनुस्मरणात् यत्तुवृद्धहारीतवचनम् ब्राह्मणः क्षत्रियंहत्वाषड्वर्षाणिव्रतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरेत् वैश्यंहत्वाचरेदेवंव्रतंत्रैवार्षिकंद्विजः शूद्रंहत्वाचरेद्वर्षंवृषभैकादशाश्वगाइति तत्कामकारविषयम् श्रोत्रियक्षत्रियादिवधेतुतुरीयोनंक्षत्रिय
स्यवधेब्रह्महणिव्रतम् अर्द्धंवैश्यवधेकुर्यात्तुरीयंवृषलस्यत्विति वृद्धहारीतोक्तंद्रष्टव्यम् यत्तुवसिष्ठवचनम् ब्राह्मणोराजन्यंहत्वाष्टौवर्षाणिव्रतंचरेत्
षड्वैश्यंत्रीणिशूद्रमिति तदपिहारीतीयेनसमानविषयम् क्षत्रियेत्विति षड्गुणन्यूनाइत्येतावान्विशेषः यदातुश्रोत्रियोवृत्तस्थश्चभवतितदापूर्वयो
र्वेदाध्यायिनंहत्वेत्यापस्तंबोक्तंद्वादशवार्षिकंद्रष्टव्यम् प्रारब्धयागेचश्रोत्रियेक्षत्रियादौव्यापादिते यागस्थक्षत्रियविड्घातीचरेद्ब्रह्महणिव्रतमिति
द्रष्टव्यम् श्रोत्रियेपुनर्यागस्थक्षत्रियादौब्राह्मणस्यराजन्यवधेप्राकृतंब्रह्मचर्यमृषभैकसहस्राश्वगादद्याद्वैश्यवधेत्रिवार्षिकमृषभैकशताश्वगादद्यात्
शूद्रवधेसांवत्सरिकमृषभैकादशाश्वगादद्यादिति गौतमोक्तोदानतपसोः समुच्चयोद्रष्टव्यः एतच्चामतिपूर्वविषयंपूर्ववदमतिपूर्वंचतुर्षुवर्णेषुप्रमा-
प्यद्वादशषट्त्रीन्वत्सरंचव्रतान्यादिशेत् तेषामंतेगोसहस्रंचततोर्द्धंतस्यार्द्धमर्धंदद्यात् सर्वेषामानुपूर्व्येणेतिशंखस्मरणात् इदंचद्वादशवार्षिकं
गौतमीयविषयमेव किंचिन्न्यूनगुणेक्षत्रियेगुणाधिकयोर्वैश्यशूद्रयोश्चद्रष्टव्यम् स्त्रीशूद्रविट्क्षत्रवधइत्युपपातकमध्येविशेषतएवपठितत्वेनो
त्सर्गापवादन्यायगोचरत्वाभावादुपपातकसामान्यप्राप्तान्यपिप्रायश्चित्तान्यत्रयोजनीयानि तत्रदुर्वृत्तक्षत्रियादौकामतोव्यापादितेमानवंत्रैमासि
कंत्रैवार्षिकंद्वैमासिकंचांद्रायणंचवर्णक्रमेणयोज्यम् अकामस्तुयोगीश्वरेणोक्तंत्रिरात्रोपवाससहितमृषभैकादशगोदानंमासंपंचगव्याशनंमासिकंचपयो
व्रतंयथाक्रमेणयोज्यम् एतच्चप्रागुक्तंव्रतजातंब्राह्मणकर्त्तृकेक्षत्रियादिवधेद्रष्टव्यम् अकामतस्तुराजन्यंविनिपात्यद्विजोत्तमः तथाब्राह्मणराजन्यवधेषड्वा
र्षिकंतथा ब्राह्मणःक्षत्रियंहत्वेत्यादिषुमनुगौतमहारीतवाक्येषुब्राह्मणग्रहणात्क्षत्रियादिकर्तृकेतुक्षत्रियादिवधेपादन्यूनंद्रष्टव्यम् विप्रेतुसकलंदेयंपादोनं
क्षत्रियेस्मृतम् वैश्येर्धर्मैकपादस्तुशूद्रजातिषुशस्यतइतिवृद्धविष्णुस्मरणात् यत्तुपर्षद्याब्राह्मणानांतुसाराज्ञांद्विगुणामता वैश्यानांत्रिगुणाप्रोक्तापर्षद्वच्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रतंस्मृतमित्यंगिरोवचनम् तत्प्रातिलोम्येनवाग्दंडपारुष्यविषयमित्युक्तंगोवधप्रकरणे मूर्धावसिक्तादीनांएवंवधेएतत्प्रायश्चित्तजातंनभवतिते षांक्षत्रियादित्वाभावात् अतोदंडानुसारेणैतद्वधेपूर्वोक्तव्रतकदंबस्यवृद्धिह्रासौदर्शितौ दंडप्रणयनंकार्यवर्णजात्युत्तराधरेइत्यत्र इतिक्षत्रियादिव धप्रकरणम् २६७ स्त्रीवधेप्रायश्चित्तमाह ब्राह्मणादिभार्यादुर्वृत्ताः स्वैरिणीः प्रमाप्यक्रमेणद्वतिंजलाधारकर्मकोशंधनुः कार्मुकंबस्तंछागमविंमेषंच विशुद्ध्येद्दद्यात् इदंचप्रातिलोम्येनांत्यजातिप्रसूतानांब्राह्मण्यादीनामकातोवधविषयम् कामतस्तुब्रह्मगर्भआह प्रातिलोमप्रसूतानांस्त्रीणामासांवधः स्मृतः अंतरप्रभवानांचसूतादीनांचतुर्द्विषडिति ब्राह्मण्यादिवधेषण्मासाः क्षत्रियायाश्चत्वारोवैश्यायाद्वावित्येवंयथार्हतयान्वयः यदातुवैश्यकर्मणा

दुर्वृत्तब्रह्मविट्क्षत्रशूद्रयोषाः प्रमाप्यतु द्वतिंधनुर्बस्तमविंक्रमाद्यद्विशुद्ध्ये २६८
अप्रदुष्टास्त्रियंहत्वाशूद्रहत्याव्रतंचरेत्

जीवंतींव्यापादयतितदाकिंचिद्देयं वैशिकेनकिंचिदितिगौतमस्मरणा त् वैशिकेनवैश्यकर्मणाजीवंत्यांव्यापादितायांकिंचिद्देयंतच्च जलकोशंचकूपेचब्राह्मण्याः प्रतिपादयेत् वधेधेनुः क्षत्रियायाबस्तोवैश्यावधेस्मृतः शूद्रायामाविकंवैश्यांहत्वादद्याज्जलंनरइत्यंगिरःस्मरणात् यदापुनःक्षत्रियादिभिः प्रातिलोम्येनव्यभिचारिताब्राह्मण्याद्याव्यापादयतितदागोवध-प्रायश्चित्तानियथार्हंयोज्यानि २६८ ईषद्व्यभिचारितब्राह्मण्यादिवधेविशेषमाह यदात्वप्रकर्षेणदुष्टामीषद्व्यभिचारिणींब्राह्मण्यादिकांव्यापादय तितदाशूद्रहत्याव्रतंषाण्मासिकंकुर्यात् यद्वादशधेनूर्दद्यात् इदंचषाण्मासिकमकामतोब्राह्मण्याव्यापादाने क्षत्रियावधेतुकामकृतेद्रष्टव्यम् काम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तौवैश्यावधेदशधेन्वूर्द्यात् कामतः शूद्रावधेतुउपपातकसाधारणप्रायश्चित्तंमासंपंचगव्याशनम् यदाकामतोब्राह्मणींव्यापादयतिनदाद्वादशमासिकम् क्षत्रियादीनांतुकामतोव्यापादनेत्रैमासिकंसार्द्धमासंसार्द्धाद्वाविंशत्यहानि यथाहूप्रचेताः अनृतुमतींब्राह्मणींहत्वाकृच्छ्राब्दंषण्मासान्वेति क्षत्रियांहत्वाषण्मासान्मासत्रयंवेति वैश्यांहत्वामासत्रयंसार्द्धमासंवेति शूद्रांहत्वासार्द्धमासंसार्द्धाद्वाविंशत्यहानिवेति यत्तुहारीतेनषड्वर्षाणिराजन्येप्राकृतंब्रह्मचर्यत्रीणिवैश्येसार्द्धंशूद्रइतिप्रतिपाद्योक्तम् क्षत्रियवत्ब्राह्मणीषुवैश्यवत्तूक्षत्रियायांशूद्रवद्वैश्यायांशूद्रांहत्वानवमासानित्युक्तम् तदपिकर्मसाधनत्वादिगुणयोगिनीनांकामतोव्यापादनेद्रष्टव्यम् अकामतस्तुसर्वत्रार्द्धकल्प्यम् आत्रेय्यांतुप्रागुक्तम् इतिस्त्रीवधप्रकरणम्

मि.प्रा.
३

अस्थिमतांसहस्रंतुतथानस्थिमतामनः २६९

हिंसाप्रायश्चित्तप्रसंगात्प्रकीर्णकपदाभिधेयानुपपातकप्राणिवधेपिप्रायश्चित्तमाह अस्थिमतांप्राणिनांकृकलासप्रभृतीनांमनूक्तनिष्कृतीनांसहस्रंहत्वाअनस्थिमतांचयूकामत्कुणदंशमशकप्रभृतीनामनःशाकटंतत्परिपूर्णमात्रंहत्वाशूद्रहत्याव्रतंषाण्मासिकंप्राकृतंब्रह्मचर्यंचरेद्दशधेनूर्वा दद्यात् सहस्रमितिपरिमाणनियमात्ततोधिकवधेत्वतिरिक्तंकल्प्यम् अर्वाक्पुनः प्रत्येकवधेतुयत्किंचित्प्रायश्चित्तंवधेतुद्देयम् प्राणायामस्त्वनस्थिकइतिवक्ष्यति तथानस्थिमताइति एतच्चक्ष्वोद्दिष्टजंतुविषयम् स्थविष्ठानस्थिगुणादिजंतुवधेतु कृमिकीटवयोहत्येत्यादिनामलिनीकरणीयान्याभिधायमलिनीकरणीयेषुतप्तःस्याद्यावकस्त्र्यहमितिमनूक्तंद्रष्टव्यम् २६९

९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच मार्जारादयप्रसिद्धाः पतत्रिणश्चाषकाकोलूकास्तान्हत्वात्रिरात्रंपयःपिबेत् पादकृच्छ्रंवाचरेत् वाशब्दाद्योजनगमनादिकंवाकुर्यात् यथाहमनुः पयःपिबेत्त्रिरात्रंवायोजनंवाध्वनोव्रजेत् अपःस्पृशेच्छ्रवत्यांवासूक्तंवाब्दैवतंजपेदिति इदंचप्रत्येकवधविषयम् समुदितवधेतु मार्जारनकुलौहत्वाचाषंमंडूकमेवच श्वगोधोलूककाकांश्चशूद्रहत्याव्रतंचरेदितिमन्वुक्तंषाण्मासिकद्रष्टव्यम् यत्पुनर्वसिष्ठेनोक्तम् श्वमार्जारनकुलमंडूकसर्पदहरमूषकान्हत्वाकृच्छ्रंद्वादशरात्रंचरेत्किंचिद्द्यादिति एतत्कामतोभ्यासविषयंवेदितव्यम् दहरोल्पमूषकश्छुच्छुंदरिर्वा २७०

मार्जारिगोधानकुलमंडूकाश्चपतत्रिणः हत्वाव्यहंपिबेत्क्षीरंकृच्छ्रंवापादिकंचरेत् २७०
गजंनीलवृषाःपंचपञ्चैकैकवत्सोद्विहायनः रासभेजमेषेषुवृषोदेयःक्रौंचेत्रिहायनः २७१
सश्येनकपिक्रव्याज्जलस्थलशिखंडिनः भासंहत्वाचदद्याद्ग्रामक्रव्यादस्तुवत्सिकाम् २७२

किंच दंतिनिव्यापादितेपंचनीलवृषादेयाः शूकेपक्षिणिद्विवर्षोवत्सः रासभच्छागेडकेषुप्रत्येकमेकोवृषः क्रौंचेपक्षिणित्रिहायनोवत्सोदेयइतिसर्वत्रानुषंगः मनुनाप्यत्रविशेषउक्तः वासोदद्याद्धयंहत्वापंचनीलान्वृषान्गजम् अजमेषावनड्वाहंखरंहत्वैकहायनमिति २७१ किंच क्रव्यंमांसंतदत्तीतिक्रव्यादः व्याघ्रस्तृगालादिमृगविशेषः वानरसाहन्वर्यात् तथाहसश्येनसमभिव्याहारात्कंकगृध्रादिपक्षिविशेषश्चगृह्यते जलशब्देनजलचरबकादयोगृह्यंते स्थलशब्देनस्थलचरबकादयः शिखंडीमयूरः भासः पक्षिविशेषः शेषाःप्रसिद्धाः एषांप्रत्येकवधेगामेकांदद्यात् अक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यादस्कहरिणादिमृगान् खंजरादिपक्षिविशेषान्हत्वावत्सतरींदद्यात् तथाचमनुः हत्वाहंसंबलाकांचबकंबर्हिणमेवच वानरंश्येनभासौचस्पर्शयेद्ब्राह्मणायगाम् क्रव्यादस्कमृगान्हत्वाधेनुंदद्यात्पयस्विनीम् अक्रव्यादेवत्सतरीमुष्ट्रंहत्वातुकृष्णालमिति २७२ किंच सरीसृपेषुव्यापादितेषुभयोमयोर्दंडस्थी क्ष्णप्रांतोदेयः पंडकेनपुंसकेव्यापादितेत्रपुसीसकंचमाषपरिमितंदद्यात् पलालभारंवा पंडकंहत्वापलालभारंत्रपुसीसकंवादद्यादितिस्मृत्यंतरदर्शनात् यद्यपिपंडकोलिंगहीनः स्यात्संस्कारार्हश्चनैवसइतिदेवलवचनेनसामान्येनैवस्त्रीपुंलिंगरहितोनिर्दिष्टस्तथापिनगोब्राह्मणस्येहविवक्षा गोब्राह्मणनिषेधस्य जात्यवच्छेदेनप्रवृत्तेः लिंगविरहिणिचपिंडेजातिसमवायविशेषात्तन्निमित्तमेवलघुप्रायश्चित्तमुक्तं तस्मान्मृगपक्षिणएवविवक्षिताः मृगपक्षिसमभि-

उरगोष्ट्रायसोदंडोपंडकेत्रपुसीसकम् कोलेघृतघटोदेयउष्ट्रेगुंजाह्वयेवृकम् २७३ ति
त्तिरौतुतिलद्रोणंगजादीनामशक्नुवन् दानंदातुंचरेत्कृच्छ्रमेकैकस्यविशुद्धये २७४

व्याहाराच्च कोलेसूकरेव्यापादितेघृतकुंभोदेयः उष्ट्रेगुंजादेया वाजिनिविनिपातितेंशुकंदेयम् तथाचमनुः अभिंकाष्ठायसींदद्यात्सर्पहत्वाद्विजोत्तमः पलालभारकंषंढेसैसकंचैवमाषकमिति २७३ किंचाह तित्तिरौपतत्रिणिव्यापादितेतिलद्रोणंदद्यात् द्रोणश्चपरिमाणविशेषवचनः अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौतुपुष्कलम् पुष्कलानितुचत्वारिआढकः परिकीर्त्तितः चतुराढकेभवेद्द्रोणइत्येतन्मानलक्षणमितिस्मरणात् पूर्वोक्तानांगजादीनांव्यापाद नेनिर्धनत्वेननीलवृषपंचकादिदानंकर्त्तुमशक्नुवन्प्रत्येकंकृच्छ्रंचरेद्विशुद्ध्यर्थं कृच्छ्रशब्दश्चात्रलक्षणयाक्लेशसाध्येतपोमात्रेद्रष्टव्यः तपांसिगौतमेनद-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्शिनानि संवत्सरः षण्मासाश्चत्वारस्त्रयोद्वावेकश्चतुर्विंशत्यहोद्वादशाहः षडहरूत्र्यहोहोरात्रइतिकलना एतेन्येवातिदेशोविकल्पेनक्रियेरन्नेनसिगुरुणि
गुरूणिलघुनिलघूनीति यदिरूच्छ्रशब्देनमुख्योर्थोगृह्यतेतर्हिगजेशृकैकवाविशेषेणप्राजापत्यएवस्यात् नचतदुक्तं तपोमात्रपरत्वेतुदानगुरुलघुभाव
कलनया तपसोपिगुरुलघुभावोयुज्यते ततश्चगजेद्विमासिकंयावकादानंशृकेतूपवासइति एवमन्यत्रापिदानानुसारेणप्रायश्चित्तकल्प्यम् २७४ किं
चाह औदुंबरादीफलेमधुकादौचकुसुमेचिरस्थितभक्षसक्तायंतेचरसेचरुडादौयानिसत्वानिप्राणिनोजायंतेतेषांघातेघृतप्राशनंशृद्धिसाधनं इ
दंचघृतप्राशनंभोजनकार्यएवविधीयते प्रायश्चित्तानांतपोरूपत्वात् प्रायश्चित्तानांतपोरूपत्वमांगिरसेनोक्तम् प्रायोनामतपः प्रोक्तंचित्तंनिश्चयउच्य

फलपुष्पांतरसजसत्वघातेघृताशनम् किंचित्सास्थिमतांदेयंप्राणायामस्त्वनस्थिके २७५

ते तपोनिश्चयसंयुक्तंप्रायश्चित्तंतदुच्यतेइति प्रतिप्राणिप्रायश्चित्तस्यानंत्यात्पृष्टाकोटेनापिवक्तुमशक्यत्वात्सामान्येनप्रायश्चित्तमाह अस्थिमतांरु
कलासादिप्राणिनांन्यूनसहस्रसंख्यानांप्रत्येकवधेकिंचित्स्वल्पंधान्यहिरण्यादिदेयम् अनस्थिकेत्वेकः प्राणायामः तत्रकिंचिदितियदाहिरण्यंदीयतेतदा
पणमात्रम् अस्थिमतांवधेपणोदेयइतिसंमंतुस्मरणात् यदातुधान्यंदेयं अष्टमुष्टिभ्यवेकिंचिदितिस्मरणात् एतच्चानुक्तनिष्कृतिप्राणिवधविषय-
म् यत्रतुप्रायश्चित्तविशेषः श्रूयतेतत्रसएवभवति यथाहपराशरः हंससारसचक्राह्वक्रौंचकुक्कुटघातकः मयूरमेषौहत्वाचएकभक्तेनशुद्धयति मु
द्गटिट्टिभंचैवशृकंपारावतंतथा आंडिकांचबकंहत्वाशुद्ध्येद्वैनक्तभोजनात् चाषकाककपोतानांसारिलित्तिरघातकः अंतर्जलेऽभ्रसंध्येप्राणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यामेनरुध्यति गृध्रश्येनविहंगानामुलूकस्यचघातकः अपकाशीदिनंतिष्ठेत्द्वौकालौमारुतादानः हत्वामुषकमार्जारसर्पाजगरडुंडुभान् प्रत्येकं भोजयेद्विप्रान्लोहदंडश्चदक्षिणा मेधाकच्छपगोधानांशशशल्यकघातकः वृंताकफलगुंजाशीअहोरात्रेणशुध्यति मृगरोहिवराहणामविकाबस्तघातने वृकजंबूकवृक्षाणांतरक्षूणांचघातकः तिलप्रस्थंत्वसौदद्याद्वायुभक्षोदिनत्रयम् गजमेषतुरंगोष्ट्रगवयानांनिपातने प्रायश्चित्तमहोरात्रमत्रि संध्यंचावगाहनम् खरवानरसिंहानांचित्रकव्याघ्रघातकः शुद्धिमेतित्रिरात्रेणब्राह्मणानांचभोजनैरिति एवमन्येषामपिस्मृतिवत्त्वसांदेशकालाद्यपेक्षयाविषयव्यवस्थाकल्पनीया इतिहिंसाप्रायश्चित्तप्रकरणम् २७५ इंधनार्थंद्रुमच्छेदइत्युपपातकोद्देशेपठितंहिंसाप्रसंगलाभेनतद्युक्तमपठित

वृक्षगुल्मलतावीरुच्छेदनेजप्यमृक्शतम् स्यादोषधिवृथाच्छेदेक्षीराशीगोनुगोदिनं२७६

मपिअपकृष्यतत्रप्रायश्चित्तमाह फलदानामाम्रपनसादीनांचवृक्षाणांगुल्मादीनांचयज्ञादीष्टार्थंविनाछेदनेऋचांगायत्र्यादीनांशतंजप्यम् ओषधीनांतुग्राम्यारण्यानांवृथैवच्छेदनेदिनंकृत्वाग्महर्गवांपरिचर्यार्थमनुगम्यांतेक्षीरंपिबेत् आहारांतरपरित्यागेन पंचयज्ञार्थत्वेतुनदोषः एतच्च फलादिद्वारेणोपयोगिषुद्रष्टव्यम् फलदानांतुवृक्षाणांच्छेदनेजप्यमृक्शतम् गुल्मवल्लीलतानांतुपुष्पितानांचवीरुधामितिस्मरणात् दृष्टार्थत्वेपिकर्षणा गभूतहलाद्यर्थत्वेननदोषः तद्दोषस्यखलयज्ञेनपरिहार्यत्वात् फलपुष्पोपभोग्यात्पादपान्नहिंस्यात्कर्षणाकरणार्थंचोपहन्यादितिवसिष्ठस्मरणात् यत्र तुस्थानविशेषाद्दंडाधिक्यंतत्रप्रायश्चित्ताधिक्यमपिकल्पनीयम् तदुक्तम् चैत्यश्मशानसीमास्रपुण्यस्थानेस्रशालये जातद्रुमाणांद्विगुणांदमोवृक्षेतुवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुतेइति अयंचक्रकृशतजपोद्विजातिविषयोनपुनः शूद्रादिविषयः तेषांजपेऽनधिकारात् अतस्तेषांदंडानुसारेणद्विरात्रादिकंकल्पनीयम् उप
पातकमध्येविशेषतः पाठस्यानर्थक्यपरिहारार्थमुपपातकसाधारणप्रायश्चित्तमप्यत्रभवति एतच्चगुरुत्वादभ्यासविषयंकल्प्यम् इतिद्रुमच्छे
दः २७६ पुंश्चलीवानरादिवधप्रायश्चित्तप्रसंगात्तद्दंशनिमित्तंप्रायश्चित्तमाह पुंश्चल्यादयः प्रसिद्धाः एतैर्दष्टः पुमान्जलेप्राणायामंकृत्वाघृत
प्राश्यविशुध्यति आदिग्रहणा च्छृगालादीनांग्रहणम् यथाहमनुः श्वश्रृगालखरैर्दष्टोग्राम्यैःक्रव्याद्भिरेवच नराश्चौष्ट्रवराहैश्चप्राणायामेन
शुद्धतीति अयंचघृतप्राशोभोजनप्रत्याम्नायोद्रष्टव्यः प्रायश्चित्तानांतपोरूपत्वेनशरीरसंतापनार्थत्वात् एतदशक्तविषयम् श्वश्रृगालमृगम

पुंश्चलीवानरखरैर्दष्टश्चोष्ट्रादिवायसैः प्राणायामंजलेकृत्वाघृतंप्राश्यविशुध्यति २७७

हिषाजाविकखरकरभनकुलमार्जारमूषिकापवककाकपुरुषदष्टानामापोहिष्टायादित्स्नानंप्राणायामत्रयंचेतिशुद्धमंतुवचनम् तन्नाभेरधःप्रदेश
ईशदृष्टविषयम् यत्संगिरोवचनम् ब्रह्मचारीशुनादृष्टस्त्र्यहंसायंपिबेत्पयः गृहस्थश्चैद्विरात्रंतुएकाहंयोग्निहोत्रवान् नाभेरूर्ध्वंतुदष्टस्यत
देवद्विगुणंभवेत् स्यादेतद्विगुणंवक्रमस्तकेचचतुर्गुणमिति तत्सम्यग्दृष्टविषयम् क्षत्रियवैश्ययोस्तुपादपादन्यूनंकल्पनीयम् शूद्रस्यतु शूद्रा
णांचोपवासेनशुद्धिर्दिनेनवोपुनः गांवादद्याद्वृषंचैकं ब्राह्मणायविशुद्ध्येइतिबृहद्गिरसोक्तंद्रष्टव्यम् यत्तुवसिष्ठवचनम् ब्राह्मणस्तुशुनादष्टोन
दीगत्वासमुद्रगाम् प्राणायामत्रयंकृत्वाघृतंप्राश्यविशुद्ध्यतीति तदुत्तमांगदंशविषयम् ब्राह्मणीतुशुनादष्टाजंबूकेनवृकेणवा उदितंग्रहनक्षत्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वामद्यःशुचिर्भवेदितिपराशरोक्तंद्रष्टव्यम् कृच्छ्रादिव्रतस्थायाःपुनस्तेनैवविशेषोदर्शितः त्रिरात्रमेवोपवसेच्छुनादष्टातुकृच्छ्रव्रता सघृतंयावकंभक्त्वाव्रतशेषंसमापयेदिति रजस्वलायामपिविशेषःपुलस्त्येनदर्शितः रजस्वलायदादष्टाकृनाजंबूकरासभैः पंचरात्रंनिराहारापंचगव्येनशुध्यति ऊर्ध्वं तुद्विगुणंनाभेर्वत्रेतुद्विगुणंतथा चतुर्गुणंस्मृतंमूर्ध्निदष्टेन्यत्रापूतिर्भवेदिति अन्यत्ररजस्वलावस्थायाः यस्तुश्वादिभिर्घ्राणादिनोपहन्यतेतस्यशातातपेनविशेषउक्तः शुनाघ्रातावलीढस्यनखैर्विलिखितस्यच अद्भिःप्रक्षालनंशौचमग्निनाचोपचूलनमिति उपचूलनंतापनमिति यदाश्वादिदंशशस्त्रघातादिजनितव्रणेरुधिरमयउत्सद्यतेतदामनुनाविशेषउक्तः ब्राह्मणस्यव्रणद्वारेपूयशोणितसंभवे कृमिरुत्सद्यतेयस्यप्रायश्चित्तंकथंभवेत् गवां

यन्मेतरेतइत्याभ्यांस्कन्नंरेतोभिमंत्रयेत् स्तनांतरंभ्रुवोर्मध्येतेनानामिकयास्पृशेत् २७८

मूत्रपुरीषेणत्रिसंध्यंस्नानमाचरेत् त्रिरात्रंपंचगव्याशीत्वधोनाभ्याविशुद्ध्यति नाभिकंगंतरोद्भूतेव्रणेचोत्सद्यतेकृमिः षड्रात्रंतुत्र्यहंपंचगव्याशनमिति स्मृतम् तत्रश्वादिदंशव्रणेतद्दंशप्रायश्चित्तानंतरमिदंकर्तव्यम् शस्त्रादिजनितव्रणेएतदेवत्र्यहंपंचगव्याशनादिकमितिविशेषः क्षत्रियादिषुतुप्रतिवर्णपादपादह्रासःकल्पनीयः २७७ शरीरत्वग्धातुच्छेदकदंशप्रायश्चित्तप्रसंगाच्छरीरचरमधातुविच्छेदकस्कंदनेप्रायश्चित्तमाह यदिकथंचित्स्त्रीसंभोगगमनमंतरेणापिहठाच्चरमधातुर्विसृष्टस्तदातत्स्कन्नंरेतस्तन्मेद्यरेतः पृथिवीं० अस्कांपुनर्मामौर्त्विंद्रियमित्याभ्यांमंत्राभ्यामभिमंत्रयेत् तेनचाभिमंत्रितेनरेतसास्तनयोर्भ्रुवोश्चमध्यमुपकनिष्ठिकयास्पृशेत् अन्येतुस्कन्नरेतसोशुचित्वेनस्पर्शकर्मण्ययोग्यत्वात्तेनत्वनामिकासाहचर्याद्बुद्धिस्थागु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ठपरत्वेनव्याचक्षते तेनांगुष्ठेनानामिकयाचेति अंगुष्ठपदग्रहणेवृत्तभंगप्रसंगात्तेनेतिनिर्दिष्टमिति तदसत् अंगुष्ठस्याबुद्धिस्थत्वात् नचशब्द सन्निहितपरित्यागेनार्थाबुद्धिस्थस्यान्वयोयुक्तः तदुक्तं गम्यमानस्यचार्थस्यनैवदृष्टंविशेषणम् शब्दांतरैर्विभक्त्याचाधूमोयंज्वलतीतिवदिति नच रेतसोशुक्लिलेनस्पर्शायोग्यत्वम् विधानादेवप्रायश्चित्तार्थरूपस्पर्शयोग्यत्वमवगम्यताम् प्रायश्चित्तरूपपानद्वयस्कराया: इदंप्रायश्चित्तंगृहस्थस्यै वाकामत: स्कन्नविषयम् ब्रह्मचारिण: स्वप्नेजागरणावस्थायांचगुरुप्रायश्चित्तस्यदर्शनात् यत्तुमनुवचनम् गृहस्थ: कामत: कुर्याद्रेतस: स्कंदनंशु वि सहस्नंतुजपेद्व्या: प्राणायामैस्त्रिभि:सहेति तत्कामकारविषयम् २७८ किंच स्वीयंप्रतिबिंबमंबुगतंचेत्दृष्टंतदामयितंजइंद्रियमितिमंत्रे

मयितेजइतिच्छायांस्वांदृष्वांबुगतांजपेत् सावित्रीमशुचौदृष्टेचापल्येचानृतेपिच २७९

जपेत् अशुचिद्रव्यदर्शनेपुन: सावित्रींसवितृदेवतांतत्सवितुरित्यादिकामृचंजपेत् तथावाक्पाणिपादादिचापल्यकरणेतामेवजपेत् अनृतवचनेन एतत्कामकारेद्रष्टव्यम् अकामकृतेतु स्कृत्वाभुक्त्वाचक्षुत्वाचनिष्ठीव्याप्यनृतानिच पीत्वापोध्येयमानस्यआचमेत्प्रयतोपिसन्निति मनूक्तमाचमने द्रष्टव्यम् यत्तुसंवर्त्तवचनम् क्षुतेनिष्ठीवनेचैवदंतश्लिष्टेतथानृते पतितानांचसंवादेदक्षिणंश्रवणंस्पृशेत् तदल्पप्रयोजनेजलाभावेवाद्रष्टव्यम् स्त्रीशूद्रविट्क्षत्रवधानंतरंनिंदितार्थोपजीवनंपठितम् तत्रचमनुयोगीश्वरप्रोक्तान्युपपातकप्रायश्चित्तानिजातिशक्तिगुणाद्यपेक्षयावेदितव्यानि नास्तिक्येपितानिप्रायश्चित्तानितथैवप्रयोज्यानि नास्तिकशब्देनचवेदनिंदातेनजीवनमुच्यते अत्रोभयत्रापियसिष्ठेनप्रायश्चित्तांतरमप्युक्तम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नास्तिकः कृच्छ्रं द्वादशरात्रंचरित्वाविरमेन्नास्तिक्यान्नास्तिकवृत्तिस्त्वतिकृच्छ्रमिति एतच्चसकृत्करणविषयं उपपातकप्रायश्चित्तान्यभ्यासविषयाणि यच्चशंखेनोक्तं नास्तिकोनास्तिकवृत्तिः कृतघ्नः कूटव्यवहारीमिथ्याभिशंसीइत्येतेपंचसंवत्सरं ब्राह्मणगृहेभ्यैक्ष्यंचरेयुरिति यच्चहारीतेननास्तिकोनास्तिकवृत्तिरितिप्रक्रम्य पंचतापोभ्रावकाशजलशयनान्यनुतिष्ठेयुरितिग्रीष्मवर्षाहेमंतेष्विति तदुभयमप्यत्यंताभिनिवेशेनबहुकालाभ्यासविषयम् २७९ नास्तिक्यानंतरंव्रतलोपश्चेत्युक्तं तत्रावकीर्णित्वस्याप्रसिद्धत्वात्तल्लक्षणकथनपूर्वकं प्रायश्चित्तमाह ब्रह्मचार्युपकुर्वाणकः नैष्ठिकश्चासौयोषितंगत्वावकीर्णीभवति चरमधातोर्विसर्गोवकीर्णंतद्यस्यास्तीतिसोवकीर्णीसनिर्ऋतिदेवत्यंनगर्दभपशुनायागंकृत्वाविशुद्ध्यति गर्दभस्य

अवकीर्णीभवेद्गत्वाब्रह्मचारीतुयोषितम् गर्दभंपशुमालभ्यनैर्ऋतंसविशुद्ध्यति २८०

पशुत्वेसिद्धेपिपुनः पशुग्रहणमथपशुकल्पइत्याश्वलायनादिगृह्योक्तपशुधर्मप्राप्त्यर्थं एतच्चारण्येचतुष्पथेलौकिकाग्नौकार्यम् ब्रह्मचारिन्वेत्स्त्रियमुपेयादरण्येचतुष्पथेलौकिकेग्नौरक्षोदैवतंगर्दभंपशुमालभेतेतिवसिष्ठस्मरणात् तथारात्रावेकाक्षिविकलेनयष्टव्यम् तथाचमनुः अवकीर्णितुकालेनरासभेनचतुष्पथे पाकयज्ञविधानेनयजेतनिर्ऋतिंनिशीति पशोरभावेचरुणायष्टव्यम् निर्ऋतिंवाचरुंनिर्वपेत् तस्यजुहुयात् कामायस्वाहा कामकामायस्वाहा निर्ऋत्यैस्वाहा रक्षोदेवताभ्यःस्वाहेतिवसिष्ठस्मरणात् एतच्चाशक्तविषयम् शक्तस्यपुनर्गर्दभेनावकीर्णीनिर्ऋतिंचतुष्पथेजेन् तस्याजिनमूर्ध्ववालंपरिधायलोहितपात्रेसप्तगृहान्भैक्ष्यंचरेत्कर्मोचक्षाणः संवत्सरेणशुध्यतीतिगौतमोक्तोवार्षिकतपःसमुचितः पशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यागश्चरुर्वाद्रष्टव्यः तथात्रिषवणस्नानमेककालभोजनंचद्रष्टव्यम् एतस्मिन्नेनसिप्राप्तेवसित्वागर्दभाजिनम् सप्तागारान्चरन्भैक्ष्यंस्वकर्म परिकीर्त्तयन् तेभ्योलब्धेनभैक्ष्येणवर्त्तयन्नेककालिकम् उपस्पृशंत्रिषवणमब्देनसविशुध्यतीतिमनुस्मरणात् इदंचवार्षिकमश्रोत्रियब्राह्मणपत्न्यांवैश्यायांचश्रोत्रियपत्न्यांद्रष्टव्यम् यदातुगुणवत्योर्ब्राह्मणीक्षत्रिययोः श्रोत्रियभार्ययोरेवकरोतितदात्रिवार्षिकंद्विवार्षिकंचक्रमेणद्रष्टव्यम् यथाहतुः शंखलिखितौ गुप्तायांवैश्यायामवकीर्णः संवत्सरंत्रिषवणमनुतिष्ठेत् क्षत्रियायांद्वेवर्षे ब्राह्मण्यांत्रीणिवर्षाणीति यत्त्वंगिरोवचनम् अवकीर्णीनिमित्तंतुब्रह्महत्याव्रतंचरेत् चीरवासास्कृषण्मासांस्तथामुच्येतकिल्बिषादिति तदकामतोमानवादिविषयमीषद्व्यभिचारिणीविषयंवा अत्यंतव्यभिचारासुपुनः स्वैरिण्यांवृषल्यामवकीर्णः सचैलस्नानमुदकुंभंदद्याद्वाब्राह्मणाय वैश्यायांचतुर्थकालाहारोब्राह्मणान्भोजयेत् यवसभारंचगोभ्योदद्यात् क्षत्रियायांत्रिरात्रमुपोषितोघृतपात्रंदद्यात् ब्राह्मण्यांषड्रात्रमुपोषितोगांचदद्यात् गोष्ववकीर्णः प्राजापत्यंचरेत् षंढायामवकीर्णः पलालभारंसीसमाषकंचदद्यादितिशंखलिखितोदितंवेदितव्यम् एतच्चावकीर्णिप्रायश्चित्तंत्रैवर्णिकस्यापिब्रह्मचारिणः समानम् अवकीर्णिद्विजोराजावैश्यश्चापिस्वरेणतु इच्छाभैक्ष्याशिनोनित्यंशुध्यंत्यब्दात्समाहिताइतिशांडिल्यस्मरणात् यदास्त्रीसंभोगमंतरेणकामतश्चरमधातुंविसृजतिदिवाचस्वप्नेवाविसृजतितदानैर्ऋतयागमात्रंद्रष्टव्यम् एतदेवरेतसःप्रयत्नोत्सर्गेदिवास्वप्नेचेतिवसिष्ठेनयागमात्रस्यातिदिष्टत्वात् व्रतांतरेषुचकृच्छ्रचांद्रायणादिषिति अतिदिष्टब्रह्मचर्येषुचस्कंदनेसत्येतदेवयागमात्रं व्रतांतरेषुचैवमितितेनैवातिदिष्टत्वात् स्वप्नस्कंदनेतुमनूक्तं द्रष्टव्यम् स्वप्नेसिक्काब्रह्मचारीद्विजः शक्रमकामतः स्नात्वार्कमर्चयित्वात्रिःपुनर्मामित्यृचंजपेदिति वानप्रस्थादीनांचेदमेवब्रह्मचर्यखंडनेअवकीर्णिव्रतंकृच्छ्रत्रयाधिकंभवति वानप्रस्थोयतिश्चैवस्कंदनेसतिकामतः पराकत्रयसंयुक्तमवकीर्णिव्रतंचरेदितिशांडिल्यस्मरणात् यदागार्हस्थ्यपरित्यहेणसंन्यासात्समुच्यतोभवति तदासं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्त्तोक्तंद्रष्टव्यम् संन्यस्यदुर्मतिः कश्चित्प्रत्यापत्तिंचरेद्यदि सकुर्यात्कृच्छ्रमश्वांतः षण्मासात्प्रत्यनंतरमिति प्रत्यापत्तिर्गार्हस्थ्यपरिग्रहः अतएववसिष्ठः यस्तुप्रव्रजितोभूत्वापुनःसेवेतमैथुनम् षष्टिवर्षसहस्राणिविष्ठायांजायतेकृमिरिति तथाचपराशरः यःप्रत्यवसितोविप्रोप्रव्रज्यातोविनिर्गतः अनाशकोनिवृत्तश्चगार्हस्थ्यंचेच्चिकीर्षति सचरेत्त्रीणिकृच्छ्राणित्रीणिचांद्रायणानिच जातकर्मादिभिःसर्वैःसंस्कृतःशूद्रिमाप्नुयात् तत्रब्राह्मणस्यषाण्मासिकः कृच्छ्रः पुनःसंन्यासः क्षत्रियस्यचांद्रायणत्रयम् वैश्यस्यकृच्छ्रत्रयमितिव्यवस्था अथवाब्राह्मणस्यैवशक्तिसकृदभ्यासाद्यपेक्षयाव्यवस्थितंप्रायश्चित्तत्रयंद्रष्टव्यम् तथामरणसंन्यासिनामपियमेनापिप्रायश्चित्तमुक्तम् जलाग्न्युद्बंधनभ्रष्टाः प्रव्रज्यानाशकच्युताः विषप्रपतनप्रायः शस्त्रघातच्युताश्चये नैवैतेप्रत्यवसिताः सर्वलोकबहिष्कृताः चांद्रायणेनशुद्ध्यंति तप्तकृच्छ्रद्वयेनचेति इदंचांद्रायणंतप्तकृच्छ्रद्वयात्मकंप्रायश्चित्तद्वयंशक्त्याद्यपेक्षयाव्यवस्थितंविज्ञेयं यदातुशस्त्रघातहताश्चेतिपाठः तदात्मयागाद्यशास्त्रीयमरणनिमित्तस्तत्सुत्रादेरुपदेशोद्रष्टव्यः यत्पुनर्वसिष्ठेनोक्तं जीवन्नात्मत्यागीकृच्छ्रंद्वादशरात्रंचरेत्त्रिरात्रंचोपवसेदिति तदप्यध्यवसिताशास्त्रीयमरणस्यैवकथंचिज्जीवनशक्त्यपेक्षयाद्रष्टव्यं अथवाध्यवसायमात्रेत्रिरात्रं शस्त्रादिक्षतस्यद्वादशरात्रमितिव्यवस्था इदंचावकीर्णिप्रायश्चित्तंगुरुदारतत्समव्यतिरिक्तागम्यागमनविषयम् तत्रगुरुतरप्रायश्चित्तस्यदर्शितत्वात् नचलघुनावकीर्णिव्रतेनद्वादशवार्षिकाद्यपनोद्यममहापातकदोषनिर्हरणमुचितम् नचब्रह्मचारित्वोपाधिकंलघुप्रायश्चित्तविधानमुक्तम् आश्रमांतराणांद्वैगुण्यादिवृद्ध्याब्रह्महत्याप्रकरणेदर्शितत्वात् नचागम्यागमनप्रायश्चित्तंपृथक्कर्त्तव्यम् ब्रह्मचारिणोयोषितिब्रह्मचर्यस्खलनस्यागम्यागमनेनांतरीयकत्वात् अतोन्यत्रापियस्मिन्निमित्तेयन्निमित्तांतरंसमन्यूनंवावश्यंभावितन्मपृथक् नैमित्तिकंप्रयुक्तं यथा अवगूर्यचरेत्कृच्छ्रमतिकृच्छ्रं निपातने कृच्छ्रातिकृच्छ्रोस्रुक्पातेकृच्छ्रोभ्यंतरशोणितेइत्यत्रशोणितोत्सादननिमित्तेवगूरणनिमित्तपातलक्षणंनिमित्तद्वयमवश्यंप्रायश्चित्तेनैमित्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंरुच्छ्रमतिरुच्छ्रंचनप्रयुक्तम् अतएवमन्यत्राप्यूहनीयम् यत्रपुनर्नैमित्तानामंतर्भावनियमोनास्तितत्रपुनर्नैमित्तिकानिपृथक्प्रयुज्यंतेनिमित्तानि यदापर्वणिपरभार्यारजस्वलातैलाभ्यक्तोदिवाजलेगच्छतीति ननुब्रह्मचारिणोयोषितिब्रह्मचर्यस्खलनस्यागम्यागमनांतरीयकत्वेनास्त्येव पुत्रिकागमनेऽगम्यागमनदोषाभावात् तथाहि नतावत्पुत्रिकाकन्याक्षतयोनित्वात् नापिपरभार्याप्रदानाभावात् नापिवैश्या अनट्टत्तित्वात् नापिविधवाभर्तृमरणाभावात् अतःपुत्रिकायाःक्वाप्यनंतर्भावादमतिषिद्धनेतितत्रैवविप्लुतस्यकेवलमविकीर्णिव्रतम् अन्यविप्लुतस्यतुनिमित्तांतरसन्निपातादवकीर्णिव्रतंनैमित्तिकांतरमपिप्रयोक्तव्यमिति तदसत् पुत्रिकायाअपिपरभार्यात्वेनांतर्भावात् प्रदानाभावेपिविवाहसंस्कारेणसंस्कृतत्वात् गांधर्वादिपरिणीता

भैक्ष्याग्निकार्येत्यत्कातुसप्तरात्रमनातुरः कामावकीर्णइत्योभ्यांजुहुयादाहुतिद्वयम् २८१

वत् नचयस्यास्कनभवेद्व्रतानविज्ञायेतवापिता नोपयच्छेनतांप्राज्ञः पुत्रिकाधर्मशंकयेतिप्रतिषेधात्सगोत्रास्त्रिवभार्यात्वंनोपपद्यतइतिवाच्यम् दृष्टार्थत्वात्प्रतिषेधस्यव्यंग्यांग्यादिप्रतिषेधवत् दृष्टार्थत्वंचपुत्रिकाधर्मशंकयेतिहेतूपादानात् नचपुत्रार्थमेवपरिणयनम् अपितुधर्मार्थमपि अतश्चोत्पादितपुत्रस्यमृतभार्यस्यधर्मार्थपुत्रिकापरिणयनेकोविरोधः प्रपंचितंचैतत्पुरस्तादित्यलमतिप्रसंगेनतस्माद्ब्रह्मचारिणोयोषितिब्रह्मचर्यस्खलनस्यागम्यागमनानंतरीकतान्नपृथङ्नैमित्तिकंप्रयोक्तव्यमितिसुष्टूक्तम् २८० ब्रह्मचारिप्रायश्चित्तप्रसंगादन्यदप्युपपातकप्रायश्चित्तमाह यस्त्वनातुरएवब्रह्मचारीनिरंतरंसप्तरात्रंभैक्ष्यमग्निकार्यंवात्यजति असौकामावकीर्णोस्मिकामकामायस्वाहा कामावप्तोस्म्यवप्तोस्मिकामकामायस्वाहाइ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वेताभ्यांमंत्राभ्यामाहुतीर्हुत्वा समासिंचतुमरुतः समिंद्रः संबृहस्पतिः संमायमग्निः सिंचंतांयशसाब्रह्मवर्चसेनेत्यनेनमंत्रेणाग्निमुपतिष्ठेत् एवंचगुरु
रुपरिचर्यादिगुरुतरकार्यव्यग्रतया अकरणेद्रष्टव्यम् यदात्वव्ययएवभैक्ष्याग्निकार्यं त्यजतितदाअकृत्वाभैक्ष्यचरणमसमिध्यचपावकं अनातुरः सप्तरा
त्रमवकीर्णिव्रतंचरेदितिमानवंद्रष्टव्यम् यज्ञोपवीतादिनाशेतुहारीतेनप्रायश्चित्तमुक्तम् मनोव्रतपतीभिश्चतिस्रआज्याहुतीर्हुत्वापुनर्यथार्थप्रतीयादस
कृत असद्वैक्ष्यभोजनेष्युदितेभिनिर्मुक्तेवांतेदिवास्वप्नेनग्नस्त्रीदर्शनेनग्नस्वापेश्मशानमाक्रम्यहयादीनारुह्यपूज्यातिक्रमेचताभिरेवजुहुयादग्निसमिं
धनेस्थावरसरीसृपादीनांवधेयद्वेगादेवहेडनमितिकुश्मांडीभिस्त्रिरात्रमाज्यंजुहुयात् मणिवासोगवादीनांप्रतिग्रहेसावित्र्यष्टसहस्रंजपेदिति मनोव्रतपतीभि

उपस्थानंततः कुर्यात्समासिंचत्वनेनतु मधुमांसाशनेकार्यः कृच्छ्रः स्त्रीषव्रतानिच २८२
प्रतिकूलंगुरोः कृत्वाप्रसाद्यैववशुध्यति कृच्छ्रत्रयंगुरुः कार्यःक्रियतेप्रहितोयदि २८३

रितिमनोज्योतिरित्यादि मनोलिंगाभिस्त्वमग्नेव्रतपाअसीत्यादिव्रतलिंगाभिरित्यर्थः यथार्थंप्रतीयादितिउपनयनोक्तमार्गेणसमंत्रकंगृण्हीयादित्यर्थः
यज्ञोपवीतंविनाभोजनादिकरणेतु ब्रह्मसूत्रंविनाभुंक्तेविण्मूत्रंकुरुतेथवा गायत्र्यष्टसहस्रेणप्राणायामेनशुद्ध्यतीतिमरीच्युक्तंद्रष्टव्यम् किंच ब्रह्मचारिणा
अमत्यामधुमांसभक्षणेः कृच्छ्रः कार्यः तदनंतरमवशिष्टानिव्रतानिसमापयेत् एतच्चशिष्टभोजनार्हशशादिमांसभक्षणविषयम् ब्रह्मचारीचेन्मांसमश्नीया
च्छिष्टभोजनीयंकृच्छ्रंद्वादशरात्रंचरित्वाव्रतशेषंसमापयेदितिवसिष्ठस्मरणात् द्वादशरात्रग्रहणंतुमनिपूर्वाभ्यासापेक्षयातिकृच्छ्रपराकादेरपिप्राप्त्यर्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा तु मांसैकायनो घव्याध्यभिभूतस्तदा मांसं गुरोरुच्छिष्टं कृत्वाभक्षणीयम् सचेद्व्याधीयीत कामं गुरुरो रुच्छिष्टं भेषजार्थं सर्वप्राश्नीयादिति तेनैवोक्तत्वात् सर्वग्रहणं मांसलशुनाद्यभक्ष्यमात्रसंग्रहणार्थम् तद्भक्षणेन चापगतव्याधिरादित्यमुपतिष्ठेत तथा चबौधायनः येनेच्छेच्चिकित्सितुं सयदा गदोभवति तदोत्थायादित्यमुपतिष्ठेत हंसः शुचिषदिति मधुनोप्यज्ञानतः प्राशनोपपत्तौ नदोषः अकामोपनतं मधु वाजसनेयकेनदुष्यतीति वसिष्ठस्मरणात् अन्यत्र सूतकान्नादिभक्षणप्रायश्चित्तं त्वभक्ष्यप्रायश्चित्तप्रकरणेवक्ष्यामः आज्ञाप्रतिघातादिना गुरोः प्रतिकूलमाचरन् पादप्रणिपातादिना गुरुं प्रसाद्यविशुध्यति ब्रह्मचारिप्रायश्चित्तप्रसंगाद्गुरोरपिप्रायश्चित्तमाह यस्तु गुरुश्चोरोरोगव्याघ्रादिभयाकुलप्रदेशेसांद्रतरांधकाराकुलितनिशी

क्रियमाणोपकारेतु मृतेविप्रेनपातकम् मिथ्याभिशंसिनोद्वेषाद्विः समाभूतवादिनः २८४

थावसरे कार्यार्थं शिष्यं प्रेरयति सचतथाप्रेरितोदैवान्मृतस्तदा सगुरुः कृच्छ्रादीनां प्राजापत्यादीनांत्रयंकुर्यात् नपुनरूत्रयः प्राजापत्याः तथासतिपृथङ्निवेशिनीसंख्यानुपपन्नास्यात् नचैकादशप्रयाजान्यजतीतिवदावृत्त्यपेक्षासंख्येतिचतुरस्रम् स्वरूपपृथक्त्वेसंभवत्यावृत्यपेक्षायाअन्याय्यत्वात् यदीयमुत्पन्नगतासंख्यास्यात्तदास्यादपिकथंचिदावृत्त्यपेक्षाकिंतूत्पत्तिगतेयम् अतस्तिस्रआहुतीर्जुहोतीतिवत्स्वरूपपृथक्त्वापेक्षयैवत्रित्वसंख्याघटनायुक्ता २८१ २८२ २८३ सकलहिंसाप्रायश्चित्तापवादमाह आयुर्वेदोपदेशानुसारेणौषधपथ्यान्नप्रदानादिभिश्चिकित्सकादिनाक्रियमाणउपकारोयस्यब्राह्मणादेस्तस्मिन्कथंचिन्मृतेपिपातकंनैवभवति विप्रग्रहणंप्राणिमात्रोपलक्षणार्थम् अतएवयंत्रणेगोचिकित्सार्थेगूढ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गर्भविमोचने यत्नेकृतेविपत्तिःस्यान्नसपापेनलिप्यतइत्यादिसंवर्त्ताद्यैरुक्तम् एतच्चप्रपंचितंप्राक्मिथ्याभिसर्गप्रायश्चित्तप्रसंगाद्विवक्षयायाव
दुपयोगार्थवादंतावदाह यस्तुपरोत्कर्षेर्ष्याजनितरोषकलुषितांतःकरणोजनसमक्षंमिथ्याभिशापंब्रह्महत्यादिकमनेनकृतमितिआरोपयतितस्य
तदेवद्विगुणंभवतियस्तुविद्यमानमेवदोषमलोकविदितंजनसमक्षंप्रकाशयतितस्यतत्सातकिंसमदोषभाक्स्यात् तथापस्तंबः दोषंबुध्यानपूर्वःपरे
भ्यःपतितस्यसमाख्यातास्यात् परिहरेच्चैनंधर्मेषिति नकेवलमिथ्याभिशंसीद्विगुणदोषभाक् अपितुमिथ्याभिशस्तस्यदन्यदुष्कृतजातंतदपिस
मादत्तइतिवक्ष्यमाणप्रायश्चित्तेयेअर्थवादाः नपुनःपापद्वैगुण्यादिप्रतिपादनमात्रंविवक्षितं निमित्तस्यलघुप्रायश्चित्तस्योपलक्ष्यमाणत्वात् रु

मिथ्याभिशस्तदोषंचसमादत्तेमृषावदन् महापापोपपापाभ्यांयो
भिशंसेन्मृषापरम् अब्भक्षोमासमासीतसजापीनियतेंद्रियः २८५

तनाशाकृताभ्यागमप्रसंगाच्च तत्रप्रायश्चित्तमाह यस्तुमहापापेनब्रह्महत्यादिनागोवधाद्युपपापेनवामृषैवपरमभिशंसतिसमासंयावज्जलाश्
नोजपशीलोजितेंद्रियश्चभवेत् जपश्चशतृद्वीवतीभिःकार्यः ब्राह्मणमनृतेनाभिशंस्यपतनीयेनोपपातकेनवामासमब्भक्षः रुद्रवतीभिरावर्त्तये
दश्वमेधावभृथंवागच्छेदितिवसिष्ठस्मरणात् महापापोपग्रहणमन्येषामप्यतिपातकादीनामुपलक्षणम् एतच्चब्राह्मणस्यैवब्राह्मणेनाभिशंसनेकृ
तेद्रष्टव्यम् यदातुब्राह्मणःक्षत्रियादेरभिशंसनंकरोतिक्षत्रियादिर्वाब्राह्मणस्यतदाप्रतिलोमापवादेषुद्विगुणस्त्रिगुणोदमः वर्णानामानुलोम्येन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादर्धार्धहानितइतिदंडानुसारेणवृद्धिह्रासौकल्पनीयौ भूताभिशंसिनस्तूक्तपूर्वोक्तार्थवादानुसारेणचतदर्धकल्पनीयं तथानिपातकशंसिनएवैतदेवव्रतं पादोनम् पातकाभिशंसिनस्त्वर्धम् उपपातकाभिशंसिनस्तुपादः तुरीयोब्रह्महत्यायाः क्षत्रियस्यवधेस्मृतइत्युपपातकभूतक्षत्रियादिवधेमहापातकप्रायश्चित्ततुरीयांशस्यदर्शनात् एवंप्रकीर्णाभिशंसिनोपिततोन्यूनंकल्पनीयम् शक्तिंचावेक्ष्यपापंचप्रायश्चित्तंप्रकल्पयेदितिस्मरणात् यत्तुदारवलिखितास्त्या नास्तिकः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नोमिथ्याभिशंसीचेत्येतेषड्वर्षाणिब्राह्मणगृहेषुभैक्ष्यंचरेयुः संवत्सरंधौतभैक्ष्यमश्नीयुः षण्मासान्वागाअनुग च्छेयुरितिगुरुप्रायश्चित्तमुक्तंतदभ्यासतारतम्यापेक्षयायोजनीयम् २८४ २८५ अभिशंसिप्रायश्चित्तप्रसंगादभिशस्तप्रायश्चित्तमाह यःपुन

अभिशस्तोमृषाकृच्छ्रंचरेदाग्नेयमेवच निर्वपेत्तुपुरोडाशंवायव्यंपञ्चकपालंवा २८६

र्मिथ्याभिशस्तःसकृच्छ्रंप्राजापत्यंचरेत् अग्नेर्दैवत्येनवापुरोडाशेनयजेत् वायुर्दैवत्येनवापशुना एषांचपक्षाणाशक्तिसंभवाद्यपेक्षयाव्यवस्था य त्तुवसिष्ठेनमासमब्भक्षणमुक्तमेतेनैवाभिशस्तोव्याख्यातइति तदभिशस्तस्यैवकिंचिल्लाघवकृतप्रायश्चित्तस्यसतोद्रष्टव्यम् संवत्सराभिशस्तस्यदु ष्टस्यद्विगुणोदमइतिदंडानिरेकदर्शनात् यत्तुपैठीनसिनोक्तं अनृतेनाभिशंसन्यमानःकृच्छ्रंचरेन्मासंपातकेषु महापातकेषुद्विमासमिति तदपिवा सिष्ठेनसमानविषयंवा शक्तिविषयंवा एवमन्येषामप्युच्चावचप्रायश्चित्तानामभिशस्तविषयाणांकालशक्त्याद्यपेक्षयाव्यवस्थाविज्ञेया यथाहमनुः ष ष्ठान्नकालतामासंसंहिताजपएववा होमाश्चशाकलानित्यमपंक्त्यानांविशोधनमिति अपंक्त्यानांमध्येअभिशस्तादयः पठिताः यद्यप्यत्राभिशस्तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निषिद्धाचरणंनोपलभ्यतेतथापिमिथ्याभिशस्तत्वलिंगानुमितप्राग्भवीयनिषिद्धाचरणपूर्वनिबंधनमिदंप्रायश्चित्तंकृमिदुष्टानामिवेतिनविरोधः २८६ किंच यस्तुनियोगंविनाभ्रातुर्ज्येष्ठस्यकनिष्ठस्यवाभार्यांगच्छतिसचांद्रायणंचरेत् एतच्चसकृदमतिपूर्वविषयंद्रष्टव्यम् यत्तुशंखवचनम् परिवित्तिःपरिवेत्ता चसंवत्सरंब्राह्मणगृहेषुभैक्ष्यंचरेयातांज्येष्ठभार्यामनियुक्तोगच्छंस्तदेवकनिष्ठभार्यांचेति तत्कामकारविषयम् २८७ किंचाह यःपुनरुदक्यारजस्वलांस्वभार्यामपिगच्छतिसत्रिरात्रमुपोष्यांतेघृतंप्राश्यविशुद्ध्यति इदमकामतःसकृद्गमनविषयंतत्रैवाभ्यासेरजस्वलागमनेसप्तरात्रमितिशातातपेनोक्तंद्रष्टव्यम् कामतःसकृद्गमनेप्येतदेव यत्तुबृहत्संवर्त्तेनोक्तम् रजस्वलांतुयोगच्छेद्ब्राह्मणींपतितांतथा तस्यपापविशुद्ध्यर्थमतिकृच्छ्रंविशोधन

मि. प्रा. ३

अनियुक्तोभ्रातृजायांगच्छंचांद्रायणंचरेत् २८७ त्रिरात्रांतेघृतंप्राश्यगत्वोदक्यांविशुद्ध्यति २८८

मिति तत्कामतोभ्यासविषयम् यत्पुनःशंखेनत्रिवार्षिकमुक्तम् पादस्तुशूद्रहत्यायासुदक्यागमनेतथेति तत्कामतोत्यंतानवच्छिन्नाभ्यासविषयम् रजस्वलायांतुरजस्वलादिस्पर्शेप्रायश्चित्तंस्मृत्यंतरोक्तद्रष्टव्यम् तथाचबृहद्वसिष्ठः स्पृष्टेरजस्वलेन्योन्यंसगोत्रेतेकभर्तृके कामादकामतोवापिसद्यःस्नानेनशुध्यतीति असपत्न्योस्कसवर्णयोरकामतःस्नानमात्रम् उदक्यातुसवर्णायास्पृष्टाचेत्स्यादुदक्यया तस्मिन्नेवाहनिस्नात्वाशुद्धिमाप्नोत्यसंशयमितिमार्कंडेयस्मरणात् यत्तुकश्यपवचनम् रजस्वलातुसंस्पृष्टाब्राह्मण्याब्राह्मणीयदि एकरात्रंनिराहारापंचगव्येनशुध्यतीतितत्कामकारविषयम् असवर्णस्पर्शेतुबृहद्वसिष्ठेनविशेषादर्शितः स्पृष्ट्वारजस्वलान्योन्यंब्राह्मणीशूद्रजाअपि कृच्छ्रेणशुध्यतेपूर्वाशूद्रीदानेनशुध्यति दानेनेतिपादकृ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छ प्रत्याम्नायभूतनिष्कचतुर्थांशदानेनशत्ध्यतीति स्पृष्टारजस्वलान्योन्यंब्राह्मणीवैश्यजापिच पादहीनंचरेत्पूर्वापादकृच्छ्रंतथोत्तरा स्पृष्टारजस्वलान्यो न्यंब्राह्मणीक्षत्रियातथा कृच्छ्रार्धाच्छुध्यतेपूर्वातूत्तराचतदर्धतः स्पृष्टारजस्वलान्योन्यंक्षत्रियाशूद्रजाअपि उपवासैस्त्रिभिः पूर्वात्महोरात्रेणचोत्त रा स्पृष्टारजस्वलान्योन्यंक्षत्रियावैश्यजापिच त्रिरात्राच्छुध्यतेपूर्वात्महोरात्रेणचोत्तरा स्पृष्टारजस्वलान्योन्यंवैश्यशूद्रीतथैवच त्रिरात्राच्छुध्यतेपूर्वातूत्त रात्दिनद्वयात् वर्णानांकामतःस्पर्शेच्छुद्धिरेषापुरातनीति अकामतस्तुबृहद्विष्णुनोक्तस्नानमात्रं रजस्वलातुहीनवर्णीरजस्वलांस्पृष्ट्वानतावद्भीयाद्यावन्नशु द्धास्यात् सवर्णामधिकवर्णांवास्पृष्ट्वासद्यःस्नात्वाशुद्ध्यतीति चांडालादिस्पर्शेतुबृहद्वसिष्ठेनविशेषउक्तः पतितांत्यश्वपाकेनसंस्पृष्टाचेद्रजस्वला ता न्यहानित्यतिक्रम्यप्रायश्चित्तंसमाचरेत् प्रथमेह्नित्रिरात्रंस्यात्द्वितीयेद्यहमेवतु अहोरात्रंतृतीयेह्निपरतोनक्तमाचरेत् शूद्रयोच्छिष्टयास्पृष्टाशु नाचेत् द्यहमाचरेदिति तान्यहानिव्यतिक्रम्यअनाशकेननीत्वेतियावत् एतत्कामतःस्पर्शविषयम् अकामतस्तुरजस्वलातुसंस्पृष्टाचांडालात्यश्व- वायसैः तावतिष्ठेन्निराहारायावत्कालेनशुद्ध्यतीतिबोधायनोक्तंद्रष्टव्यम् यत्पुनस्तेनैवोक्तम् रजस्वलातुसंस्पृष्टाग्रामकुक्कुटसूकरैः श्वभिःस्नात्वाक्षिपेन्ना वद्यावच्चंद्रस्यदर्शनमिति तदशक्तविषयम्॥ यदातुभुंजानायाः श्वादिस्पर्शनंभवतितदास्मृत्यंतरेविशेषउक्तः रजस्वलातुभुंजानाश्वांत्यजादीन्स्पृशे द्यदि गोमूत्रयावकाहाराषड्रात्रेणैवशुद्ध्यति अशक्तौकांचनंदद्याद्विप्रेभ्योवापिभोजनमिति यदातूच्छिष्टयोः परस्परंस्पर्शनंभवतितदा उच्छिष्टो च्छिष्टयास्पृष्टाकदाचित्स्त्रीरजस्वला कृच्छ्रेणशुद्ध्यतेपूर्वाशूद्रादानैरुपोषितेत्यत्रिणोक्तंद्रष्टव्यम् यदातूच्छिष्टान्द्विजान्रजस्वलास्पृशतितदा द्विजान्कथंचिदुच्छिष्टान्रजःस्त्रीयदिसंस्पृशेत् अधोच्छिष्टेत्यहोरात्रमूर्ध्वोच्छिष्टेत्र्यहंक्षिपेदितिमार्कंडेयोक्तंद्रष्टव्यम् एवमवकीर्णिप्रायश्चित्तप्र संगात्कानिचिदनुपपातकभूतप्रायश्चित्तान्युपव्याख्यायप्रकृतमनुसरामः तत्रावकीर्ण्यनंतरंकृतानांचैवविक्रयइत्युक्तम् तत्रमनुयोगीश्वरोक्तानित्रैमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिक्तादीनि कामाकामजातिशक्त्याद्यपेक्षयापूर्ववद्व्यवस्थापनीयानि यत्तुशंखवचनम् देवयज्ञप्रतिश्रयोद्यानारामसभाप्रपातडागपुण्यसेतुस्कृतविक्रयंकृत्वा तप्तकृच्छ्रंचरेदिति यच्चपराशरेणोक्तम् विक्रीयकन्यकांगांचकृच्छ्रंसांतपनंचरेदिति तदुभयमप्यापद्यकामतोद्रष्टव्यम् कामतस्तु नारीणांविक्रयंकृत्वाचरेच्चांद्रायणव्रतम् द्विगुणंपुरुषस्यैवव्रतमाहुर्मनीषिणइतिचतुर्विंशतिमतोक्तंद्रष्टव्यम् यत्तुपैठीनसिनोक्तम् आरामतडागोदपानपुष्करिणीस्कृतस्कृतविक्रयेत्रिषवणस्नाय्यधःशायीचतुर्थकालाहारःसंवत्सरेणपूतोभवति तदेकपुत्रविषयम् तदनंतरंधान्यकुप्यपशुस्तेयमित्युक्तं तत्प्रायश्चित्तानिचस्तेयप्रकरणेप्रपंचितानि २८८ अनंतरमयाज्यानांचयाजनमित्युक्तं तत्रप्रायश्चित्तमाह यस्तुसावित्रीपतितान्

त्रीन्कृच्छ्रानाचरेद्व्रात्ययाजकोभिचरन्नपि वेदप्लावीयवान्यब्दंत्यक्त्वाचशरणागतम्२८९

तानंयाजनंकरोतिसप्राजापत्यप्रभृतीन्त्रीन्कृच्छ्रानाचरेत् तेषांचगुरुलघुभूतानांकृच्छ्रानाचरेत् तेषांचगुरुलघुभूतानांकृच्छ्राणांत्रित्वं निमित्तगुरुलघुभावेनकल्पनीयम् तथाअभिचरन्नपिप्रायश्चित्तंकुर्यात् एतच्चाभिदाद्यातताय्यतिरेकेण षट्स्वभिचरन्पततीतिवसिष्ठस्मरणात् अपिशब्दोहीनयाजकांत्येष्टियाजकयोःसंग्रहणार्थः अतएवोक्तंमेत्तुना व्रात्यानांयाजनंकृत्वापरेषामंत्यकर्मच अभिचारमहीनंचत्रिभिःकृच्छ्रैर्व्यपोहतीति परेषामंत्यकर्मेत्यत्यंताभ्यासविषयम् शूद्रांत्यकर्मविषयंवाप्रायश्चित्तस्यगुरुत्वात् अहीनोद्विरात्रादिर्द्वादशाहपर्यंतोहर्गणयागः यत्तुशातातपेनोक्तम् पतितसावित्रीकान्नोपनयेत् नाध्यापयेत् यएतानुपनाययेदध्यापयेद्याजयेद्वासउद्दालकव्रतंचरेदितिकामकारविषयम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्दालकव्रतंचप्राक्प्रदर्शितम् एतच्चकृच्छ्रत्रयसाधारणोपपातकप्रायश्चित्तस्यापवादकम् अतउपपातकसाधारणप्रायश्चित्तंशूद्रायायाज्ययायाजनेव्यवतिष्ठते तत्रकामतस्त्र्यैमासिकम् अकामतस्कृयोगीश्वरोक्तंमासव्रतादि यत्तुप्रचेतसाशूद्रयाजकादीन्पठित्वोक्तम् एतेपंचतपोव्रायकाशाजलशायनान्यनुतिष्ठेयुः क्रमेणग्रीष्मवर्षाहेमंतेषुमासंगोमूत्रयावकमश्नीयुरितितत्कामतोभ्यासविषयम् यच्चयमेनोक्तम् पुरोधाः शूद्रवर्णस्यब्राह्मणोयःप्रवर्त्तते स्नेहादर्थप्रसंगाद्वातस्यकृच्छ्रोविशोधनमिति तदशक्तविषयम् यच्चपैठीनसिनोक्तं शूद्रयाजकःसर्वद्रव्यपरित्यागात्पूतोभवति प्राणायामसहस्रेषुदशकृत्वोभ्यासेवेदितव्यम् तदप्यकामतोभ्यासविषयम् यत्तुगौतमेनोक्तम् निषिद्धमंत्रप्रयोगेसहस्रंवाकश्चेदितिनिषिद्धानांपतितादीनांयाजनाध्यापनात्मकेमंत्रप्रयोगेबहुशोभ्यस्तेप्राकृतंब्रह्मचर्यमुपदिष्टम् तत्कामतोभ्यासविषयम् यस्कवेदंविप्लावयतियश्चरक्षणक्षमोपितस्करव्यतिरिक्तंशरणागतमुपेक्षतेसोपिसंवत्सरंयवोदनंभुंजानःशुद्ध्यति तत्रविप्लवोनामपर्वतचांडालश्रोत्रावकाशाद्यनध्यायेष्वध्ययनम् उत्कर्षहेतोरधीयानस्यकिंपठसिनाशितंत्वयेत्येवंपर्यनुयोदानंवाविप्लावनमुच्यते अतएवोक्तंस्मृत्यंतरे दत्वानुयोगानध्येतुःपतितान्मनुरब्रवीदिति यत्तुवसिष्ठेनोक्तम् पतितचांडालशावश्रवणेत्रिरात्रंवाग्यताअनश्नंतआसीरन्सहस्रपरमंवातदभ्यस्यतः पूतोभवतीतिविज्ञायतइति एतेनैवगर्हिताध्यापकयाजकाव्याख्यातादक्षिणात्यागाच्चपूतोभवतीतिविज्ञायतइतितद्बुद्धिपूर्वविषयम् यत्तुषट्त्रिंशन्मतेभिहितम् चांडालश्रोत्रावकाशेश्रुतिस्मृतिपाठेएकरात्रमभोजनमितितबुद्धिपूर्वविषयम् यदासर्पोंतरागमनमात्रंभवतिनपुनस्तत्राधीतेतदापिप्रायश्चित्तंयमेनोक्तम् सर्पस्यनकुलस्याथअजमार्जारयोस्तथा मूषकस्यतथोष्ट्रस्यमंडूकस्यचयोषितः पुरुषस्यैककस्यापिशुनोश्वस्यखरस्यच अंतरागमनेसद्यःप्रायश्चित्तमिदंशृणु त्रिरात्रमुपवासश्चत्रिरन्हश्चाभिषेचनम् ग्रामांतरंवागंतव्यंजानुष्यानात्रसंशयइति पित्तृमातृस्वसृतत्यागतडागारामविक्रये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षुमनुयोगीश्वरोक्तोपपातकसाधारणप्रायश्चित्तानिपूर्ववज्जातिशक्तिगुणाद्यपेक्षयायोज्यानि तत्रपितृमात्रादित्यागस्य अकारणेपरित्यक्तामा
तापित्रोर्गुरोस्त्यत्यपांक्तेयमध्यपाठात्तन्निमित्तमपिप्रायश्चित्तंभवति यथाहमनुः षष्ठान्नकालतामासंसंहिताजपएववा होमाश्वशाकलानि
त्यमपांक्तानांविशोधनमिति अपांक्तांश्चश्राद्धकांडेयेस्तेनपतितक्लीबाइत्यादिवाक्यैर्दर्शिताः नडागारामविक्रयेषुचकतिचिद्विशेषप्रायश्चि
त्तानिसविषयाणिस्मृतविक्रयप्रायश्चित्तकथनावसरेकथितानि अनंतरकन्यायादूषणमित्युक्तम् तत्रचत्रैमासिकद्वैमासिकचांद्रायणादीनिसव-
र्णाविषयेयोज्यानि आनुलोम्येपुनर्मासिकंपयोशनंप्राजापत्यंवा सकामास्त्वनुलोमास्तनदोषस्त्वन्यथादमइतिदंडाल्पत्वदर्शनात् यत्तुशंखेनो
क्तम् कन्यादोषीसोमविक्रयीचकृच्छ्रमब्दंचरेयातामिति यच्चहारीतवचनम् कन्याविक्रयीसोमविक्रयीवृषलीपतिकौमारदारत्यागः सुरामद्यपः
शूद्रयाजकोगुरोः प्रतिहंतानास्तिकवृत्तिः कृतघ्नः कूटव्यवहारीमित्रध्रुक्शरणागतघाती प्रतिरूपकवृत्तिरित्येतेपंचतपोभ्यावकाशजलशयनान्यनुतिष्ठेयुर्ग्री-
ष्मवर्षाहेमंतेषुमासंगोमूत्रयावकमश्नीयुरितितदुभयमपिक्षत्रियवैश्ययोःप्रातिलोम्येनदूषणेयोज्यंशूद्रस्यतुवधएव दूषणेतुकरच्छेदउत्तमायांवधस्त
थेतिवधदर्शनात् परविंदकस्ययाजनकन्याप्रदानयोः कौटिल्यअशिष्टाप्रतिषिद्धव्रतलोपेआत्मार्थपातकक्रियारंभेमद्यपस्त्रीनिषेवणेचसाधारणो
पपातकप्रायश्चित्तंप्राग्व्यवस्थापनीयम् आद्ययोरुक्तविशेषप्रायश्चित्तानिपरिवेदनायाज्ययाजनप्रायश्चित्तकथनप्रस्तावेदर्शितानि अनंतरंस्वा-
ध्यायत्यागइत्युक्तंतत्रव्यसनासक्त्यात्यागेअधीतस्यचनाशनमितिब्रह्महत्यासमंप्रायश्चित्तमुक्तम् शास्त्रश्रवणव्याकुलतयात्यागेतुत्रैमासिकाद्युपपातकप्रा
यश्चित्तानिशक्त्याद्यपेक्षयायोज्यानि यत्तुवसिष्ठेनोक्तं ब्रह्मोज्झतःकृच्छंद्वादशरात्रंचरित्वापुनरुपयुंजीतवेदमाचार्यादितितदत्यंतापद्विषयम् अग्नि
त्यागेपितेनैवविशेषोदर्शितः योग्नीनपविध्येत्सकृच्छ्रंद्वादशरात्रंचरित्वापुनस्तधेयंकारयेदितिद्वादशरात्रग्रहणमुत्तमकालापेक्षयाप्राजापत्यादिगुरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लघुकृच्छ्राणांप्राप्त्यर्थं तत्रमासद्वयेप्राजापत्यंमासत्रचतुष्टयेतिकृच्छ्रः षण्मासोच्छन्नेपराकः षण्मासादूर्ध्वंयोगीश्वरोक्तान्युपपातकसामान्य
प्रायश्चित्तानि कालाद्यपेक्षयायोज्यानि संवत्सरादूर्ध्वंतुमानवंत्रैमासिकमितिव्यवस्थाएतच्चनास्तिक्येनत्यागविषयं तथाव्याघ्रः योग्निंत्यज
तिनास्तिक्यात्प्राजापत्यंचरेत्द्विजइति यदातुप्रमादात्त्यजतितदाप्रारद्वाजगृह्येविशेषउक्तः प्राणायामशतमात्रिरात्रादुपवासः स्यादाविंशति
रात्रात् अतऊर्ध्वमाषष्टिरात्रात्तिस्रोरात्रीरुपवसेदतऊर्ध्वंमासंवत्सरात्प्राजापत्यंचरेत् अतऊर्ध्वंकालबहुत्वेदोषगुरुत्वमिति यदालालस्यादि
नात्यजतितूदापितेनैवविशेषउक्तः द्वादशाहात्क्रमेत्र्यहमुपवासोमासात्क्रमेद्वादशाहमुपवासः संवत्सरात्क्रमेमासोपवासःपयोभक्षणंचेति
संवत्सरादूर्ध्वंतुहारीतेनविशेषउक्तः संवत्सरोत्सन्नेग्निहोत्रेचांद्रायणंकृत्वापुनरादध्यात् द्विवर्षोच्छन्नेचांद्रायणंसोमायनंचकुर्यात् त्रिवर्षोच्छन्नेसं
वत्सरंकृच्छ्रमभ्यस्यपुनरादध्यादिति सोमायनंचकृच्छ्रकांडेवक्ष्यते शंखेनापिविशेषउक्तः अभ्युत्सादीसंवत्सरंप्राजापत्यंचरेद्वात्रदध्या
दिति स्वतत्यागेबंधुत्यागेचत्रैमासिकंगोवधव्रतंकामतोकामतस्तुयोगीश्वरोक्तव्रतचतुष्टयंशक्त्याद्यपेक्षयायोज्यम् द्रुमच्छेदेप्रायश्चित्त
प्रायुक्तम् स्त्रीप्राणिवधवशीकरणादिष्वजीर्णेतिलेक्षुयंत्रप्रवर्त्तनेचतान्येवप्रायश्चित्तानितथैवयोज्यानि व्यसनेषुचद्यूतमृगयादिष्वेतान्ये
वप्रायश्चित्तानितथैवयोज्यानि यत्तुबोधायनेन अथाऽरुचिकारीणिद्यूतमभिचारोनाहिताग्नेरुच्छवृत्तिः समावृत्तस्यभैक्ष्यचर्यातस्यचगु
रुकुलेवासऊर्ध्वंचतुर्थ्योमासेभ्योयश्चतमध्यापयतिनक्षत्रनिर्देशनंचेतिद्वादशमासान्द्वादशार्द्धमासान्द्वादशाहान्द्वादशषडहान्द्वादशत्र्यहांश्च-
त्र्यहमेकाहमित्यरुचिकरनिर्देशइतिद्युतेवार्षिकव्रतमुक्तंतदभ्यासविषयम् यत्तुप्रचेतसोक्तम् अनृतवाक्तस्करोराजभृत्योवृक्षारोपकवृत्ति
र्गरदोग्निदोश्वरथगजारोहणवृत्तिःरंगोपजीवीश्वगणिकः शूद्रोपाध्यायोवृषलीपतिर्भंडिकोनक्षत्रोपजीवीश्ववृत्तिर्ब्रह्मजीवीचिकित्सकोदेवलकः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरोहितः कितवोमद्यपः कूटकारकोपत्यविक्रयीमत्स्यघ्नपशुविक्रेतानेति नात्युद्धरेत्समेत्यन्यायतोब्राह्मणव्यवस्थयासर्वद्रव्यत्यागेचतुर्थकालाहारःसंवत्सरंत्रिषवणमुपस्पृशेयुः तस्यांतेदेवपितृतर्पणंगवान्हिकंचेत्येवंव्यवहार्याइतितदपिबोधायनेनसमानविषयम् श्वगणिकादयःश्वगणेनजीवतिभांडिकोबंदिव्यतिरिक्तोराज्ञांतूर्यादिस्वनैः प्रतिबोधयिताबंदिनःपृथगुपादानात् श्ववृत्तिः सेवकः ब्रह्मजीवीब्राह्मणकार्येषुमूल्येनपरिचारकः मनूक्तेष्वपांक्तेप्रायश्चित्तानिषष्ठान्नकालतामासमित्यादीनिजात्याद्यपेक्षयायोज्यानि तदुक्तापांक्त्यमध्येकितवादिव्यसनिनांपठित्वात् आत्मविक्रयेवृद्रसेवायाचसामान्यप्रायश्चित्तानि प्राग्वदेवयोज्यानि यत्तुबोधायनेनोक्तम् समुद्रयानंब्राह्मणस्यन्यासापहरणंसर्वापण्येव्यवहरणंभूम्यवृत्तंशूद्रसेवायुश्चशूद्रायामभिजायतेतदपत्यंचभवतिनेषातुनिर्देशः चतुर्थकालंमितभोजनाःस्युरपोभ्युपेयुः सवनानुकल्पम् स्थानासनाभ्यांविहरणंतैस्त्रिभिर्वर्षैस्तदपघ्नंनिपापमितिनद्बहुकालसेवाविषयम् हीनजातिभिःसव्येतुउपपातकसामान्यप्रायश्चित्तान्येव यत्तुप्रचेतसोक्तम् मित्रभेदकरणादहोरात्रमनश्नन्नहुत्वापयःपिबेदिति तदहीनसव्यभेदविषयम् हीनयोनिनिषेवणेप्युपपातकसामान्यप्रायश्चित्तानियोज्यानि यत्तुशातातपेनोक्तम् ब्राह्मणोराजन्यापूर्वकृच्छ्रंद्वादशरात्रंचरित्वानिविशेत्तांचोपयच्छेद्वैश्यापूर्वीतप्तकृच्छ्रं शूद्रापूर्वीतुकृच्छ्रतिकृच्छ्रंराजन्यश्चेद्वैश्यापूर्वकृच्छ्रंद्वादशरात्रंचरित्वानिविशेत्तांचोपयच्छेदितिशूद्रापूर्वीत्वतिकृच्छ्रंवैश्यश्चेच्छूद्रापूर्वकृच्छ्रंद्वादशरात्रंचरित्वातांचोपयच्छेदितितत्रनिविशेत्तांचोपयच्छेदितिकृच्छ्रानुष्ठानोत्तरकालंसवर्णापरिणयनादूर्ध्वंतांचराजन्यादिकामुपयच्छेदित्यर्थः इदंचाज्ञानविषयम् ज्ञानतस्त्वुपपातकसामान्यप्रायश्चित्तंव्यवस्थितमेवद्रष्टव्यम् साधारणस्त्रीसंभोगेचहीनयोनिनिषेवणंइत्युक्तम् तत्रापिपशुवैश्याभिगमनेप्राजापत्यंविधीयतइतिसंवर्त्तोक्तमकामतोद्रष्टव्यम् वैश्यागमनजंपापंव्यपोहंतिद्विजातयः पीत्वासकृत्सकृत्तप्तंससप्तरात्रंकुशोदकमिति उपपातकसामान्यप्रायश्चित्तानिकामाकामतोभ्यासापेक्षयायोज्यानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रमभ्यासेतुप्रतिनिमित्तंनैमित्तिकमावर्त्तत इतिन्यायात् प्रतिनिमित्तंनैमित्तिकावृत्तौप्रसक्तायांलौगाक्षिणांविशेषउक्तः अभ्यासेहर्गुणावृद्धिर्मासादर्वाक्विधीयते ततोमासगुणावृद्धिर्यावत्संवत्सरंभवेत् ततःसंवत्सरगुणायावत्सापंसमाचरेदिति इदमतिपूर्वविषयम् अमतिपूर्ववृत्तौचतुर्विंशतिमतेविशेषउक्तः सकृत्कृतेतुयत्प्रोक्तंत्रिगुणंतद्भिभिर्दिनैः मासात्संचगुणंप्रोक्तंषण्मासाद्दशधाभवेत् संवत्सरात्संचदशन्यस्याद्विंशगुणंभवेत् ततोप्येवप्रकल्प्यंस्यात्शातातपवचोयथेति यत्सुनर्विधेःप्राथमिकादस्मात्द्वितीयेद्विगुणंचरेदितिप्रतिनिमित्तमावृत्तिविधायकंतन्महापातकविषयमित्युक्तंप्राक् यत्तुयमेनसाधारणस्त्रीगमनमधिकृत्यगुरुतल्पव्रतमितिदिष्टम् गुरुतल्पव्रतंकेचित्केचित्चांद्रायणव्रतम् गोघ्नस्येच्छंतिकेचिच्चकेचिदे

गोष्ठेवसन्ब्रह्मचारीमासमेकंपयोव्रतः गायत्रीजाप्यनिरतः शुध्यतेसप्रतिग्रहात् २९०

वावकीर्णिनइति एतच्चजन्मप्रभृतिसात्मुबंधानवच्छिन्नाभ्यासविषयम् अनंतरंतथैवानाश्रमेवासइत्युक्तंतत्रहारीतेनविशेषउक्तः अनाश्रमीसंवत्सरंप्राजापत्यंकृच्छ्रंचरित्वाश्रममुपेयात् द्वितीयेतिकृच्छ्रंतृतीयेकृच्छ्रातिअतऊर्ध्वंचांद्रायणमिति एतदसंभवविषयम् संभवेतुसामान्योपपातकप्रायश्चित्तानिकामाकामतोव्यवस्थापनीयानिपरपाकरुचित्वात्सच्छास्त्राधिगमनाकाराधिकारभार्याविक्रयेषुचमन्वादयोगोश्चवधप्रतिपादितोपपातकसामान्यप्रायश्चित्तानिजातिशक्तिगुणापेक्षयाव्यवस्थापनीयानि २८९ भार्याभार्याविक्रयश्चैषामित्यत्रचशब्दोमन्वाद्युक्तासकृत्प्रतिग्रहनिंदितान्नादीनामुपलक्षणार्थमित्युक्तम् तत्रासत्प्रतिग्रहेप्रायश्चित्तविशेषमाह यस्त्वसत्प्रतिग्रहंकरोतिब्रह्मचर्ययुक्तोगोष्ठेवसन् गायत्रीजपशीलोमासंपयोव्रते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नश्यत्यतीतिप्रतिग्रहस्य चासत्त्वंदातुर्जातिकर्मनिबंधनंयथाचांडालादेःपतितादेश्चतथादेशकालनिबंधनंच यथाकुरुक्षेत्रोपरागादौनथाप्र
तिग्राह्यद्रव्यनिबंधनंच यथाक्रमेषीमृतशय्योभयतोमुरव्यादेः यदातुपतितादेर्मेष्यादिकंगृण्हातितदेदंगुरुप्रायश्चित्तंद्रष्टव्यम् व्यतिक्रमेद्
यदर्थानेननिमित्तस्यगुरुत्वात् तत्रजपेमनुःनासंख्याविशेषउक्तः जपित्वात्रीणिसावित्र्यासहस्राणिसमाहितः मासंगोष्ठेपयःपीत्वा मुच्यतेसप्र
तिग्रहादितिप्रत्यहंत्रिसहस्रंजपोद्रष्टव्यः मासमितिद्वितीययात्रिसहस्रसंख्याकस्यजपस्यप्रतिदिवसव्यापित्वावगमात् यदातुन्यायवर्त्तिब्राह्म
णादेः सकाशान्निषिद्धं मेषादिकंगृण्हातिपतितादेर्वाभूम्यादिकमनिषिद्धंतदाषट्त्रिंशन्मतोक्तंद्रष्टव्यम् पवित्रेष्वाविशुध्यंतिसर्वेघोराःप्रतिग्रहाः
ऐंदवेन मृगारेक्ष्याकदाचिन्मित्रनिंदया देव्यालक्षजपेनैवशुध्यंतेदुष्प्रतिग्रहात् यत्तुबृहद्धारीतवचनम् राज्ञःप्रतिग्रहंकृत्वामासमेकंसदावसेत्
षष्ठेकालेपयोभक्षः पूर्णेमासेविशुद्ध्यति तर्पयित्वाद्विजान्कामैः सततंनियतव्रतइति तत्पूर्वोक्तविषयाभ्यासद्रष्टव्यम् अथवापतितादेःकुरुक्षेत्रोपरागा
दौकृष्णाजिनादिप्रतिग्रहविषयम् तथाप्रतिग्राह्यद्रव्याल्पतयाप्रायश्चित्तालल्पत्वम् यथाहहारीतः मणिवासोगवादीनां प्रतिग्रहणेसावित्र्यष्टसहस्रं
जपेदिति तथाषट्त्रिंशन्मतेपि भिक्षामात्रेगृहीतेतिपुण्यमंत्रमुदीरयेत् प्रतिग्रहेषुसर्वेषुषष्ठमंशंप्रकल्पयेत् इतीदंप्रायश्चित्तजातंद्रव्यत्यागोत्तरका
लंद्रष्टव्यम् यद्गर्हितेनार्ज्जयंतिब्राह्मणाकर्मणाधनं तस्योत्सर्गेणशुध्यंतिजपेनतपसैवचेतिमनुस्मरणात् एवमन्यान्यपिस्मृतिवाक्यानिद्रव्य
सारात्स्वल्पमहत्त्वाभ्यांविषयेषुव्यवस्थापनीयानि इत्युपपातकानि जात्याश्रयादिदोषेणनिंद्यानादेनशब्दतः योगींद्रोक्तव्रतव्रातंसांप्रतंतुप्रतन्यते
तत्रजातिदुष्टंपलांडुादिभक्षणेकामतः सकृल्लुतेपलांडुविड्वराहंचेत्यादिनाचांद्रायणमुक्तम् कामतोभ्यासेतुनिषिद्धभक्षणेजेह्यादिनोक्तंसुरापा
नसमप्रायश्चित्तम् अकामतःसकृद्भक्षणेसांतपनम् तत्रैवाभ्यासेयतिचांद्रायणम् अमत्यैतानिषड्जग्ध्वाकृच्छ्रंसांतपनंचरेत् यतिचांद्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यणंवापिशेषेषूपवसेदहरितिमनुस्मरणात् यत्तुबृहद्यमेनोक्तम् रक्तवार्त्ताककुंभीकव्रश्चनप्रभवाणिच भूतृणंशिग्रुकंचैवसूरवंडकवचानिच एतेषांभक्षणंकृत्वाप्राजापत्यंचरेत्द्विजः इतितत्कामतोपूर्वाभ्यासविषयम् मत्स्यांश्चकामतोजग्ध्वासोपवासस्त्र्यहंक्षिपेदितियोगीश्वरेणकामतः सकृद्भक्षणेत्र्यहस्योक्तत्वात् रक्तवारव्यः पक्षी कुसुंभमित्यन्ये कवचंकृष्णसर्षपारव्यंशाकम् सूरवंडंतद्विशेषोगोबलीवर्दन्यायेन निर्दिष्टः यत्तुयमेनोक्तं तंदुलीयककुंभीकव्रश्चनप्रभवांस्तथा नालिकांनालिकेरींचश्लेष्मातकफलानिच भूतृणंशिग्रुकंचैवरक्तवारव्यंकवचंतथा एतेषांभक्षणंकृत्वाप्राजापत्यंव्रतंचरेदिति तदपिमतिपूर्वाभ्यासविषयम् नालिकानालिकेरीचशाकविशेषौ रक्तवारव्यश्च अकामतः सकृद्भक्षणेतुशेषेषूपवसेदहरितिमनूक्तंद्रष्टव्यम् तत्रैवाभ्यासेत्वावृत्तिः कल्प्या अनंताभ्यासेतु संसर्गदुष्टंयच्चान्नंक्रियादुष्टमकामतः भुक्त्वास्वभावदुष्टंच तप्तकृच्छ्रंसमाचरेदितिप्रचेतोभिहितंद्रष्टव्यम् नील्यास्त्वकामतःसकृद्भक्षणेचांद्रायणं भक्षयेद्यदिनीलींतुप्रमादाद्ब्राह्मणःक्वचित् चांद्रायणेनशुद्धिः स्यादापस्तंबोब्रवीन्मुनिरितिआपस्तंबस्मरणात् कामतोभ्यासेचावृत्तिःकल्प्या यदपिषट्त्रिंशन्मतेभिहितम् शणपुष्पंशाल्मलंचकरनिर्मथितंदधि बर्हिर्वेदिपुरोडाशंजग्ध्वानाद्यादहर्निशमितितदप्यकामविषयम् यत्तुशंतुनोक्तम् लशूनपलांडुगृंजनकवकभक्षणेसाविंशष्टसहस्रेणमूर्ध्निसंपानान्नयेदितितद्बलात्कारेणानिच्छतोभक्षणविषयम् तदेकेसाध्यव्याध्युपशमार्थेवाभक्षणेद्रष्टव्यम् अतएवानंतरंतेनैवोक्तम् एतान्येवव्याधितस्यभिषक्क्रियामप्रतिषिद्धानिभवंति यानिचैवप्रकाराणितेष्वपिनदोषइति संतापान्नयेदुदकबिंदूनुपातयेत् अथजातिदुष्टसंधिन्यादिक्षीरपानेप्रायश्चित्तम् तत्रचाकामतःसकृत्पाने अनिर्दशायागोः क्षीरमौष्ट्रमेकशफंतथा आविकंसंधिनीक्षीरंविवत्सायाश्चगोःपयः आरण्यानांचसर्वेषांमृगाणांमहिषींविना स्त्रीक्षीरंचैववर्ज्यानिसर्वशुक्लानिचैवहीति दधिभक्ष्यंचशुक्लेषुसर्वंचदधिसंभवमित्युक्त्वाशेषेषूपवसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दहरितिमनूक्तउपवासोद्रष्टव्यः कामतस्तुयोगीश्वरोक्तस्त्रिरात्रोपवासोद्रष्टव्यः यत्तुपैठीनसिनोक्तम् अविरवरोष्ट्रमानुषीक्षीरप्राशनेतप्तकृच्छ्रः पुनरुपनयनंच अनिर्दशाहगोमहिषीक्षीरप्राशनेषड्रात्रमभोजनम् सर्वासांद्विखुरनीनांक्षीरपानेप्यजावर्जमेतदेवेति यच्चशंखेन क्षीराणियान्यभक्ष्याणितद्विकारान्नेबुधः सप्तरात्रंव्रतंकुर्यात्प्रयत्नेनसमाहितइतियावकव्रतमुक्तं तदुभयमपिकामतोभ्यासविषयम् यत्तुशंखेनसंधिन्यमेध्यभक्षणेक्षीरप्राशनेपक्षव्रतमुक्तम् संधिन्यमेध्यभक्षायाभुक्त्वापक्षव्रतंचरेदितितदभ्यासविषयम् सरुत्सानेगोअजमहिषीवर्जसर्वाणिपयांसिप्राश्यउपवसेत् अनिर्दशाहंतान्यपिसंधिनीयमसूस्यंदिनीविवत्साक्षीरंचामेध्यभुजश्चेतिविष्णुनोपवासस्योक्तत्वात् तथावर्णिनिबंधनश्चप्रतिषेधः क्षत्रियश्चापिवृत्तस्थोवैश्यः शूद्रोयवापुनः यःपिबेत्कपिलाक्षीरंननतोन्योस्त्यपुण्यकृदिति एवमादौचयत्रप्रतिपदोक्तंप्रायश्चित्तंनदृश्यते तत्रशेषेषूपवसेदहरितिसाधारणप्रायश्चित्तंमनूक्तंद्रष्टव्यम् अथस्वभावदुष्टमांसादिभक्षणेप्रायश्चित्तमुक्तम् तत्रकामतःसरुद्भक्षणेशेषेषूपवसेदहरितिमनूक्तंसाधारणप्रायश्चित्तंद्रष्टव्यम् कामतस्तु चाषाश्चरक्तपादांश्चसौनंचलुरमेवच मत्स्यांश्चकामतोजग्ध्वासोपवासत्रयंवसेदितियोगीश्वरोक्तंद्रष्टव्यम् कामतोभ्यासेतु जग्ध्वामांसमभक्ष्यंतुसप्तरात्रंपयःपिबेदितिमनूक्तंद्रष्टव्यम् इदंविट्सूकरादिमांसव्यतिरिक्तविषयम् क्रव्याद्विट्सूकरोष्ट्राणांकुक्कुटानांचभक्षणे नरकाकरवरोष्ट्राणांतप्तकृच्छ्रंविशोधनमितिमनुनाजातिविशेषेणप्रायश्चित्तविशेषस्योक्तत्वात् एतन्मूत्रपुरीषप्राशनेप्येतदेव वराहैकशफानांतु काककुक्कुटयोस्तथा क्रव्यादानांचसर्वेषामभक्षायेचकीर्त्तिताः मांसमूत्रपुरीषाणिप्राश्यगोमांसमेवच श्वगोमायुकपीनांचतप्तकृच्छ्रंविधीयते उपोष्यवाद्वादशाहंकूष्माण्डैर्जुहुयाद्घृतमितिबृहद्यमस्मरणात् तत्रकामतस्तप्तकृच्छ्रः अभ्यासेतुकूष्माण्डसहितःपराकइतिव्यवस्था तथाप्रचेतसाप्युक्तम् श्वसृगालकाककुक्कुटपार्षतवानरचित्रकचाषक्रव्यादखरोष्ट्रगजवाजिविड्वराह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोमानुषमांसभक्षणेतप्तकृच्छ्रमादिशेदेषांमूत्रपुरीषभक्षणेत्वतिकृच्छ्रमिति इदंचकामकारविषयम् यत्तूद्वानसोवचनम् नरमांसंश्वमांसंचगोमांसंचाश्वमेवच भुक्त्वापंचनखानांचमहासांतपनंचरेदितितदकामविषयम् यत्तंगिरोवचनं बलाकाभासगृध्रारुरवरवानरसूकराः दृष्ट्वाचैषाममेध्यानिस्पृष्ट्वाचैवविशुध्यति इच्छायेषाममेध्यानिभक्षयित्वाद्विजातयः कुर्युःसांतपनंकृच्छ्रंप्राजापत्यमनिच्छयेति तद्भक्षितोद्गारितविषयम् सांतपनशब्देनचात्रमहासांतपनमुच्यते अकामतः प्राजापत्यविधानात् यत्पुनरंगिरोवचनम् नरकाकखराश्वानांजग्ध्वामांसंगजस्यच एषांमूत्रपुरीषाणिद्विजश्चांद्रायणंचरेदिति यच्चबृहद्यमेनोक्तं शुष्कमांसाशनेविप्रोव्रतंचांद्रायणंचरेदितितदुभयमपिकामतोभ्यासविषयम् यत्पुनःशंखेनोक्तम् भुक्त्वाचोभयतोदंतांस्तथाचैकशफानपि औष्ट्रंगव्यंतथाजग्ध्वाषण्मासान्व्रतमाचरेदिति तत्कामतोत्यंताभ्यासविषयम् यत्पुनस्मृत्यंतरोक्तम् जग्ध्वामांसंनराणांचविड्वराहंखरंतथा गवाश्वकुंजरोष्ट्राणांसर्वपांचनखंतथा क्रव्यादंकुक्कुटंग्राम्यंकुर्यात्संवत्सरव्रतमिति तदत्यंतानवच्छिन्नाभ्यासविषयम् अत्रप्रकरणेमूत्रपुरीषग्रहणंवसाशुक्रास्रुक्मज्जानामुपलक्षणम् कर्णविट्प्रभृतिमलषट्केत्वर्धकल्पनीयम् केशादिषुपुनःषट्त्रिंशन्मतेविशेषउक्तः अजाविमहिषमृगाणांआममांसभक्षणेकेशनखरुधिरप्राशनेबुद्धिपूर्ववित्रिरात्रमज्ञानादुपवासइति यत्तुप्रचेतसोक्तम् नखकेशास्थ्योष्ठभक्षणेऽहोरात्रमभोजनाच्छुद्धिरिति तदप्यकामतः सकृत्प्राशनविषयम् यत्तुस्मृत्यंतरवचनम् केशकीटनखंप्राश्यमत्यंकंटकमेवच हेमतप्तंघृतंपीत्वातत्क्षणादेवशुध्यति तन्मुखमात्रप्रवेशविषयम् यदातुभाजनस्थमन्नंकेशादिदूषितंभवतितदा अन्नंभोजनकालेतुमक्षिकाकेशदूषितम् अनंतरंस्पृशेदापस्तच्चानंभस्मनास्पृशेदिति प्रचेतसाभिहितंवेदितव्यम् प्रासंगिकोयंश्लोकः सूक्ष्मतरकृमिकीटास्थिभक्षणेपुनर्हारीतेनविशेषउक्तः कृमिकीटपिपीलिकाजलौकःपतंगास्थिप्राशनेगोमूत्रगोमयाहारस्त्रिरात्रेणविशुध्यतीति जलौकोमत्स्यादिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंचपशुपतत्रिजलचरमांसादिप्राशनेसंक्षेपतः प्रायश्चित्तानिदर्शितानि ग्रंथगौरवभयात्प्रतिव्यक्तिनलिख्यंते अथाशुचिसंपृष्टभक्षणेप्रायश्चित्तं तत्रता
वदुच्छिष्टाभक्ष्यभक्षणेवक्ष्यतेमनुः विडालकाकारवूच्छिष्टंजग्ध्वास्यनकुलस्यच केशकीटावपन्नंचपिबेद्ब्राह्मीस्फवर्चलामिति कालविशेषानुपादानादेक
रात्रम् इदमकामतोद्रष्टव्यम् यत्तुविष्णुनोक्तम् पक्षिश्वापदजग्धस्यरसस्यान्नस्यभूयसः संस्काररहितस्यापिभोजनेकृच्छ्रपादकमितितत्कामकार
विषयम् संस्कारश्चदेवद्रोण्यामित्यादिनाद्रव्यशक्तिप्रकरणोक्तोद्रष्टव्यः यत्तुशातातपेनोक्तम् श्वकाकाद्यवलीढभूद्रोच्छेषणभोजनेत्रितिकृच्छ्रमिति
तदकामतोभ्यासविषयम् यत्तुशंखेन शुनासुच्छिष्टकंभुक्त्कामासमेकंव्रतीभवेत् काकोच्छिष्टंगवाघ्रातंभुक्त्कापक्षंव्रतीभवेदितियावकव्रतमुक्तं तत्का
मतोभ्यासविषयम् ब्राह्मणोच्छिष्टभोजनेतुबृहद्विष्णुनोक्तम् ब्राह्मणःशूद्रोच्छिष्टान्नेसप्तरात्रंपंचगव्यंपिबेत् वैश्योच्छिष्टान्नेपंचरात्रंराज
न्योच्छिष्टाशनेत्रिरात्रंब्राह्मणोच्छिष्टाशनेत्वेकाहमितितत्कामकारविषयम् यत्तुयमवचनम् भुक्त्वासहब्राह्मणेनप्राजापत्येनशुध्यति भूभुजासह
भुक्त्वान्नंतप्तकृच्छ्रेणशुध्यति वैश्येनसहभुक्त्वान्नमतिकृच्छ्रेणशुध्यति शूद्रेणसहभुक्त्वान्नंचांद्रायणमथाचरेत् तत्कामतोभ्यासविषयम् यतु
नःशंखवचनम् ब्राह्मणोच्छिष्टाशनेमहाव्याहृतिभिरभिमंत्र्यापः पिबेत्क्षत्रियोच्छिष्टाशने ब्राह्मीरसविपक्वेन त्र्यहंक्षीरेणवर्त्तयेत् विशोच्छिष्टाशनेत्रि
रात्रोपोषितोब्राह्मींस्फवर्चलांपिबेत् शूद्रोच्छिष्टभोजनेषड्रात्रमभोजनमितितदकामविषयम् तत्राभ्यासेद्वैगुण्यादिकंकर्त्तव्यम् एतच्चपित्रादिव्य
तिरेकेणपितुर्ज्येष्ठस्यचभ्रातुरुच्छिष्टंभोज्यमित्यापस्तंबस्मरणात् यत्तुबृहद्व्यासवचनम् मातावाभगिनीवापिभार्यावान्याश्चयोषितः नताभिःसहभो
क्तव्यं भुक्त्वाचांद्रायणंचरेत् तत्सहभोजनविषयम् उच्छिष्टमात्रभोजनेषुशूद्रोच्छिष्टभोजनेसप्तरात्रमभोजनंस्त्रीणांचेत्यापस्तंबोक्तंद्रष्टव्यम् यत्संगि
रोवचनम् ब्राह्मण्यासहयोश्नीयादुच्छिष्टंवाकदाचन तत्रदोषंनमन्यंतेसर्वएवमनीषिणइति तद्विवाहविषयमापद्विषयंवा अंत्योच्छिष्टभोजनेतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंत्यानांभुक्तशेषंतुभक्षयित्वाद्विजातयः चांद्रंकृच्छंतदर्धंचब्रह्मक्षत्रविशांविधिरितिआपस्तंबोक्तंद्रष्टव्यम् अत्रचांद्रंचांद्रायणम् अंत्यावसाय्युच्छिष्टभोजनेतु चांडालपतितादीनामुच्छिष्टान्नस्यभोजने चांद्रायणंचरेद्विप्रः क्षत्रः सांतपनंचरेत् षड्रात्रंचत्रिरात्रंचवर्णयोरनुपूर्वशः इत्यंगिरोभिहितं सांतपनमत्रमहासांतपनंद्रष्टव्यम् आपदितु आपत्कालेतुविप्रस्यभुक्तंशूद्रगृहेयदि मनस्तापेनशुध्यत्यतदपांचशतंजपेदितिपाराशरोक्तंवेदितव्यम् यत्तुबृहच्छातातपेनोक्तम् पीतशेषंचयत्किंचिद्भाजनेमुखनिःसृतम् अभोज्यंतद्विजानीयाद्भुक्त्वाचांद्रायणंचरेदितितदभ्यासविषयंज्ञेयम् निमित्तस्यातिलघुत्वात् पीतोच्छिष्टंतुपानीयंपीत्वातुब्राह्मणः क्वचित् त्रिरात्रंतुव्रतंकुर्याद्वामहस्तेनवापुनरिति एतद्बुद्धिपूर्वविषयम् अकामतस्त्वेकल्प्यमिति दीपोच्छिष्टंतुयत्तैलंरात्रौरथ्याहृतंतुयत् अभ्यंगाच्चैवयच्छिष्टंभुक्त्वाननक्तेनशुध्यतीतिषट्त्रिंशन्मतोक्तंद्रष्टव्यम् अथाशुचिद्रव्यसंस्पृष्टभक्षणेप्रायश्चित्तम् तत्राहसंवर्त्तः केशकीटोपपन्नंतुनीलीलाक्षोपघातनम् स्नाय्वस्थिचर्मसंस्पृष्टंभुक्त्वातूपवसेदहरिति तथाहशातातपः केशकीटावपन्नरुधिरमांसास्पृश्यस्पृष्टघ्राणहावेक्षितपतत्र्यवलीढश्वसूकरगवाघ्रातशुक्तपर्युषितवृथापक्वदेवान्नहविषांभोजनेतूपवासःपंचगव्याशनंचेति एतच्चोभयमपिअकामविषयम् कामतस्तु मृद्वारिकुसुमादींश्चफलकंदेक्षुमूलकान् विण्मूत्रदूषितान्प्राश्यकृच्छ्रपादंसमाचरेत् संनिकृष्टेर्धमेवस्यात्कृच्छ्रःस्याच्छ्वविभोजनमितिविष्णूक्तंवेदितव्यम् अल्पसंसर्गेपादोमहासंसर्गेपादोमहासंसर्गेर्धकृच्छ्रइतिव्यवस्था यत्तुव्यासेनोक्तम् संसर्गदुष्टंयच्चान्नंक्रियादुष्टंचकामतः भुक्तास्वभावदुष्टंचतप्तकृच्छ्रंसमाचरेदिति एतच्चासंस्पृष्टामेध्यादिरसोपलब्धौवेदितव्यम् रजस्वलादिस्पर्शेतुशंखोक्तम् अमेध्यपतितचांडालपुल्कसरजस्वलावधूतकुणिकुष्ठिकुनखिसंस्पृष्टानि भुक्त्वाकृच्छ्रंचरेदिति कुणिर्हस्तविकलः एतत्कामकारविषयम् अकामतोर्धम् भुक्तास्पृश्यैस्तथाशौचिकेशकीटैश्चदूषितम् कुशोदुंबरबिल्वाद्यैःपनसांबुजपत्रकैः शंखपुष्पीसुवर्चादिकाथंपीत्वाविशुद्ध्यतीतियद्विष्णुनोक्तंतदशक्तविषयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजकादिस्पर्शविषयंवा शूद्राद्युपहतेहारीतोक्तंविज्ञेयम् शूद्रेणोपहतंभोज्यंकीटैर्वामेध्यसेवितैः भुंजानेषुतुवायत्रदद्याच्छूद्रउपस्पृशेत् अनर्हत्वात्संपंक्तौतुभुंजानेषुवायत्रोत्थायोच्छिष्टंप्रयच्छेदाचामेद्वाकुर्सित्वायत्रान्नंदद्युस्तत्रप्रायश्चित्तमहोरात्रमिति उच्छिष्टपंक्तिभोजनेप्येतदेव यस्तुभुंक्तेद्विजःपंक्त्यामुच्छिष्टायांकदाचन अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यतीतिक्रतुस्मरणात् ग्रामकरनिर्मुक्तामन्नभोजनेतु समुत्थितस्तुयोभुंक्तेयोभुंक्तेमुक्तभोजने एवंवैवस्वतः प्राहभुक्त्वासांतपनंचरेदितिषट्त्रिंशन्मतोक्तंवेदितव्यम् तथापराशरेणाप्युक्तम् एकपंक्त्युपविष्टानांविप्राणांसहभोजने यद्येकोपित्यजेत्तावंशेषमन्नंनभोजयेत् मोहाद्भुंजीतयस्तत्रपंक्त्यामुच्छिष्टभोजनः प्रायश्चित्तंचरेद्विप्रः कृच्छ्रंसांतपनंचरेदिति शावादिसंपृक्तकूपाद्युदकपानेतुविष्णुराह मृतपंचनखात्कूपादल्पंतोपहताद्योदकंपीत्वाब्राह्मणस्त्र्यहमुपवसेत् त्र्यहराजन्यएकाहंवैश्यः शूद्रोनक्तं सर्वत्रांतेपंचगव्येपि बेयुरिति अत्यंतोपहतादितिमूत्रपुरीषादिभिर्वेत्यभिप्रेतं यदातुतत्रैवशवमुच्छूनंतयाभिन्नंभवति तदाहारीतोक्तोविशेषः क्लिन्नेभिन्नेशवेतोयेन त्रस्थंयदितत्पिबेत् शुद्ध्यैचांद्रायणंकुर्यात्तप्तकृच्छ्रमथापिवा यदिकश्चित्ततःस्नायात्प्रमादेनद्विजोत्तमः जपंस्त्रिषवणस्नायीअहोरात्रेणशुद्ध्यतीति इदंचांद्रायणंकामतोमानुषशवोपहतकूपजलपानविषयम् अकामतस्तुषड्रात्रं क्लिन्नंभिन्नंशवंचैवकूपस्थयदिजायते पयःपिबेद्विरात्रेणमानुषेद्विगुणंस्मृतमितिदेवलस्मरणात् यदाचांडालकूपादिगतंजलंपिबतितदापस्तंबोक्तंद्रष्टव्यम् चांडालकूपभांडस्थंनरःकामाज्जलंपिबेत् प्रायश्चित्तंकथंतत्रवर्णेवर्णेविनिर्दिशेत् चरेत्सांतपनंविप्रः प्राजापत्यंचभूमिपः तदर्धंचचरेद्वैश्यः शूद्रेपादंविनिर्दिशेदिति इदंचकामकारविषयम् अकामतस्तु चांडालकूपभांडस्थमज्ञानादुदकंपिबेत् सतुब्रह्मणशुद्ध्येनशूद्रस्तेनेनशुद्ध्यतीतिदेवलोक्तंद्रष्टव्यम् चांडालादिसंबद्धाल्पजलान्नायेष्वपिकूपवच्छुद्धिः जलाशयेष्वथाल्पेषुस्थावरेषुमहीतले कूपवत्कथिताशुद्धिर्महत्सुतुनदूषणमितिविष्णुस्मरणात् पुष्करिण्यादिषुपुनः म्लेच्छादीन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांजलंपीत्वापुष्करिण्यांह्रदेपिवा जानुदघ्नंशुचिज्ञेयमधस्तादशुचिस्मृतम् तत्तोयंयःपिबेद्विप्रःकामतोकामतोपिवा अकामान्नक्तभुंजीस्याद् होरात्रंतुकामतः इत्यापस्तंबोक्तंद्रष्टव्यम् रजकादिभांडस्थतोयेषु भांडस्थमंत्यजानांतु जलंदधिपयःपिबेत् ब्राह्मणःक्षत्रियोवैश्यः शूद्रश्चैवप्रमादतः ब्रह्मकूर्चेपवासेतुद्विजातीनांतुनिष्कृतिः शूद्रस्यचोपवासेनतथादानेनशक्तितइतिपराशरोक्तंद्रष्टव्यम् कामतस्तद्द्विगुणम् अंत्यजैःखानिताःकूपास्तडागंवाप्यएववा एषुस्नात्वाचपीत्वाचप्राजापत्येनशुध्यतीतिआपस्तंबोक्तमभ्यासविषयंवेदितव्यम् यत्तापस्तंबेन चांडालादिकूपादिजलपानेपंचगव्यमात्रमुक्तम् प्रपास्वरण्येघटकेचशैलेद्रोण्यांजलंकोशविनिर्गतंच श्वपाकचांडालपरिग्रहेषुपीत्वाजलंपंचगव्येनशुध्येदितितदशक्तविषयम् प्रपागतोविनातोयशरीरंयोनिषिंचति एकाहक्षपणंकृत्वासचैलंस्नानमाचरेत् सुराघृटप्रपातोयेपीत्वानाव्यजलंतथा अहोरात्रोषितोभूत्वापंचगव्यंजलंपिबेत् अथभावदुष्टभक्षणेप्रायश्चित्तम् भावदुष्टंचयद्दूर्णनआकारतोवातिसदृशतयाजुगुप्सितशारीरमलादिवासनांजनयतितदुच्यतेअरिप्रयुक्तगरलादिशंकाच तत्रपराशरः वाग्दुष्टंभावदुष्टंचभाजनेभावदूषितम् भुक्त्वान्नंब्राह्मणःपश्चात्त्रिरात्रेणविशुध्यतीतिएतत्कामकारविषयम् शंकायांतु शंकास्थानेसमुत्पन्नेअभोज्याभक्ष्यसंज्ञिते आहारशुद्धिंवक्ष्यामितन्मेनिगदतःशृणु अक्षारलवणांरुक्षांपिबेद्ब्राह्मींसुवर्चलाम् त्रिरात्रंशंखपुष्पींवाब्राह्मणःपयसासह पलाशबिल्वपत्राणिकुशान्पद्ममुदुंबरम् अपःपिबेत्कायशोधित्वात्रिरात्रेणविशुद्ध्यतीतिवसिष्ठोक्तंद्रष्टव्यम् मनुनाप्यभोज्यभोजनशंकायामुक्तम् संवत्सरस्यैकमपिचरेत्कृच्छ्रंद्विजोत्तमः अज्ञातभुक्तशुद्ध्यर्थंज्ञातस्यचविशेषतइति कालदुष्टभक्षणप्रायश्चित्तम् कालदुष्टंचपर्युषितानिदशगोक्षीरादि तत्रचाकामतः शेषेषूपवसेदहरितिमन्वुक्तंवेदितव्यम् कामतस्तु केवलानिचशुक्लानितथापर्युषितंचयत् रुचीसपक्वंभुक्त्वातुत्रिरात्रंतुव्रतीभवेदितिशंखोक्तंवेदितव्यम् के

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वलान्यस्नेहान्नानि अनिर्दशगोक्षीरादिषुप्रायश्चित्तंप्रदर्शितम् नवोदकपानेतुपंचगव्यप्राशनम् शृंगास्थिदंतजैःपात्रैः शंखशुक्तिकपर्दिकैः पीत्वानवोदकंचैवपंचगव्येनशुध्यतीति बृहद्याज्ञवल्क्यस्मरणात् कामतस्तूपवासःकर्तव्यः कालेनवोदकंशुद्धंनपिबेच्चान्यहंहितत् अकालेतुदूशाहंस्यात्पीत्वानाद्यादहर्निशमितिस्मृत्यंतरदर्शनात् यहकालभोजनेतुचांद्रायणम् नवश्राद्धंग्रामयाजकान्नंसग्रहभोजनम् नारीणांप्रथमेगर्भेभुक्त्वाचांद्रायणंचरेदितिशातातपस्मरणात् यदातुसग्रहादन्यत्रनिषिद्धकालेभुक्ते यथाहमार्कंडेयः चंद्रस्ययदिवाभानोर्यस्मिन्नहनिभागव ग्रहणंतुभवेत्तस्मिन्नपूर्वभोजनक्रियाम् नाचरेत्सग्रहेचैवतथैवास्तमुपागते यावत्स्यान्नोदयस्तस्यनाश्नीयात्तावदेवतु तथा ग्रहणंतुभवेद्दिदोः प्रथमादधियामतः भुंजीताबर्त्तनात्पूर्वंप्रथमेप्रथमादधः तथा अपराण्हेनमध्यान्हेसायान्हेनतुसंगवे भुंजीतसंगवेचेत्स्यान्नपूर्वंभोजनक्रियेति यच्चमनुनोक्तम् नाश्नीयात्संधिवेलायांनातिप्रगेनातिसायमित्येवमादि यच्चबृहच्छातातपेनोक्तम् धानादधिचसक्तूश्चश्रीकामोवर्जयेन्निशि भोजनंतिलसंबद्धस्नानंचैवविचक्षणइति एवमादिष्वनादिष्टप्रायश्चित्तेषुप्राणायामशतंकार्यसर्वपापापनुत्तये उपपातकजातानामनादिष्टस्यचैवहीतियोगीश्वरोक्तंद्रष्टव्यम् अकामतस्तुशेषेषूपवसेदहरितिमनूक्तोपवासोद्रष्टव्यः अथगुणदुष्टशुक्लादिभक्षणेप्रायश्चित्तम् तत्रचमनुः शुक्लानिचकषायांश्चपीत्वामेध्यानपिद्विजः तावद्भवत्यप्रयतोयावत्तन्नव्रजत्यधइति अत्राकामतः शेषेषूपवसदहरित्युपवासोद्रष्टव्यः कामतस्तु केवलानिचशुक्लानितथापर्युषितंचयत् ऋबीसपक्वंभुक्त्वाचत्रिरात्रंतुव्रतीभवेदितिशंखस्मरणात् एतच्चामलकादिफलयुक्तकांजिकादिव्यतिरेकेणद्रष्टव्यम् कुंडिकासफलायेषुगृहेषुस्थापिताभवेत् तस्यास्तुकंजिकाग्राह्यानेतरस्याः कदाचनेतिस्मरणात् उद्धृतस्नेहादिषुतु उद्धृत्यस्नेहविलयनपिण्याकमथितप्रभृतीनांचात्रवीर्याणिनाश्नीयादित्युक्त्वाप्राक्पंचनखे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यश्छर्दनंघृतप्राशनंचेतिगौतमोक्तंद्रष्टव्यम् विलयनंघृतमलम् अहुताद्यन्नभोजनेतुलिखितआह यस्यचाग्नौनक्षिपतेयस्यचान्नंनदीयते न
तद्भोज्यंद्विजातीनांभुक्त्वाचोपवसेदहः वृथाकृसरसंयावपायसापूपशष्कुलीः आहिताग्निर्द्विजोभुक्त्वाप्राजापत्यंसमाचरेदिति अनाहिताग्ने-
रुक्तशेषेषूपवसेदहरित्युपवासोद्रष्टव्यः भिन्नभाजनादिषुभोजनेसंवर्त्तेनोक्तम् शूद्राणांभाजनेभुक्त्वाभुक्त्वावाभिन्नभाजने अहोरात्रोषितोभू-
त्वापंचगव्येनशुद्ध्यतीति तथास्मृत्यंतरेप्युक्तम् वटार्कश्वत्थपत्रेषुकुंभीतिंदुकपत्रयोः कोविदारकदंबेषुभुक्त्वाचांद्रायणंचरेदिति तथा पलाश
पद्मपत्रेषुगृहीभुक्त्वैंदवंचरेत् वानप्रस्थोयतिश्चैवलभतेचांदिकंफलमिति अथहस्तदानादिक्रियादुष्टाभोज्यभक्षणेप्रायश्चित्तम् त
त्रपराशरः माक्षिकंफाणितंशाकंगोरसंलवणंघृतम् हस्तदत्तानिभुक्त्वातुदिनमेकमभोजनमिति कामतस्तु हस्तदत्तभोजनेअब्राह्मणसमी
पेभोजनेदुष्टपंक्तिभोजनेपंक्त्यग्रतोभोजनेऽभ्यक्तमूत्रपुरीषकरणेमृतसूतकशूद्रान्नभोजनेशूद्रैःसहस्वप्नेत्रिरात्रमभोजनमितिहारीतोक्त-
विज्ञेयम् पर्यायान्नदानदुष्टेतु ब्राह्मणान्नंददच्छूद्रः शूद्रान्नंब्राह्मणोददत् द्वयमेतदभोज्यस्याद्भुक्त्वातूपवसेदहरितिवृद्धयाज्ञवल्क्योक्त
मवगंतव्यम् शूद्रहस्तभोजनेतु शूद्रहस्तेनयोभुंक्तेपानीयंवापिवेत्क्वचित् अहोरात्रोपोषितोभूत्वापंचगव्येनशुद्ध्यतीतिमनूक्तविज्ञेयम् धम
नदुष्टेपि आसनारूढपादोवावस्त्रार्धप्रावृतोपिवा सुरयेनधमितंभुक्त्वाकृच्छ्रंसांतपनंचरेदितितेनैवोक्तम् त्रिरात्रावुद्देशेनत्यक्तान्नभोजनेतु
भुंक्तेचेत्सार्वणश्राद्धेप्राणायामान्षडाचरेत् उपवासस्त्रिमासादिवत्सरांतप्रकीर्त्तितः प्राणायामत्रयंवृद्धावहोरात्रंसपिंडने असरूपेस्मृतंनक्तंव्रतपार
णकेतथा द्विगुणंक्षत्रियस्यैतत्त्रिगुणंवैश्यभोजने साक्षाच्चतुर्गुणंह्येतत्स्मृतंशूद्रस्यभोजने अतिथौतिष्ठतिद्वारित्यपःप्राश्नंतियेद्विजाः रुधिरंतद्भवे
द्वारिभुक्त्वाचांद्रायणंचरेदितिभारद्वाजोक्तमवगंतव्यम् हारीतेनाप्युक्तम् एकादशाहेनुभ्यहंभुक्त्वासंचयनेतथा उपोष्यविधिवत्स्नात्वाकूष्मांडैर्जुहु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याज्ञवल्क्यमिति विष्णुनाप्युक्तम् प्राजापत्यंनवश्राद्धेपादोनंचाद्यमासिके त्रैपक्षिकेतदर्द्धंतुपंचगव्यंद्विमासिकेइतिचापद्विषयम् अनापदितु चांद्रायणंनवश्राद्धेप्राजापत्यंतुमिश्रके एकाहस्तुपुराणेषु प्राजापत्यंविधीयतेइतिहारीतोक्तंद्रष्टव्यम् प्राजापत्यंतुमिश्रकेइत्येतदाद्यमासिकविषयंद्रष्टव्यम् द्वितीयादिषुतु प्राजापत्यंनवश्राद्धेपादोनंचाद्यमासिके त्रैपक्षिकेतदर्धंतुपाक्षेद्वैमासिकेतथा पादोनकृच्छ्रंनिर्दिष्टंषण्मासेनचतथाब्दिके त्रिरात्रंचान्यमासेषुप्रत्यहंचेदहःस्मृतमितिषट्त्रिंशन्मतोक्तंद्रष्टव्यम् क्षत्रियादिश्राद्धभोजनेत्वनापदितत्रैवविशेषउक्तः चांद्रायणंनवश्राद्धेपराकोमासिकेस्मृतः त्रैपक्षिकेसांतपनंकृच्छ्रोमासद्वयेस्मृतः क्षत्रियस्यनवश्राद्धेव्रतमेतदुदाहृतम् वैश्यस्यार्द्धाधिकंप्रोक्तंक्षत्रियातुमनीषिभिः शूद्रस्यतुनवश्राद्धेचरेच्चांद्रायणद्वयम् सार्द्धंचांद्रायणंमासेत्रिपक्षेत्वेंदवंव्रतम् मासद्वयेपराकःस्यादूर्ध्वंसांतपनंस्मृतम् यत्तुशंखवचनम् चांद्रायणंनवश्राद्धेपराकोमासिकेस्मृतः पक्षत्रयेतिकृच्छ्रःस्यात्षण्मासेकृच्छ्रएवतु आब्दिकेपादकृच्छ्रंस्यादेकाहः पुनराब्दिके अतऊर्ध्वंनदोषःस्याच्छंखस्यचवचनंयथेति तत्सर्पादिहतविषयम् यस्तेनपतितक्लीबाइत्याद्यपांक्तेयविषयंवा चांडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणाम् पतनानाशकैश्चैवविषोद्बंधनकैस्तथा भुक्त्वैषांषोडशश्राद्धेकुर्यादिदुव्रतंद्विजइति तथा अपांक्तेयान्नमुद्दिश्यश्राद्धमेकादशेहनिब्राह्मणस्तत्रभुक्त्वान्नंशिशुचांद्रायणंचरेदिति आमश्राद्धेतथाभुक्तातप्तकृच्छ्रेणशुध्यति संकल्पितेतथाभुक्त्वात्रिरात्रंक्षपणंभवेदितिभरद्वाजेनगुरुप्रायश्चित्ताभिधानात् ब्रह्मचारिषुवृद्धयमोविशेषमाह मासिकादिषुयोश्नीयादासमाप्तव्रतोद्विजः त्रिरात्रमुपवासोवैप्रायश्चित्तंविधीयते प्राणायामत्रयंकृत्वाघृतंप्राश्यविशुद्ध्यतीति इदमज्ञानविषयम् कामतोपिसएवाह मधुमांसंचयोश्नीयात्श्राद्धंसूतकमेववा प्राजापत्यंचरेत्कृच्छ्रंव्रतशेषंसमापयेदिति अमश्राद्धेतुसर्वत्रार्द्धम् आमश्राद्धेतदर्द्धंतुप्राजापत्यंतुसर्वदेतिषट्त्रिंशन्मतेविधानात् यत्तूद्वाहसोक्तम् दशकृत्वःपिबेच्चापोगायत्र्याश्राद्धे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुग्द्विजः ततःसंध्यामुपासीतदक्ष्येत्युतदनंतरमिति तदनुक्तप्रायश्चित्तश्राद्धविषयम् संस्कारांगभूतश्राद्धभोजनेतुव्यासेनविशेषउक्तः निवृत्तेचूडा
होमेतुप्राङ्नामकरणात्तथा चरेत्संतपनंभुक्त्वाजातकर्मणिचैवहि अतोन्येषुतुभुक्त्वान्नंसंस्कारेषुद्विजोत्तमः नियोगादुपवासेनशुद्ध्यतेनिंद्यभोजनइति
सीमंतोन्नयनादिषुपुनर्धौम्योविशेषमाह ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा जातश्राद्धेनवश्राद्धेद्विजश्चांद्रायणंचरेदिति अत्रब्रह्मौदनारव्यंकर्म
यज्ञांगभूतंसोमसाहचर्यात् अथपरिग्रहाभोज्यभोजनेप्रायश्चित्तम् यत्त्वरूपतोऽनिषिद्धमपिविशिष्टपुरुषस्वामिकतयाऽभोज्यंभण्यतेतत्परिग्र
हाश्रचि तत्रयोगीश्वरेण अदत्तान्यग्निहीनस्यनान्नमद्यादनापदीत्यारभ्यसार्द्धपंचभिःश्लोकैरभोज्यान्नाःप्रतिपादिताः मनुनापितएवकिंचिदधिकाः
प्रतिपादिताः नाश्रोत्रियतनेयज्ञेग्रामयाजिहुतेतथा स्त्रियाक्लीबेनचहुतेभुंजीतब्राह्मणःकचित् मत्तक्रुद्धातुराणांतुनभुंजीतकदाचन गणान्नंगं-
णिकान्नंचविदुषाचजुगुप्सितम् स्तेनगायनयोश्चान्नंतक्ष्णोवार्धुषिकस्यच दीक्षितस्यकदर्यस्यबद्धस्यनिगडस्यच अग्निशालस्यषंढस्यपुंश्चल्या
दांभिकस्यच चिकित्सकस्यमृगयोःक्रूरस्योच्छिष्टभोजिनः उग्रान्नंसूतिकान्नंचपर्यायान्नमनिर्दशाम् अनर्चितंवृथामांसमवीरायाश्चयोषितः द्विष
न्नंकदर्यान्नंपतितान्नमवक्षुतम् पिशुनानृतिनोश्चैवक्रतुविक्रयकस्यच शैलूषतंतुवायान्नंक्रूरघ्नस्यान्नमेवच कर्मारस्यनिषादस्यरंगावतरणस्यच स्रुवर्ण
कर्तुवेनस्यशस्त्रविक्रयिणस्तथा श्ववतांशौंडिकानांचचैलनिर्णेजकस्यच रजकस्यनृशंसस्ययस्यचोपपतिर्गृहे मृष्यंतियेचोपपतिंस्त्रीजितानांचसर्वशः
अनिर्दशांचप्रेतान्नमनुष्टिकरमेवचेति अत्रचपदार्थाअभक्ष्यकांडेश्राद्धकांडेचव्याख्याताः अत्रप्रायश्चित्तमाह भुक्त्वातोन्यतमस्यान्नममत्याक्षपणंन्यहम्
मत्याभुक्त्वाचरेत्कृच्छ्रंरेतोविण्मूत्रमेवचेतिपैठीनसिनाप्यकामतस्त्रिरात्रमेवोक्तम् कुनखीश्यावदंतःपित्राविवदमानःस्त्रीजितःकुष्ठीपिशुनःसोमविक्र-
यीवाणिजकोग्रामयाजकोभिशस्तोवृषल्यामभिजातःपरिवित्तिःपरिविंदानोदिधिषूपतिःपुनर्भूपुत्रश्चौरःकांडपृष्ठसेवकश्चेत्यभोज्यान्नाअपांक्तेयाअ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्राद्धाहीः एषांभुक्त्वादत्त्वाविज्ञानात्त्रिरात्रंमिति शंखेनत्वेतानेवकिंचिदधिकान्पठित्वाचांद्रायणमुक्तम् तदभ्यासविषयम् गौतमेनपुनरुच्छिष्टेषु श्वत्यभिशस्तेत्यादिनाअभोज्यान्पठित्वाप्राकृपंचनरवेभ्यश्छर्दनंघृतप्राशनंचेतिप्रायश्चित्तमुक्तं तदापद्विषयम् यस्तुबलात्कारेणभुज्यतेतस्यापस्तंबनविशेषउक्तः बलाद्दासीकृतायेतुम्लेच्छचांडालदस्युभिः अरुग्भंकारिताःकर्मगवादिप्राणिहिंसनम् उच्छिष्टमार्जनंचैवतथोच्छिष्टस्यभोजनम् खरोष्ट्रविड्वराहाणामामिषस्यचभक्षणम् तत्स्त्रीणांचतथासंगस्तासांश्चसहभोजनम् मासोषितद्विजातौतुप्राजापत्यंविशोधनम् चांद्रायणंतथाहिताग्नेःपराकस्तथैवाभवत् चांद्रायणंपराकंचचरेत्संवत्सरोषितः संवत्सरोषितोशूद्रोमासार्द्धंयावकंपिबेत् मासमात्रोषितःशूद्रः रुच्छ्रपादेनशुद्ध्यति ऊर्ध्वसंवत्सरात्कल्प्यंप्रायश्चित्तंद्विजोत्तमैः संवत्सरैरुत्तमैश्चैवतद्भावंसंनियच्छतीति आशौचपरिग्रहान्नभोजनेच्छागलआह अज्ञाना द्भोजनेविप्राःसूतकेमृतकेपिवा प्राणायामशतंकृत्वासुध्यंतेशूद्रसूतके वैश्येषष्टिर्भवेद्राज्ञिविंशतिर्ब्राह्मणेदश एकाहंचत्र्यहंपंचसप्तरात्रमभोजनम् तथाशुद्ध्यिर्भवत्येषांपंचगव्यंपिबेत्तत्त इतिब्राह्मणादिक्रमेणैकाहत्र्यहादयोयोज्याः इदमकामविषयम् कामतस्तुमार्कंडेयआह भुक्त्वातु ब्राह्मणाशौचेचरेत्सांतपनंद्विजः भुक्त्वातुक्षत्रियाशौचेतथाशुद्ध्योविधीयते वैश्याशौचेतथाभुक्त्वाद्विजश्चांद्रायणंचरेदिति यच्चशंखेनोक्तम् शूद्रस्यसूतकेभुक्त्वाषण्मासव्रतमाचरेत् वैश्यस्यतुतथाभुक्त्वात्रिमासान्व्रतमाचरेत् क्षत्रियस्यतथाभुक्त्वाद्वौमासौव्रतमाचरेत् ब्राह्मणस्यतथाशौचेभुक्त्वामासव्रतंचरेदिति इदमभ्यासविषयम् एतच्चप्रायश्चित्तमाशौचादनंतरंवेदितव्यम् ब्राह्मणादीनामाशौचेयः सकृदेवान्नमश्नातितस्यतावदाशौचम् आशौचव्यपगमेप्रायश्चित्तंकुर्यादितिविष्णुस्मरणात् अपुत्राद्यन्नभोजनेतुलिखितआह भुक्त्वावार्द्धुषिकस्यान्नंवतस्यासुतस्यच शूद्रस्यचतथाभुक्त्वात्रिरात्रंस्यादभोजनम् तथा परपाकनिवृत्तस्यपरपाकरतस्यच अपचस्यतुभुक्त्वान्नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विजश्चांद्रायणंचरेत् एतच्चाभ्यासविषयम् परपाकनिवृत्तादर्लक्षणंतेनैवोक्तम् गृहीत्वाग्निंसमारोप्यपंचयज्ञान्निर्वपेत् परपाकनिवृत्तोसोमुनि
भिःपरिकीर्त्तितः पंचयज्ञान्स्वयंकृत्वापरान्नादुपजीवति सततंप्रातरुत्थायपरपाकरतस्तुसः गृहस्थधर्मवृत्तोयोददातिपरिवर्जितः ऋषिभिर्धर्मतत्त्वज्ञैर
पचःसंप्रकीर्त्तितइति यत्तुब्रह्मचार्याद्यन्नभोजनेवृद्धयाज्ञवल्क्यआह यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ तयोरन्नंनभोक्तव्यंभुक्त्वाचां
द्रायणंचेदिति यत्तुपार्वणश्राद्धाद्यकर्तुरन्नभोजनेभरद्वाजआह पक्षेवायदिवामासेयस्यनाश्नंतिदेवताः भुक्त्वादुरात्मनस्तस्यद्विजश्चांद्रायणं
चरेदिति तदुभयमप्यभ्यासविषयम् पूर्वपरिगणितातिरिक्तायेनिषिद्धाचरणशीलास्तदन्नभोजनेतु निराचारस्यविप्रस्यनिषिद्धाचरणस्यच अ
न्नंभुक्त्वाद्विजः कुर्याद्दिनमेकमभोजनमितिषट्त्रिंशन्मतोक्तंद्रष्टव्यम् अत्रैवसंवत्सराभ्यासेषट्त्रिंशन्मतएवोक्तम् उपपातकयुक्तस्यअब्दमेकनिरंतर
म् अन्नंभुक्त्वाद्विजःकुर्यात्सराकंतुविशोधनमिति इदंतुभक्ष्याभक्ष्यप्रायश्चित्तकांडगतविशेषोदितव्रतकदंबकंद्विजाग्र्यस्यैव क्षत्रियादीनांतुपादपादहा
न्याभवति विप्रेतुसकलंदेयंपादोनंक्षत्रियेस्मृतम् वैश्येर्द्धंपादएकस्तुशूद्रजातिषुशस्यतइतिविष्णुस्मरणात् इत्यभक्ष्यभक्षणप्रायश्चित्तप्रकरणम्
निमित्तपरिगणनवेलायामुपपातकानंतरंजातिभ्रंशकरादीनिपरिगणितानि तत्रप्रायश्चित्तान्युच्यंते तत्रमनु जातिभ्रंशकरंकर्मकृत्वान्यतम
मिच्छया चरेत्सांतपनंकृच्छ्रंप्राजापत्यमनिच्छया संकरापात्रकृत्यासुमासःशोधनैंदवः मलिनीकरणीयेषुतप्तःस्याद्यावकस्त्र्यहमिति अन्य
तममितिसर्वत्रसंबध्यते यमेनाप्यत्रविशेषउक्तः संकरीकरणंकृत्वामासमश्नीतयावकम् कृच्छ्रातिकृच्छ्रमथवाप्रायश्चित्तंसमाचरेत् अपात्रीकरणंकृ
त्वातप्तकृच्छ्रेणशुध्यति सांतकृच्छ्रेणयाज्यद्विर्महासांतपनेनवा मलिनीकरणीयेषुतप्तकृच्छ्रंविशोधनमिति बृहस्पतिनापिजातिभ्रंशकरेवि
शेषउक्तः ब्राह्मणस्यरुजंकृत्वारासभादिप्रमापणम् निंदितेभ्योधनादानंकृच्छ्राद्व्रतमाचरेदिति एतेषांजातिभ्रंशकरादिप्रायश्चित्तानांम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्वा युक्तानांजातिशक्त्याद्यपेक्षयाविषयोविभजनीयः एवंयोगींद्रहद्भूतमभक्ष्यादिप्रायश्चित्तंसंक्षेपतोदर्शितम् २९० अधुनाप्रकृतमनुसरामः महापातकमतिपातकमनुपातकमुपपातकंप्रकीर्णकमितिपंचविधंपापजातमुक्तम् तत्रचतुर्विधप्रायश्चित्तमभिधायक्रमप्राप्तप्रकीर्णकप्रायश्चित्तमाह खरयुक्तंयानंखरयानम् उष्ट्रयुक्तंयानमुष्ट्रयानम् रथगंत्र्यादि तेनाध्वगमनंकृत्वादिगंबरः स्नात्वाभ्यवहृत्यवावासरेचनिजगनासंभोगंकृत्वाचतडागतरंगिण्यादावबगाह्यकृतप्राणायामःशुध्यति इदंचकामकारविषयम् उष्ट्रयानंसमारुह्यखरयानंतुकामतः सवासाजलमाप्लुत्यप्राणायामेनशुध्यतीतिमनुस्मरणात् अकामतःस्नानमात्रंकल्प्यम् साक्षात्खरारोहणेतुद्विगुणावृत्तिःकल्पनीया तस्य

प्राणायामीजलेस्नात्वाखरयानोष्ट्रयानयः नग्नःस्नात्वाचभुक्त्वाचगत्वाचैववदिवास्त्रियम् २९१
गुरुंहुंकृत्यत्वंकृत्यविप्रंनिर्जित्यवादतः बध्वावाससाक्षिप्रंप्रसाद्योपवसेद्दिनम् २९२

गुरुत्वात् २९१ किंच गुरुंजनकादिकंत्वंकृत्यत्वमेवमात्यत्वयैवकृतमित्येकवचनांतयुष्मच्छब्दोचारणेननिर्भर्त्स्यविप्रंवाज्यायांससमंकनीयांवासक्रोधंहुंतूष्णीमास्वहुंभावहुंवादीरित्येवमाक्षिप्यजित्वावितंडाभ्याजयफलाभ्यांविप्रंनिर्जित्यकंठेवाससामृदुस्पर्शेनापिबध्वाक्षिप्रंपादप्रणिपातादिनाप्रसाद्यक्रोधंत्याजयित्वादिनमुपवसेत् अनश्नन्कृत्स्नंवासरंनयेत् यत्तुयमेनोक्तम् वादेनब्राह्मणंजित्वाप्रायश्चित्तविधित्सयात्रिरात्रोपोषितःस्नात्वाप्रणिपत्यप्रसादयेदितितदभ्यासविषयम् २९२ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचाह विप्रजिघांसयादंडोद्यमेकृच्छ्रः शुद्धिहेतुः निपातनेताडनेअतिकृच्छ्रः असृक्पातेरुधिरस्रवणेपुनःकृच्छ्रातिकृच्छ्रः अभ्यंतरशो णितेपिकृच्छ्रःशुद्धिहेतुः बृहस्पतिनाप्यत्रविशेषउक्तः काष्ठादिनाताडयित्वालग्भेदेकृच्छ्रमाचरेत् अस्थिभेदेतिकृच्छ्रःस्यात्सराक्स्रुग्गकर्त्तने पादप्रहारेयमआह पादेनब्राह्मणस्पृष्ट्वाप्रायश्चित्तविधित्सया दिवसोपोषितःस्नात्वाप्रणिपत्यप्रसादयेदिति मनुनोक्तान्यन्यानिप्रकीर्णकप्रायश्चि त्तानिदर्शितानि विनाद्विरप्सुवाप्यार्त्तशारीरंसंनिषेव्यतु सचैलोबहिराप्लुत्यगामालभ्यविशुद्ध्यतीति विनाद्विरित्यसंनिहितास्वप्सुइत्यर्थः शा रीरमूत्रपुरीषादि इदमकामविषयम् कामतस्तु आपद्गतोविनातोयंशारीरंयोनिषेवते एकाहंक्षपणंकृत्वासचैलोजलमाविशेदितियमोक्तंवेदितव्य

विप्रदंडोद्यमेकृच्छ्रस्त्वतिकृच्छ्रोनिपातने कृच्छ्रातिकृच्छ्रोसृक्पातेकृच्छ्रोभ्यंतरशोणिते २९३

म् यत्तुशंखंतुवचनम् अभ्यंगौवामेहतस्तप्तकृच्छ्रमिति तदनार्तविषयमभ्यासविषयंवानित्यश्रौतादिकर्मलोपेतुमनुराह वेदोदितानांनित्यानांकर्म णांसमतिक्रमे स्नातकव्रतलोपेचप्रायश्चित्तमभोजनमिति श्रौतेषुदर्शपूर्णमासादिषुकर्मसुस्मार्तेषुनित्यहोमादिषुप्रतिपदोक्तेष्ट्यादिप्रायश्चित्तैरुपवास स्यसमुच्चयः स्नातकव्रतानि नजीर्णमलवद्वासाभवेच्चविभवेसतीत्येवमादीनिप्रागुक्तानिस्नातकव्रतमधिकृत्यक्रतुनाप्युक्तम् एतेषामाचाराणामेकै कस्यव्यतिक्रमणेगायत्र्यष्टशतंजपंकृत्वापूतोभवतीति पंचमहायज्ञाकरणेबृहस्पतिराह अनिर्वर्त्यमहायज्ञान्योश्नुक्तेप्रत्यहंगृही अनातुरः सतिधनेकृच्छ्रार्द्धेनसशुध्यति आहिताग्निरुपस्थानंनकुर्याद्यस्तुपर्वणि क्रतौनगच्छेद्भार्यांवासोपिकृच्छ्रार्द्धमाचरेदिति द्वितीयादिभार्यांपरमेतुदंड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वलआह मृतांद्वितीयांयोभार्यांदहेद्वैतानिकाग्निभिः जीवंत्यांप्रथमायांतुरुरापानसमंहितद्वितिस्वभार्याभिरांसनेतुयमआह स्वभार्यांतुयदाक्रोधादगम्येतिनरो
वदेत् प्राजापत्येचरेद्विप्रः क्षत्रियोदिवसान्नव षड्रात्रंतुचरेद्वैश्यस्त्रिरात्रंशूद्रआचरेदिति अस्नानभोजनादौहारीतआह वहन्कमंडलुंरिक्तमस्नातोभंश्च
भोजनम् अहोरात्रेणशुद्ध्यद्विः स्याद्विनजाप्येनचैवहीति एकपंक्त्युपविष्टानांस्नेहादिनावैषम्येणदानादौयमआह नपंक्त्यांविषमंदद्यान्नयाचेतनदापयेत्
प्राजापत्येनकृच्छ्रेणमुच्यतेकर्मणस्ततः नदीसंक्रमहंतुश्चकन्याविघ्नकरस्यच समेविषमकर्तुश्चनिष्कृतिर्नविधीयते त्रयाणामपिचैतेषांप्राजापत्यंतुमार्ग
णम् भैक्ष्यलब्धेनचान्नेनद्विजश्चांद्रायणंचरेदिति संक्रमउदकावतरणमार्गः समेविषमकर्तापूजादौ इंद्रधनुर्दर्शनादावृष्यशृंगआह इंद्रचापपलाशा
ग्नियद्यन्यस्यप्रदर्शयेत् प्रायश्चित्तमहोरात्रंधनुर्दंडश्चदक्षिणा पतितादिसंभाषणेतुगौतमआह नम्लेच्छान्सुदुर्धार्मिकःसहसंभाषेतसंभाष्यपुण्यकृ
तोमनसाध्यायेत् ब्राह्मणेनसहवासंभाषेत् भार्यान्नधनलाभवधंपृथग्वर्षाणीति भार्यान्नधनानांलाभस्यवधेविघ्नकरणेप्रत्येकंसंवत्सरंप्राकृतंब्रह्मचर्यम्
तथा ब्रह्मसूत्रंविनाविण्मूत्रोत्सर्गादौस्मृत्यंतरेप्रायश्चित्तमुक्तम् विनायज्ञोपवीतेनयद्युच्छिष्टोभवेद्द्विजः प्रायश्चित्तमहोरात्रंगायत्र्यष्टशतंजपा तत्रऊ
र्ध्वोच्छिष्टउपवासः अधोच्छिष्टस्योदकपानादिषुगायत्रीजपइतिव्यवस्था अकामतस्तु पिबतोमेहतश्चैवभुंजतोनुपवीतिनः प्राणायामत्रिकंषट्कंन
क्तंचत्रितयंक्रमादितिस्मृत्यंतरोक्तंद्रष्टव्यम् भुक्त्वाशौचाचमनमकृत्वोत्थानेतु यद्युत्तिष्ठत्यनाचांतोभुंक्तेवानाशानात्ततः सद्यःस्नानंप्रकुर्वीतसोन्यथा
पतितोभवेदितिस्मृत्यंतरोक्तंद्रष्टव्यम् चौराद्युत्सर्गादौवसिष्ठआह दंडोत्सर्गेराजैकरात्रमुपवासेत्रिरात्रंपुरोहितः कृच्छ्रमदंड्यदंडनेपुरोहितस्त्रिरा
त्रंराजाकुनखीश्यावदंतश्चकृच्छ्रंद्वादशरात्रंचरित्वोद्धरेयातामितिदंतान्नखांश्चदंतनखाच्छुद्ध्यारयतांचेत्यभिप्रेतम् स्तेनपतितादिपंक्तिभोजनेतुमा
र्कंडेयआह अपंक्तेयस्ययः कश्चित्पंक्तौभुंक्तेद्विजोत्तमः अहोरात्रोषितोभूत्वापंचगव्येनशुध्यतीति नीलीविषयेत्वापस्तंबआह नीलीरक्तंयदावस्त्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणोंगेषुधारयेत् अहोरात्रोषितोभूत्वापंचगव्येनशाध्यति रोमकूपैर्यदागच्छेद्रसोनील्यास्तुकस्यचित् त्रिषुवर्णेषुसामान्यंतप्तकृच्छ्रंविशोधनम्
पालनंविक्रयश्चैवनदृत्त्यातूपजीवनम् पातनंतुभवेद्विप्रेत्रिभिः कृच्छ्रैर्व्यपोहति नीलीदारुयदाभिंद्याद्ब्राह्मणस्यशरीरतः शोणितंदृश्यतेयत्रद्विजश्चां
द्रायणंचरेत् स्त्रीणांक्रीडार्थसंभोगेशयनीयेनदुष्यतीति भृगुणाप्युक्तम् स्त्रीधृताशयनेनीलीब्राह्मणस्यनदुष्यति नृपस्यवृद्धौवैश्यस्यपर्ववर्जंविधा
रणमिति तथावस्त्रविशेषकृतश्चप्रतिप्रसवः कंबलेपट्टसूत्रेचनीलीरागोनदुष्यतीतिस्मरणात् ब्राह्मणस्यपलाशतरुनिर्मितखड्गारोहणेशंखवआह
अध्यस्यशयनंयानमासनंपादुकेतथा द्विजःपालाशवृक्षस्यत्रिरात्रंतुव्रतीभवेत् क्षत्रियस्यरणेपृष्ठंदत्वाप्राणपराधणः संवत्सरंव्रतंकुर्याच्छित्वावृ
क्षंफलप्रदम् द्वौविप्रौब्राह्मणाग्नीवादंपतीगोद्विजोत्तमौ अंतरेणयदागच्छेत्कृच्छ्रंसांतपनंचरेत् होमकालेतथादोहेस्वाध्यायेदारसंग्रहे अंतरेणयदा
गच्छेद्विजश्चांद्रायणंचरेदिति दोहेसांनाय्यांगभूते एतच्चाभ्यासविषयम् सन्छिद्रादित्याद्यरिष्टदर्शनादोशंखवआह दुःस्वप्नारिष्टदर्शनादोघृतं
स्रुवर्णंचदद्यादिति क्वचिद्देशविशेषगमनेपिदेवलआह सिंधुसौवीरसौराष्ट्रांतथाप्रत्यंतवासिनः अंगवंगकलिंगांध्रान्गत्वासंस्कारमर्हति एतच्च
तीर्थयात्राव्यतिरेकेणद्रष्टव्यम् यमेनाप्युक्तम् प्रत्यादित्यंनमेद्दृतनपश्येदात्मनःशरुत् दृष्ट्वासूर्यंनिरीक्षेतब्राह्मणंगामथापिवेति शंखोप्याह पा
दप्रतापनंकृत्वाकृत्वावन्हिमधस्तथा कुशैःप्रमृज्यपादौतुदिनमेकंव्रतीभवेदिति क्षत्रियाद्युपसंग्रहणेहारीतआह क्षत्रियाभिवादनेहोरात्रमुपवसेत्
वैश्याभिवादनेद्विरात्रं शूद्रस्याभिवादनेत्रिरात्रमुपवासइति तथाशय्यास्थपादुकोपानहारोपितपादोच्छिष्टांधकारस्थश्राद्धकृज्जपदेवपूजानिरता
भिवादनेत्रिरात्रमुपवासःस्यादन्यत्रनिमंत्रितेनान्यत्रभोजनेपित्रिरात्रमिति समित्सुष्पादिहस्तस्याभिवादनेप्येतदेव समित्सुष्पकुशाज्यांबुमृदुना
क्षतपाणिकम् जपहोमंचकुर्याणंनाभिवाद्येनवैद्विजमित्यापस्तंबीयेजपादिभिः समभिव्याहारात् अभिवादकस्यापीदमेवप्रायश्चित्तम् नोदकुंभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्तमभिवादयेत् नभैक्ष्यंचरन्नपुष्पादिहस्तेनाशुचिर्जपन्नदेवपितृकार्यंकुर्वन्नश्नायानइतितस्यापिशंखेनप्रतिषेधात् अन्यान्यपिवचांसिस्मृत्यं
तरतोन्वेष्याणि ग्रंथगौरवभयान्नलिख्यंते इतिप्रकीर्णप्रायश्चित्तप्रकरणम् २९३ निमित्तानामानंत्यात्प्रतिव्यक्तिप्रायश्चित्तनिमित्तस्यवक्तुमशक्य
त्वात्सामान्यतउपदिष्टानुपदिष्टविषयंप्रायश्चित्तंविशेषज्ञापनार्थमाह यदुक्तंप्रायश्चित्तजातंवक्ष्यमाणंवातद्देशादिकमवेक्ष्ययथाकर्तुः प्राणविपत्तिर्नभ
वतितथाविषयविशेषेकल्पनीयम् इतरथाप्रधाननिवृत्तिप्रसंगात् यथावक्ष्यति वायुभक्ष्योदिवातिष्ठन्रात्रिंनीलाप्तसूर्यदृगिति तत्रयदिहिमव
द्गिरिनिकटवर्त्तिनामुदकवासउपदिश्यतेअतिशीताकुलितेवाशिशिरादिकालेतदाप्राणवियोगोभवेदितितद्देशकालपरिहारेणोदवासः कल्पनीयः

देशकालंवयःशक्तिंपापंचावेक्ष्ययत्नतः प्रायश्चित्तंप्रकल्प्यंस्याद्यत्रचोक्तानिष्कृतिः२९४

तथावयोविशेषादपियदिनवतिवार्षिकादेरपरिपूर्णद्वादशवार्षिकस्यवाद्वादशाब्दिकंप्रायश्चित्तमुपदिश्यतेतदाप्राणाविपद्येरन् ततोवयोविशेषा
दपिअन्यवयस्केतत्प्रायश्चित्तंकल्प्यं अतएवस्मृत्यंतरे क्वचिदर्द्धंक्वचित्सादइतिवृद्धादिषुप्रायश्चित्तस्यह्रासोदर्शितः तच्चप्राक्प्रपंचितं तथाध
नदानतपश्चरणादिशक्त्यपेक्षयाचननिर्धनस्यपात्रेधनंवापर्याप्तमित्याद्युपपद्यते तथाद्विक्लृपात्रादेर्वापराकादिकंनापिस्त्रीशूद्रादेर्जपादिकंअतए
वगजादीनामशक्नुवन्दानंदातुंचरेत्कृच्छ्रमेकैकस्यविरुद्धयेइत्युक्तम् तथाप्रायश्चित्तार्द्धमर्हतिस्त्रियोरोगिणएवचेतितपस्व्यरोक्तस्यस्मृत्यंतरेप्राय
श्चित्तह्रासोदर्शितः पापंचमहापातकादिरूपेणसप्रत्ययाप्रत्ययसकृदभ्यासरूपेणवावेक्ष्ययत्नतःसकलधर्मशास्त्रपर्यालोचनयाप्रायश्चित्तंकल्प्य-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीयम् तत्राकामतोयद्विहितं तदेवकामकृतेद्विर्द्विगुणंकामतोभ्यासेचतुर्गुणमित्येवंस्मृत्यंतरानुसारेणकल्पनीयम् तथा महापापोपपापाभ्यांयो
भिशंसेन्मृषापरम् अब्भक्षोमासमासीतेत्युक्तम् तत्रमहापापोपपापयोस्तुल्यप्रायश्चित्तस्यायुक्तत्वात्पापापेक्षयोपपातकेमासिकव्रतस्यह्रासःक
ल्पनीयः तत्रचसहितज्रंभितास्फोटनानिनाकस्मात्कुर्यात्तथानोदन्वतोंभसिस्नायान्नचश्मश्र्वादिकर्त्तयेत् अंतर्वत्न्याःपतिःकुर्वन्नप्रजाभव
तिध्रुवमित्यादोप्रायश्चित्तंनोपदिष्टम् तत्रापिदेशाद्यपेक्षयाप्रायश्चित्तंकल्प्यम् ननुकिंचिदपिनिमित्तजातंमनूक्तंनिष्कृतिकमुपलभ्यते प्रा-
णायामश्चातंकार्यंसर्वपापापनुत्तये उपपातकजातानामनादिष्टस्यचेवहीत्यनूक्तनिष्कृतिष्वपिप्रायश्चित्तस्यवक्ष्यमाणत्वात् गौतमेनाप्येतान्ये
वानादेशेविकल्पेनक्रियेरन्नित्येकाहादयः प्रतिपादिताः उच्यते सत्यमस्त्येवसामान्यतः प्रायश्चित्तोपदेशस्तथापिसर्वदेशकालादीनाम
पेक्षितत्वादस्त्येवकल्पनावसरः नचहसितादिषुसर्वत्रप्राणायामश्चातंयुक्तंनिमित्तस्यलघुत्वात् अतःपापापेक्षयाह्रासः कल्पनीयः प्राय
श्चित्तांतरंवा ननुकथंपापस्यलघुत्वंयेनप्रायश्चित्तस्यह्रासस्यवाकल्पनास्यात् नचप्रायश्चित्तात्पत्तादितिवाच्यम् अनुक्तनिष्कृतित्वा
देव सत्यं किंचिदर्थवादसंकीर्तनाद्बुद्धिपूर्वाबुद्धिपूर्वानुबंधाद्यपेक्षयाचस्फबोधएवदोषस्यगुरुलघुभावः तथादंडह्रासवृत्त्यपेक्षयाचप्रा
यश्चित्तगुरुलघुभावः यथाब्राह्मणावगोरणादौसजातिविषयेप्राजापत्यादिकमुक्तम् तत्रयदानुलोम्येनप्रातिलोम्येनवावगोरणादिक्रिय
तेयदातदावामूद्धावसिक्तादिभिस्तदादंडस्यनारतम्यदर्शनाद्दोषात्पत्तमहत्त्वावगमात् प्रायश्चित्तस्यापिगुरुलघुभावः कल्पनीयः दर्शितश्चदंडस्य
गुरुलघुभावःप्रातिलोम्यापवादेषुद्विगुणस्त्रिगुणोदमदित्यादिना २९४ एवंमहापातकादिभिः पतितस्यप्रायश्चित्तमुक्तम् यस्त्वोढृत्यादे
तन्नचिकीर्षतितस्यकिंकार्यमित्यतआह जीवतएवपतितस्ययेज्ञातयोबांधवाभ्रातृपक्षास्तेसर्वेसंनिपत्यदासींप्रेष्यतयासपिंडादिप्रेषितयाज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीतमपांपूर्णकंभंग्रामाद्बहिर्निनयेयुः एतच्चतुर्थ्यादिरिक्ततिथिषन्हः पंचमभागेगुर्वादिसंनिधौकार्यस्सपिंडैर्बांधवैःसह निंदितेहनिसायान्हे ज्ञात्यलिंगुरुसन्निधाविति मनुस्मरणात् अथवादास्येवसपिंडादिप्रयुक्तानिनयेत् यथाहमनुः दासीघटमपांपूर्णपर्यस्येत्प्रेतवद्यदा अहो रात्रमुपासीरन्नाशौचंब्राह्मणैःसहेति प्रेतवदितिदक्षिणाभिमुखापसव्ययोः प्राप्त्यर्थं एतच्चनिनयनंउदकपिंडदानादिप्रेतक्रियोत्तरकालंद्रष्टव्यम् तस्यविद्यायोनिगुरुसंबंधाश्चसन्निपात्यसर्वाण्युदकादीनिप्रेतकर्माणिकुर्युः पात्रंचास्यविपर्यस्येयुः दासः कर्मकरोवाचकारात्पात्रमानीयदासीघ टान्पूरयित्वादक्षिणाभिमुखोयदाविपर्यस्येदिदं अमुकमनुदकंकरोमीतिनामग्राहांतंसर्वेन्वालभेरन्प्राचीनावीतिनोमुक्तशिखाविद्यागुरवोयोनि

दासीकुंभंबहिर्ग्रामान्निनयेरन्स्वबांधवाः पतितस्यबहिःकुर्युःसर्वकार्येषुचैवतम् २९५

संबंधाश्चवीक्ष्येरन्ततोपउपस्पृश्यग्रामंप्रविशेयुरितिगौतमस्मरणात् अयंचत्यागोयथाबंधुभिः प्रेर्यमाणोपिप्रायश्चित्तंनकरोतितदाद्रष्टव्यः तस्यगुरुबांधवान्राजसमक्षंदोषानभिख्याप्यानुभाष्यपुनः पुनराचारंलभस्वेतिसयद्येवमप्यनवस्थितमतिःस्यात्ततोस्यपात्रंविपर्यस्येदितिशं खस्मरणात् ततस्तंलब्धोदकपतितंसर्वकार्येषुसंभाषणसहासनादिषुबहिःकुर्युर्वर्जयेयुः तथाचमनुः निवर्त्तेरंस्ततस्तस्मात्संभाषणसहासने दायाद्यस्यप्रदानंचयात्रामेवचलौकिकीमिति यदिस्नेहादिनासंभषणंकरोतितदाप्रायश्चित्तंकार्यम् अतऊर्ध्वंतेनसंभाष्यतिष्ठेदेकरात्रंजपन्सावित्रीमज्ञानपूर्वं ज्ञानंपूर्वंचेत्त्रिरात्रमिति २९५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदातुबंधुत्यागादन्यथावाजातवैराग्यः प्रायश्चित्तंच कृतंतदाकिंकार्यमित्यतआह कृतप्रायश्चित्तेबंधुसमीपंपुनरायातेतत्पिंड्याद्यास्तेनस्
हितानवंअनुपहतंघटंउदकपूर्णंनिनयेयुः एतच्चनिनयनंपुण्यह्रदादिस्नानोत्तरंद्रष्टव्यम् प्रायश्चित्तेतुचरितेपूर्णकुंभमपांनवम् तेनैवसार्द्धंप्रास्य
युःस्नात्वापुण्येजलाशयइतिमनुस्मरणात् गौतमेनतुविशेषउक्तः यस्तुप्रायश्चित्तेनशुध्येततस्मिन्कुंभेशातकुंभमयंपात्रंपुण्यतमात्ह्रदात्पूरयि
त्वास्रवंतीभ्योवाततएनमपउपस्पृशेयुरथास्मैतत्सावंद्युस्तत्संप्रतिगृह्यजपेत् शंताद्यौः शंतापृथिवीशंतश्शिवमंतरिक्षंयोरोचनस्तमिहगृह्णामीत्येते
र्यजुर्भिःपावमानीभिस्तरत्समंदीभिः कूष्मांडैश्चाज्यंजुहुयाद्धिरण्यंदद्याद्गांचाचार्याय यस्यप्राणांतिकंप्रायश्चित्तंसमृतःशुध्येदेतदेवशांत्युदकंस

चरितव्रतआयातेनिनयेरन्नवंघटम् जुगुप्सेरन्नवाप्येनंसंविशेयुश्चसर्वशः २९६
पतितानामेषएवविधिःस्त्रीणांप्रकीर्तितः वासोगृहंतिकंदेयमन्नंवासःसरक्षणम् २९७

र्वेषूपपातकेष्विति ततएनंकृतप्रायश्चित्तंतेनैवकुत्सयेयुः तथासर्वकार्येषुक्रयविक्रयादिषुतेनसहसंव्यवहरेयुः २९६ पूर्वोक्तस्यपतितप
रित्यागादिविधेरतिदेशमाह एवंपुरुषाणांपरित्यागेपिंडोदकदानविधिः कृतप्रायश्चित्तानांपरियहविधिःसएवपतितानांस्त्रीणामपिवेदितव्यः
इयांस्तुविशेषः पतिताभ्योपिस्त्रीभ्यः कृतोदकादिकर्मभ्योवासस्तृणपर्णमयकुटीगृहंप्रधानगृहसमीपेदेयम् तथाप्राणधारणमात्रमन्नंम
लिनंचवस्त्रंपुनः पुरुषांतरोपभोगनिवारणसहितंदेयम् २९७ ५ ५ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुकाःपतितास्तायासामयपरित्यागविधिरित्यतआह हीनवर्णगमनंगर्भपातनमब्राह्मणस्याअपिभवतुः अब्राह्मणस्यापिहिंसनमित्येतानिस्त्रीणामसाधारणानिपतननिमित्तानि अपिशब्दात्पुरुषस्ययानिपतननिमित्तानि महापातकातिपातकानुपपातकान्यस्तानिचोपपातकादीनितान्यपिस्त्रीणांध्रुवंनिश्चितपतनकारणानिभवंति अ तएवशौनकः पुरुषस्ययानिपतननिमित्तानिस्त्रीणामपितान्येवब्राह्मणीहीनवर्णसेवायामधिकूपततीति यत्तुवसिष्ठेन त्रीणिस्त्रियाः पातकानिलोकेधर्म विदोविदुः भर्तुर्वधोभ्रूणहत्यास्वस्यगर्भस्यपातनमिति भ्रूणहत्याग्रहणंकृतंतन् दृष्टांतार्थनपुनरितरेषांमहापातकादीनांपतनहेतुत्वनिरासार्थं यदपि तेनचतत्रस्तुपरित्याज्याः शिष्यगागुरुगाचया पतिघ्नीचविशेषेणजुंगितोपगताचयाइतिचतत्सृणामेवपरित्यागइत्युक्तम् तस्यापित्तासांप्रायश्चित्त

मि. प्रा. ३

नीचाभिगमनंगर्भपातनंभर्तृहिंसनम् विशेषपतनीयानिस्त्रीणामेतान्यपिध्रुवम् २९८
शरणागतबालस्त्रीहिंसकान्संविशेन्नतु चीर्णव्रतानपिसतः कृतघ्नसहितानिमान् २९९

मन्विकीर्षतीनांमध्येचतसृणामेवशिष्यगादीनांचेलान्नगृहवासादिजीवनहेतुत्वाद्युच्छेदेनत्यागंकुर्यात् नान्यासामित्यभिप्रायः अतश्चान्यासांपतिता नांप्रायश्चित्तमकुर्वतीनामपिवासोगृहांतिकेदेयमित्यादिकंकर्त्तव्यमित्यवगम्यते २९८ जुगुप्सेरन्नवाप्येनंसंविशेयुश्चसर्वशइत्यस्यापवादमाह शर णागतादिव्यापादनकारिणः कृतघ्नसहितान्प्रायश्चित्तेनक्षीणदोषानपिसंव्यवहरेदितिवाचनिकोयंप्रतिषेधः किमिदंवचनंकुर्यान्नहिक्वचनस्यातिप्रा रोसि अतश्चयद्यपिव्यभिचारिणीस्त्रीवधेपिइदमेवप्रायश्चित्तंतथापिवाचनिकोयंव्यवहारप्रतिषेधः २९९ ७ ७ ७

११४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंप्रसंगेनस्त्रीषुविशेषमभिधायप्रकृतएवचरितव्रतविधौविशेषमाह घटेपवर्जितेहदादुत्सृत्यपूर्णकुंभेचनिनीतेसौचरितव्रतः सपिंडादिमध्यस्थोगो भ्योयवसंदद्यात् ताभिः प्रथमंसत्कृतस्यपूजितस्यपश्चाज्जात्यादिभिः सत्क्रियाकार्या गोभिश्चैतस्यसत्कारस्तद्दत्तयवसभक्षणमेव यदिगावस्तद्द त्तमन्नंयवसंनगृण्हीयुस्तर्हिपुनः प्रायश्चित्तमुपतिष्ठेत् यथाहहारीतः स्वशिरसायवसमादायगोभ्योदद्याद्यदिताः प्रतिगृण्हीयुरथैनंप्रवर्तयेयुरिति इतरथानेत्यभिप्रेतम् ३०० महापातकादिपंचविधेपिदूषणेप्रातिस्विकव्रतसंदोहमभिधायाधुनासकलव्रतसाधारणंधर्ममाह यद्दोषोयावत्कर्त्तृसंपा द्यस्ततोन्यैर्विख्यातोदोषोयस्यासौपर्षदुपदिष्टंव्रतंकुर्यात् यद्यपिस्वयंसकलशास्त्रार्थविचारचतुरस्तथापिपर्षत्समीपमुपगम्यतयासहविचार्यतदनुम

घटेपवर्जितेज्ञातिमध्यस्थोयवसंगवाम् प्रदद्यात्प्रथमंगोभिःस
त्कृतस्यहिसत्क्रिया ३०० विख्यातदोषःकुर्वीतपर्षदोनुमतंव्रतम्

तमेवकुर्यात् तदुपगमनेचांगिरसाविशेषउक्तः रुतेनिःसरायंपापेनभुंजीतानुपस्थितः भुंजानोवर्द्धयेत्पापंयावन्नाख्यातिपर्षदि सचैलंवाग्यतःस्ना त्वाक्लिन्नवासाः समाहितः पर्षदानुमतस्तत्तत्सर्वंविख्यापयेत्नरः व्रतमादायभूयोपितथास्नात्वाव्रतंचरेदितिविख्यापनंदक्षिणादानानंतरंकार्यम् तथाहप राशरः पापंविख्यापयेत्सापीदत्वाधेनुंतथावृषमितिएतच्चोपपातकविषयम् महापातकादिष्वधिकंकल्प्यम् यदुक्तं तस्माद्द्विजः प्राप्तपापः सकृदापृत्यवा रिणि विख्यायपापंपर्षद्भ्यः किंचिदत्वाव्रतंचरेदितितत्प्रकीर्णकविषयंपर्षत्स्वरूपंचमनुनादर्शितम् त्रैविद्योहैतुकस्तर्कीनैरुक्तोधर्मपाठकः त्रयश्चाश्र-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिणः पूर्वपर्षदेषादशावरा हेतुकउभयमीमांसार्थतत्त्वज्ञः तर्कीन्यायशास्त्रकुशलः तथान्यदपिपर्षद्भूयतेनेवदर्शितम् ऋग्वेदविद्यजुर्वेदसामवेदविदे
वच त्र्यवरापर्षद्विज्ञेयाधर्मसंशयनिर्णयइति तथा एकोपिधर्मविद्धर्मंयंव्यवस्येत्समाहितः सज्ञेयःपरमोधर्मोनाज्ञानादुतितोधुनेरिति आसांच
पर्षदांसंभवापेक्षयाव्यवस्थामहापातकाद्यपेक्षयावा यत्तुस्मृत्यंतरेभिहितम् पातकेषुशतंवर्षसहस्रंमहदादिषु उपपापेषुपंचाशत्स्वल्पंस्वल्पेतथाभवे
दिति तदपिमहापातकादिदोषानुसारेणपर्षदोगुरुलघुभावप्रतिपादनपरंनपुनः संख्यानियमार्थं मन्वादिमहास्मृतिविरोधप्रसंगात् तथादेवलेन
चात्रविशेषोदर्शितः स्वयंतुब्राह्मणाब्रूयुरल्पदोषेषुनिष्कृतिम् राजाचब्राह्मणाश्चैवमहत्स्वरक्षापरिक्षितामिति तयाचपर्षदाअवश्यंव्रतमुपदेष्टव्यम्
आर्त्तानांमार्गमाणा नाप्रायश्चित्तानियेद्विजाः जानंतोनप्रयच्छंतितेयांतिसमतांतुतैरित्यंगिरःस्मरणात् तथाचतयापषदाज्ञात्वैवव्रतमु
पदेष्टव्यम् अज्ञत्वाधर्मशास्त्राणिप्रायश्चित्तंददातियः प्रायश्चित्तीभवेत्सूतः किल्बिषंपर्षदंव्रजेदितिवसिष्ठस्मरणात् क्षत्रियादीनांतुकृतेन
सांधर्मोपदेशेविशेषांगिरसादर्शितः न्यायतोब्राह्मणः क्षिप्रंक्षत्रियादेःकृतेनसः अंतराब्राह्मणंकृत्वाव्रतंसर्वंसमादिशेत् तथाशूद्रंसमासाद्यस
दाधर्मपुरःसरम् प्रायश्चित्तंप्रदातव्यंमंत्रहोमविवर्जितमिति तत्रयागाद्यनुष्ठानशीलानांजपादिकंवाच्यम् इतरेषांतुतपः कर्मनिष्ठास्त
पोनिष्ठाःकदाचित्पापमागताः जपहोमादिकंतेभ्योविशेषेणप्रदीयते येनामधारकाविप्रामूर्खाधनविवर्जिताः कृच्छ्रचांद्रायणादीनिते
भ्योदद्याद्विशेषतइति इतिप्रकाशप्रायश्चित्तप्रकरणम् अथरहस्यप्रायश्चित्तंव्याख्यायतद्धुरितशमिनींव्रतसंततिरहः कृताघसंदोहका
रिणींव्याहरन्मुनिः तत्रप्रथमंसकलरहस्यव्रतसाधारणंधर्ममाह कर्त्तव्यतिरिक्तैरनभिख्यातोदोषोयस्यासौरहस्यम् प्रकाशंप्रायश्चित्तमनुति
ष्ठेत् अतःस्त्रीसंभोगादौतस्यापिकारकत्वात् तदितरैरविज्ञातदोषेरहस्यमितिमंतव्यम् अत्रयदिकर्त्तास्वयंधर्मशास्त्रकुशलस्तदापरस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नविभाव्यस्वनिमित्तोचित्तंप्रायश्चित्तमनुतिष्ठेत् यस्तूस्त्वयमूनभिज्ञोसौकेनचिदंहोब्रह्महत्यादिकंकृतंतत्रकिंरहस्यप्रायश्चित्तमित्यन्यव्याजेनावगम्यअंहोव्रतमनुतिष्ठेत् अतश्चस्त्रीशूद्रयोरप्यमुनैवमार्गेणरहस्यव्रतज्ञानसिद्धेरधिकारसिद्धिः नचवाच्यंरहस्यव्रतानांजपादिप्रधानत्वादविद्ययोश्चस्त्रीशूद्रयोस्तदनुपपत्तेरनधिकारइति यतोनैकांततोरहस्यव्रतानांजपादिप्रधानत्वंदानादेरप्युपदेशात् गौतमोक्तप्राणायामादिसंभवाच्च इतरेषामपिमंत्रदैवतर्षिच्छंदःपरिज्ञानमात्रमेवाधिकारोपयोगिनत्वन्यविषयम् नहितडागनिर्माणादौज्योतिष्टोमादिविषयिणीविप्रतिपत्तिरुपयुज्यते देवतादिपरिज्ञानंत्ववश्यमपेक्षणीयम् अविदित्वाऋषिच्छंदोदैवतंयोगमेवच योध्यापयेज्जपेद्वापिपापीयान्जायतेतुसइति

अनभिख्यातदोषस्तुरहस्यंव्रतमाचरेत् ३०१ त्रिरात्रोपोषितोजप्त्वाब्रह्महात्यघमर्षणम् अंतर्जलेविशुध्यत्येतदत्वागांचपयस्विनीम् ३०२

व्यासस्मरणात् अत्राथाहारविशेषानुक्तोपयःप्रभृतयः कालविशेषानुक्तोसंवत्सरादयः देशविशेषानुक्तौशिलोच्चयादयोगौतमाद्यभिहिताःप्रकाशप्रायश्चित्तेन्वेषणीयाः ३०१ एवंसकलरहस्यसाधारणमूधर्ममभिधायप्रकाशप्रायश्चित्तवद्ब्रह्महत्यादिक्रमेणैवरहस्यप्रायश्चित्तान्याह त्रिरात्रमुपोषितोंतर्जलेघमर्षणेनमहर्षिणादृष्टंसूक्तं अघमर्षणंकृतंचसत्यंचेतितृचामानुष्टुभंभाववृत्तंदेवताकंजप्त्वात्रिरात्रांतेपयस्विनींगांदत्वाब्रह्महाविशुध्यत्यति जप्त्वांतर्जलेनिमग्नेनत्रिरावर्तनीयः यथाहस्मंतुः देवद्विजगुरुहंताप्सुनिमग्नोघमर्षणंसूक्तंत्रिरावर्त्तयेद् मातरंभगिनींगत्वामातृष्वसारंपितृष्वसारंस्नुषांस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रवींचान्यद्वागम्यागमनंकृत्वाघमर्षणमेवांतर्जलेत्रिरावर्त्य तदेतत्सप्तसूतोभवतीति एतच्चकामकारविषयम् यत्तुमनुक्तं सव्याहृतिप्रणवकाःप्राणायामस्तुषोडश अपि भ्रूणहनंमासात्तुनंत्यहरहःकृताः तदप्यस्मिन्नेवविषयेगोदानाशक्तस्यवेदितव्यम् यत्तुगौतमेनषट्त्रिंशदहोरात्रव्रतमुक्त्वोक्तम् तद्व्रतएवब्रह्महत्यासुरापानसुवर्णस्तेयगुरुतल्पेषुप्राणायामैःस्नातोघमर्षणंजपेदिति तदकामतोसकृद्विषयम् यत्तुबौधायनेनोक्तम् ग्रामात्प्राचींचोदिचींदिशमुपनिष्क्रम्यस्नातः शुचिवासाः उदकांतेस्थंडिलमुपलिप्यसकृत्क्लिन्नवासाः सकृत्सूतेनपाणिनादित्याभिमुखोघमर्षणंस्वाध्यायमधीयीतप्रातःशतंमध्यान्हेशतमपराण्हेशतमपरिमितंचोदितेषुनक्षत्रेषुप्रसृतियावकंप्राश्नीयात् ज्ञानतोज्ञानतः कृतेभ्यश्चोपपातकेभ्यः सप्तरात्रात्प्रमुच्यतेद्वादशरात्रान्महापातकेभ्योब्रह्महत्यासुरापानसुवर्णस्तेयानिवर्जयित्वाएकविंशतिरात्रेणतान्यपितरतीतितत्कामकारविषयम् अकामतःश्रोत्रियाचार्यसवनस्थवधविषयंवा यत्तुमनुनोक्तम् अरण्येवात्रिरभ्यस्यप्रयतोवेदसंहिताम् मुच्यतेपातकैःसर्वैःपराकैःशोधितैस्त्रिभिरिति तत्कामतःश्रोत्रियादिवधविषयमितरत्रकामतोभ्यासविषयंवा यत्तुबृहद्विष्णुनोक्तम् ब्रह्महत्यांकृत्वाग्रामात्प्राचीमुदीचींवादिशमुपनिष्क्रम्यप्रभूतेंधनेनाग्निंप्रज्वाल्याघमर्षणेनाष्टसहस्रमाहुतीर्जुहुयात्ततएतस्मात्पूतोभवतीति तन्निर्गुणवधविषयमनुग्राहकविषयंवा यत्तुयमेनोक्तम् त्र्यहंतूपवसेद्युक्तस्त्रिरहोभ्युपयन्नपः मुच्यतेपातकैःसर्वैस्त्रिर्जपित्वाघमर्षणम् तद्गुणवतोहंतुर्निर्गुणवधविषयम् प्रयोजकानुमंतृविषयंवा यत्तुहारीतेनोक्तं महापातकातिपातकानुपपातकानामेकतःसंपातेवाघमर्षणमेवत्रिर्जपेदिति तन्निमित्तकर्तृविषयं एवमन्यान्यपिस्मृतिवाक्यानिअन्विष्यविधिविषयेषुविभजनीयानिग्रंथगौरवभयान्नलिख्यंते एतदेवव्रतजातंयागस्थयोषित्सत्रविद्स्नात्रेय्यामाहिताग्निपत्न्यांगर्भिण्यामविज्ञातेचगर्भे व्यापादितेतुरीयांशान्यूनमनुष्ठेयम् ३०२ ७ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायश्चित्तांतरमाह अथवाहोरात्रमुपोषितोरात्रावुदवासंरुत्वाप्रातर्जलादुत्तीर्यलोमभ्यःस्वाहेत्याद्यैरष्टभिर्मंत्रैरेकैकेनपंचाहुतयइत्येवंचत्वारिंशात्घृता
हुतीर्जुहुयात् इदंचपूर्वोक्तसमानविषयं उदवासस्यतपोबाहुल्यात् ३०३ क्रमप्राप्तंसुरापानप्रायश्चित्तमाह सुरापश्चत्वारिंशात् घृताहुतीरित्यनुवर्त्त
ते सुरापस्त्रिरात्रमुपोषितःकूष्मांडीभिः यद्देवादेवहेडनमित्याद्याभिः कूष्मांडदृष्टाभिरनुष्टुभमंत्रलिंगदेवताभिर्कग्भिश्चत्वारिंशात्घृताहुतीर्हुत्वाशुचिर्भ
वेत् बौधायनेनोक्तम् अथकूष्मांडदृष्टाभिरनुष्टुभिर्जुहुयाद्योपूतएवात्मानंमन्येतयदर्वाचीनमेनोभ्रूणहत्यायास्तस्मान्मुच्यते अयोनोवारेतःसिक्तान्यच
स्वप्नादिति यत्तुमनुना कोत्संजपित्वापीत्येतद्वासिष्ठंचतच्चप्रति माहित्र्यंशुद्धवत्यश्चसुरापोपिविशुध्यतिइतिमासंप्रत्यहंषोडशाकृत्वोपनः शोशुचदघं

लोमभ्यःस्वाहेत्यथवादिवसंमारुताशनः जलेस्थित्वाग्निंजुहुयाच्चत्वारिंशाद्धुताहुतीः ३०३त्रि
रात्रोपोषितोहुत्वा कूष्माडीभिर्घृतंशुचिः ब्राह्मणास्वर्णहारीतुरुद्रजापीजलेस्थितः ३०४

प्रतिस्तोमेभिरुषसंवसिष्ठा
महित्रीणामवोस्त्वेतोन्विंद्रंस्तवामेत्येतेषामन्यतमस्यजपउक्तः सत्रिरात्रोपवासकूष्मांडहोमाशक्तस्यवेदितव्यः एतच्चकामतःपैष्ट्याः सकृत्पानेगौडीमा-
ध्व्योस्कृपानावृत्तौचवेदितव्यम् यच्चमनुना मंत्रैःशाकलहोमीयैरब्दंहुत्वाघृतंद्विजः सगुर्वप्यपहंत्येनोजस्वावानमइत्यृचमिति संवत्सरंप्रत्यहंदेवकृतस्येन
सइत्यादिभिरष्टभिर्मंत्रैर्होमोनमइदुग्रंनमआविवासइत्यस्यावाक्त्रोजपउक्तः सकामकारविषयः यत्तुमहापातकसंयुक्तोनुगच्छेद्वाःसमाहितः अभ्य
स्याब्दंपावमानीभैक्ष्याहारोविशुद्ध्यतीतितदभ्यासविषयम् समुच्चितमहापातकविषयंवा सुवर्णस्तेयप्रायश्चित्तमाह ब्राह्मणस्वर्णहारीपुनस्त्रिरात्रोपोषि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः जलमध्यस्थोनमस्तेरुद्रमन्यवइतिशतरुद्रीयजपयुक्तः शुध्यतीति शातातपेनात्रविशेषउक्तः मद्यंपीत्वागुरुदारांश्चगत्वा ब्रह्महत्यांचकृत्वा भस्माच्छन्नो भस्मशय्यांशयानोरुद्राध्यायीमुच्यतेसर्वपापैरिति जपश्चैकादशाकृत्वःकार्यः एकादशगुणान्वापिरुद्रानावर्त्यधर्मवित् महापापैरपिस्पृष्टोमुच्यतेनात्रसंशय इत्यत्रिस्मरणात् यत्तुमनुना सकृज्जप्त्वास्यवामीयंशिवसंकल्पमेवच ऋवर्णमपहंत्यापिक्षणाद्भवतिनिर्मलइतिद्विपंचाशदृक्संख्याकस्यास्यवामस्यपलित स्यहोतुरितिसूक्तस्य तथायज्ञाग्रतोदूरमुदैतुदैवमितिशिवसंकल्पदृष्टस्यषड्ऋचस्यवासकृज्जपउक्तः सोत्यंतनिर्गुणस्वामिकस्वर्णहरणेगुणवतोपहर्त्तु र्द्रष्टव्यः ऋवर्णान्न्यूनपरिमाणविषयोनुग्राहकप्रयोजकविषयोवा आवृत्तौतुमहापातकसंयुक्तोनुगच्छेदित्यादिनोक्तंद्रष्टव्यम् ३०४ कमप्राप्तंगुरुतल्पग्रा

सहस्रशीर्षाजापीतुमुच्यतेगुरुतल्पगः गौर्दद्याकर्मणोस्यांतेपृथगग्निः पयस्विनी ३०५

यश्चित्तमाह गुरुतल्पगस्तुसहस्रशीर्षेतिषोडशर्चसूक्तंनारायणदृष्टं पुरुषदैवत्यमानुष्टुभंत्रिष्टुबंतंजपंस्तमासापान्मुच्यते सहस्रशीर्षाजापीतितान्छी- ल्यप्रत्ययादावृत्तिर्गम्यते अतएवयमेनोक्तम् पौरुषंसूक्तमावर्त्यमुच्यतेसर्वकिल्बिषादिति आवृत्तौचसंख्यापेक्षायामधस्तनश्लोकगताचत्वारिंशत्संख्या नुमीयते अत्रापिप्राक्तनश्लोकगतंत्रिरात्रोपोषितदृतिसंबध्यते अतएवबृहद्विष्णुः त्रिरात्रोपोषितः पुरुषसूक्तजपहोमाभ्यांगुरुतल्पगः ऋक्ष्येदिति एभि श्चऋरापीसुवर्णस्तेयगुरुतल्पागौस्त्रिभिः पृथक्पृथगस्यत्रिरात्रव्रतस्यांतेबहुक्षीरागौर्दद्या इदमकामविषयम् यत्तुमत्तुना हविष्यांतीयमप्यस्यनतमंहइतीतिच जक्षातुपौरुषसूक्तंमुच्यतेगुरुतल्पगः हविष्यांतीयमजरंस्वर्विदिनतमहोनदुरितंइतिवाइतिमैमनः सहस्रशीर्षेत्येषामन्यतमस्यमासंप्रत्यहंषोडशाऋचांचत्वारिंशत्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ख्याकजपउक्तः सोप्यकामविषयएव कामतस्तुमंत्रैःशाकलहोमीयैरितिमनूक्तंद्रष्टव्यम् यत्तुषट्त्रिंशन्मतेभिहितम् महाव्याहृतिभिर्होमैस्तिलैः कार्योद्विज
न्मना उपपातकशुध्यर्थंसहस्रपरिसंख्यया महापातकसंयुक्तोलक्षहोमेनशुध्यतीतितदावृत्तिविषयम् जपेद्वाप्यस्यवामीयंपावमानीरथापिवा कुंता
पंवालखिल्यांश्चनिविस्त्वैषान्वृषाकपिं होत्रिंरुद्रांसकृज्जप्त्वामुच्यतेसर्वपातकैरिति तद्यभिचारिणीगमनविषयम् यानिपुनः गुरुतल्पादिदेशविषया
णितत्समानिवातिपातकोपपातकपदाभिधेयानितेषुतुरीयांशन्यूनमर्धोनंचक्रमेणवेदितव्यम् पातकातिपातकोपपातकमहापातकानामेकतमेसंनिपाते
वाअघमर्षणमेवत्रिर्जपेदितिहारीतोक्तंद्रष्टव्यम् महापातकसंसर्गिणश्चसतस्यैवव्रतंकुर्यादितिवचनाद्येनसहसंसर्गस्तदीयमेवप्रायश्चित्तम् नचवा

प्राणायामशतंकार्यसर्वपापापनुत्तये उपपातकजातानामनादिष्टस्यचेवहि ३०६

च्यमध्यापनादिसंसर्गस्यानेककर्त्तृकसंपाद्यत्वाद्रहस्यत्वानुपपत्तिरितियतः सत्यप्यनेककर्त्तृत्वेपरदारगमनवत्कर्त्तृव्यतिरिक्ततृतीयाद्यपरिज्ञानमा
त्रेणैवरहस्यत्वम् अतोभवत्येवरहस्यप्रायश्चित्तम् एवमतिपातकादिसंसर्गिणोपितदीयमेवप्रायश्चित्तंवेदितव्यम् इतिमहापातकरहस्यप्रायश्चि
त्तप्रकरणंचतुर्दशम् ३०५ क्रमप्राप्तमुपपातकप्रायश्चित्तमाह गोवधादिषट्पंचाशदुपपातकजातानामनादिष्टरहस्यव्रतानांचजातिभ्रंशकरादीना
मपनुत्तयेप्राणायामानांशतंकार्यम् तथासर्वेषांमहापातकादीनांप्रकीर्णकांतानामप्यपनुत्तयेप्राणायामाः कार्याः तत्रचमहापातकेषुचतुःशतम् अति
पातकेषुत्रिशतं अनुपातकेषुद्विशतमितिसंख्यावृत्तिःकल्पनीया प्रकाशप्रायश्चित्तेषुमहापातकप्रायश्चित्ततुरीयांशस्योपपातकेषुविधानात्प्रकीर्णके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षुच्चहासः कल्प्यः अतएवोक्तंयमेन दशप्रणवसंयुक्तैः प्राणायामैश्चतुर्शतैः मुच्यतेब्रह्महत्यायाः किंपुनः शेषपातकैरिति बौधायनेनाप्यत्रविशेषउक्तः अ
पिवाक्चक्षुः श्रोत्रत्वक्घ्राणमनोव्यतिक्रमेषुत्रिभिः प्राणायामैः शुध्यति शूद्रस्त्रीगमन्नान्नभोजनेषुपृथक्पृथक्सप्तहंससप्तप्राणायामान्धारयेत् अ
भक्ष्याभोज्यामेध्यप्राशनेषुतथावापण्यविक्रयेषुमधुमांसघृततैललाक्षालवणरसान्नवर्जेषुयच्चाप्यन्यदेवंयुक्तंद्वादशाहंद्वादशाद्वादशप्राणायामान्धारये
त् अथपातकोपपातकवर्जंयच्चाप्यन्यदेवंयुक्तंअर्द्धमासंद्वादशाद्वादशप्राणायामान्धारयेत् अथ पातकोपपातकवर्जयच्चाप्यन्यदेवंयुक्तं द्वादशार्द्धमा
सान्द्वादशाद्वादशप्राणायामान्धारयेत् अथपातकपतनीयवर्जंयच्चाप्यन्यदेवंयुक्तं अर्धमासंद्वादशद्वादशप्राणायामान्धारयेत् अथपातकवर्जयच्चा
न्यदप्येवमुक्तं द्वादशार्धमासान्द्वादशप्राणायामान्धारयेत् अथपातकेषुसंवत्सरंद्वादशद्वादशप्राणायामान्धारयेदिति तत्रवावाक्चक्षुरित्यादिप्राणा
यामत्रयं प्रकीर्णकाभिप्रायम् शूद्रस्त्रीगमनान्नभोजनेत्यादिनोक्ता एकोनपंचाशत्प्राणायामाउपपातकाविशेषाभिप्रायाः तथाअभक्ष्याभोज्ये-
त्यादिनोक्ताश्चतुश्चत्वारिंशदधिकशतप्राणायामाअप्युपपातकविशेषाभिप्राया एव अथपातकोपपातकवर्जमित्यादिनोक्ताः साशीतिशतप्राणायामा
जातिभ्रंशकराद्यभिप्रायाः अथपातकपतनीयवर्जमित्यादिनोक्ताः षष्ट्यधिकशतत्रयप्राणायामाः गोवधाद्युपपातकाभिप्रायाः अथपातकवर्जमि
त्यादिनोक्ताः षष्ट्यधिकशतसहितद्विसहस्रसंख्याकाः प्राणायामाः अतिपातकानुपपातकाभिप्रायाः अथपातकेष्वित्यादिनोक्ताविंशत्यधिकशतत्रययु
क्ताश्चतुः सहस्रप्राणायामाः महापातकविषयाः इदंचाभक्ष्यभोज्येत्यादिनोक्तं प्रायश्चित्तपंचकं अत्यंताभ्यासविषयम् समुच्चित्तविषयंवा यत्तुमनुना
एनसांस्थूलसूक्ष्माणांचिकीर्षन्नपनोदनम् अवतेत्यृचंजपेदब्दंयत्किंचिदमितीतिच इत्यब्दंयावत्प्रत्यहमर्थीनराविरुद्धेषुकालेषु अवतेहेळोवरुण
त्यस्याऋचोयत्किंचेदमित्यस्याइतिवाइतिमेमनसइत्यस्याश्चजपउक्तः सोप्यभ्यासविषयः ३० ६ ५ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपपातकसामान्यप्राप्तस्य प्राणायामशतस्यापवादमाह द्विजोरेतोविण्मूत्रप्राशनंकृत्वासोमलतारसमोंकारेणाग्निमंत्रितंशुद्धिसाधनंपिबेत् एतच्चाकामकारविषयम् कामतस्तुसकृत्कृत्वा रेतोविण्मूत्रप्राशनंकृत्वालशुनपलांडुगृंजनकुंभिकादीनामन्येषांचाभक्ष्यादीनांभक्षणंकृत्वाहंसग्रामकुक्कुटश्वशृगालादिमांसभक्षणंकृत्वाततः कंठमात्रमुदकमवतीर्यशुद्धवतीभिः प्राणायामंकृत्वाब्रह्मव्याहृतिभिरुरोगमुदकंपीत्वातदेतस्मात्पूतोभवतीति मनुनापिसप्तविधाभक्ष्यभक्षणेप्रायश्चित्तांतरमुक्तं प्रतिगृह्याप्रतिग्राह्यंभुक्त्वाचान्नंविगर्हितम् जपंस्तरत्समंदीयंपूयतेमानवस्त्र्यहादिति अप्रतिग्राह्यंविषशस्त्रसुरादिपतितादिद्रव्यंच यदात्मक्षरेतोविण्मूत्रादिशारीरंमलंविसृजतितदापितेनैवोक्तम् अप्रशस्तंतुकृत्वाप्सुमासमासीतभैक्ष्यभुगिति ३०७ अज्ञानकृ

ओंकाराभिष्टुतःसोमसलिलंपावनंपिबेत् कृत्वातुरेतोविण्मूत्रप्राशनंतुद्विजोत्तमः ३०७
निशायांवादिवावापियदज्ञानकृतंभवेत् त्रैकाल्यसंध्याकरणात्तत्सर्वंविप्रणश्यति ३०८

तेप्रकीर्णकेमानसेचोपपातकेप्रायश्चित्तमाह रजन्यांवासरेवायत्प्रमादकृतंप्रकीर्णकंमानसंवाचिकंचोपपातकंतत्सर्वंप्रातर्मध्यान्हादिकालत्रयविहितनित्यसंध्योपासनयाप्रणश्यति तथाचयमः यदह्नाकुरुतेपापंकर्मणामनसागिरा आसीनःपश्चिमांसंध्यांप्राणायामैर्निहंतितदिति शातातपेनाप्युक्तम् अनृतंमद्यगंधंचदिवामैथुनमेवच पुनातिवृषलान्नंचसंध्याबहिरुपासितेति ३०८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकलमहापातकादिसाधारणान्पवित्रमंत्रानाह ऋक्कियंनाम अरण्यकविशेषः विश्वानिदेवःसवितरित्यादिवाजसनेयकेपठ्यते आरण्यकंचक्रःवा चंप्रपद्येमनोयज्ञः प्रपद्येइत्यादि तत्रचपठ्यतेतयोर्जपः सकलमहापातकादिहरः तथागायत्र्याश्चमहापातकेषुलक्षमितिपातकानुपातकयोर्दशसहस्रंउप पातकेषुसहस्रंप्रकीर्णकेषुशतमित्येवंविशेषतोजपः सर्वपापहरः तथाचगायत्रीमधिकृत्यश्लोकः शंखेनोक्तः शतंजप्त्वातुसावित्रीमहापातकनाशिनी स हस्रजप्तातुतथापातकेभ्यःप्रमोचीनी दशसाहस्रजाप्येनसर्वकिल्बिषनाशिनी लक्षजप्तातुसादेवीमहापातकनाशिनी स्फवर्णस्तेयरुद्विप्रोब्रह्महागु रुतल्पगः स्फरापश्चविशुध्यंतिलक्षंजप्त्वानसंशयइति चतुर्विंशतिमतेनोक्तं गायत्र्यास्तुजपेत्कोटिंब्रह्महत्यांव्यपोहति लक्षाशीतिंजपेद्यस्तुस्फरा

ऋक्कियारण्यकजपोगायत्र्याश्चविशेषतः सर्वपापहराह्येतेरुद्रैकादशिनीतथा ३०९

पानाद्विमुच्यते पुनातिहेमहर्त्तारंगायत्र्यालक्षसप्ततिः गायत्र्यालक्षषष्ट्यातुमुच्यतेगुरुतल्पगइति तदुरुत्वात्सकाशविषयम् तथारुद्रैकादशिनी एका दशानांरुद्रानुवाकानांसमाहारोरुद्रैकादशिनी साचविशेषतोजप्तासर्वपापहरा एकादशगुणान्चापिरुद्रानावर्त्यधर्मवित् महद्भ्यःसतुपापेभ्योमुच्य तेनात्रसंशयः इतिमहापातकेष्वेकादशगुणावृत्तिदर्शनात् अतिपातकादिषुचतुर्थचर्तुर्थांशह्रासोयोजनीयः चशब्दोघमर्षणादिसमुच्चयार्थः यथाह वसिष्ठः सर्ववेदपवित्राणिवक्ष्याम्यहमतःपरम् येषांजपैश्चहोमैश्चपूयंतेनात्रसंशयः अघमर्षणंदेवकृतंशुद्धवत्यस्तरत्समाः कूष्मांड्यः पावमान्यश्चदुर्गा सावित्र्यथैवच अग्निषंगाः पदस्तोमाः सामानिव्याहृतीस्तथा भारुंडानिचसामानिगायत्रंरैवतंतथा पुरुषव्रतंचभासंचतथादेवव्रतानिच अल्लिंगाबार्ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्पत्यंवावाक्सूक्तंमधुमत्तथा शतरुद्रीयाथर्वशिरस्त्रिसुपर्णीमहाव्रतम् गोसूक्तंचाश्वसूक्तंचइंद्रसूक्त्येवसामनी त्रीण्याज्यदोहानिरथंतरंचअग्नेर्व्रतं वामदेव्यंबृहच्च एतानिगीतानिपुनंतिजतून् जातिस्मरत्वंलभतेयदिच्छेदिति ३०९ किंच यत्रयत्रब्रह्मवधादोतज्जनितदोषजातेनात्मानंसंकीर्णमपि भूतंद्विजोमन्यतेतत्रतत्रगायत्र्यातिलैर्होमःकार्यः तत्रमहापातकेषुगायत्र्यालक्षहोमःकार्यः गायत्र्यालक्षहोमेतुमुच्यतेसर्वपातकैरितियमस्मरणा त् अतिपातकादिषुपादह्रासःकल्पनीयः तथातिलैर्वाचनंकार्यम् तथारहस्याधिकारेवसिष्ठः वैशाख्यांपौर्णमास्यांचब्राह्मणान्पंचसप्तच क्षीद्रयु क्तैस्तिलैःकृष्णैर्वाचयेदथवेतरैः प्रीयतांधर्मराजेतियद्वामनसिवर्त्तते यावज्जीवकृतंपापंतत्क्षणादेवनश्यतीति अनयितकालमपिदानंतेनैवोक्तं कृष्णा

यत्रयत्रचसंकीर्णमात्मानंमन्यतेद्विजः तत्रतत्रतिलैर्होमोगायत्र्यावाचनंद्विजः ३१०

जिनेतिलान्कृत्वाहिरण्यंमधुसर्पिषी ददातियस्कविप्रायसर्वंतरतिदुष्कृतमिति तथाव्यासेनाप्युक्तम् तिलधेनुंचयोदद्यात्संयतात्माद्विजन्मने ब्रह्म हत्यादिभिः पापैर्मुच्यतेनात्रसंशयइति एवमादिदानज्ञानंरहस्यकांडोक्तमविदुषांद्विजातीनांस्त्रीशूद्रयोश्चवेदितव्यम् यत्तुयमेनोक्तम् तिलान्ददाति-यः प्रातस्तिलान्स्पृशतिखादति तिलस्नायीतिलान्जुह्वन्सर्वंतरतिदुष्कृतम् तथाद्वेचाष्टम्योतुमासस्यचतुर्दश्यांतथैवच अमावास्यापूर्णमासीसप्त मीद्वादशीद्वयम् संवत्सरमश्नुजानः सततंविजितेंद्रियः मुच्यतेपातकैःसर्वैःस्वर्गलोकंचगच्छतीति यच्चात्रिणोक्तम् क्षीराब्धौशेषपर्यंकेआषाढ्यांसंवि शेद्धरिः निद्रांत्यजतिकार्तिक्यांतयोः संपूजयेद्धरिम् ब्रह्महत्यादिकंपापंक्षिप्रमेवव्यपोहतीत्यादि तत्सर्वविद्याविरहिणांकामाकामसकृदभ्यासविषय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयाव्यवस्थापनीयम् ३१० किंचाह वेदस्वीकरणंपूर्वंविचारोभ्यसनंतपः तद्दानंचैवशिष्येभ्योवेदाभ्यासोहिपंचधेति उक्तक्रमेणवेदाभ्यासनिरतंतिति क्षायुक्तंपंचमहायज्ञानुष्ठाननिरतम् महापातकजान्यपिपापानिनस्पृशंति किंपुनःप्रकीर्णकजानिवाङ्मनसजन्योपपातकानिचेत्यत्रतात्पर्यमपिशब्दा लुक्ष्यते एतच्चाकामकारविषयम् अतएववसिष्ठेन यदाकार्यशतंसाग्रंकृतंवेदश्चधार्यते सर्वतत्तस्यवेदाग्निर्दहत्यग्निरिवेंधनमितिप्रकीर्णकाद्यभिप्रायेणा भिधायाभिहितम् नवेदबलमाश्रित्यपापकर्मरतिर्भवेत् अज्ञानाच्चप्रमादाच्चदह्यतेकर्मनैतरत् ३११ किंच सोपवासोवासरमुपविशन्उषित्वासलिलेवस- न्निशांनीत्वादित्योदयानंतरंसावित्र्याः सहस्रंजपित्वाब्रह्मवधव्यतिरिक्तसकलमहापातकादिपापजातान्मुच्यते अतश्चोपपातकादिष्वभ्यासेनेकदोषसमु

वेदाभ्यासरतंक्षांतंपंचयज्ञक्रियापरम् नस्पृशंतीहपापानिमहापातकजान्यपि ३११
वायुभक्षोदिवातिष्ठन्रात्रिंनीत्वाप्सुसूर्यदृक् जप्त्वासहस्रंगायत्र्याःशक्त्यैब्रह्मवधादृते ३१२

च्चयेवावेदितव्यम् विषमविषयसमीकरणस्यान्याय्यत्वात् अतएववृद्धवसिष्ठेनमहापातकोपपातकयोः कालविशेषेण व्रतविशेषउक्तः यथाहयवा नांप्रसृतिमंजलिंवाश्नन्यमाणंधृतंचाग्निमंत्रयेत् यन्मेसिध्यन्यराजस्त्वंवारुणोमधुसंयुतः निर्णोदःसर्वपापानांपवित्रमृषिभिःस्मृतइत्यनेन घृतंयवामधुयवाःपवित्रमसृतंय वाः सर्वपुनंतुमेपापंवाङ्मनःकायसंभवमित्यनेनवा अग्निकार्यंनकुर्वीतत्तेवभूतबलिंतथा नाश्नन्नग्निक्षांनातिथ्यांनचोच्छिष्टंपरित्यजेत् येदेवामनो जातामनोयज्ञसदक्षादक्षपितरः तेनः पांतुतेअवंतुतेभ्योनमस्तेभ्यः स्वाहेत्यात्मनिजुहुयात्त्रिरात्रंमेधाग्निवृद्धयेपापक्षयायत्रिरात्रसप्तरात्रंब्रह्मेत्यादिषुद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशरात्रं पतितोत्पन्नश्चेत्येतद्विगवलंबनेनान्यान्यपिस्मृतिवचनानिविवेचनीयानि इतिरहस्यप्रायश्चित्तप्रकरणंपंचदशम् ३१२ विनिसुक्तव्रतव्रातरूपभेदेबुभुत्सिते कीदृक्षमितिसंक्षेपाल्लक्षणंवक्ष्यतेधुना तत्रतावत्सकलप्रकाशरहस्यव्रतांगभूतान्धर्मानाह ब्रह्मचर्यसकलेंद्रियसंयमः उपस्थनियहोलिंग नियहः गोबलीवर्दन्यायेननिर्दिष्टः अकल्पताअकुटिलता शेषः प्रसिद्धः यत्पुनर्मनुनोक्तम् अहिंसासत्यमक्रोधमार्जवंचसमाचरेदितितदप्येतेषामुपलक्षणंनपरिगणनाय अत्रचदयाक्षांत्यादीनांपुरुषार्थतयाप्राप्तानामपिपुनर्विधानं प्रायश्चित्तांगत्वार्थं क्वचिद्विशेषोप्यस्ति यथाविवाहादिष्वभ्यनुज्ञात

ब्रह्मचर्यदयाक्षांतिर्दानंसत्यमकल्पता अहिंसास्तेयमाधुर्यंह्रीरमश्चेतियमाःस्मृताः ३१३ स्नानं
मौनोपवासेज्यास्वाध्यायोपस्थनियहाः नियमागुरुशुश्रूषाशौचाक्रोधोप्रमादता ३१४ गो
मूत्रगोमयक्षीरंदधिसर्पिःकुशोदकम् जग्ध्वापरेह्युरुपवसेत्कृच्छ्रंसांतपनंपरम् ३१५

स्याष्यनृतवचनस्यनिवृत्त्यर्थंसत्यत्वविधानम् पुत्रशिष्यादिकमपिताडनीयमित्येवमर्थमहिंसाविधानमित्येवमादि ३१३ ३१४ तत्रसांतपनारव्यंव्रतंतावदाह पूर्वेद्युराहारांतरपरित्यागेनगोमूत्रादीनिपंचगव्यानिपंचद्रव्याणिकुशोदकसहितानिसंयुज्यपीत्वाअपरेद्युरुपवसेदितिहैवात्रः सांतपनः कृच्छ्रः संयोजनंचोत्तरश्लोकपृथक्त्वविधानादवगम्यते कृच्छ्र इतिचान्वर्थसज्ञेयम् तयोरुपवासेनक्लेशसाध्यत्वात् गोमूत्रादीनांपरिमाणंवक्ष्यते यदापुनः पूर्वेद्युरुपोष्यापरेद्युः समंत्रकंसंयुज्य समंत्रकमेवपंचगव्यंपीयते तदा ब्रह्मकूर्च इत्याख्यायते यथाहपाराशरः गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्दिष्टंपंचगव्यंतुप्रत्येकंकायशोधनम् गोमूत्रंताम्रवर्णायाःश्वेतायाश्चापिगोमयं पयःकांचनवर्णायानीलायाश्चतथादधि घृतंचकृष्णावर्णायाःसर्वकापिलमेवच अलाभेसर्ववर्णानांपंचगव्येष्वयंविधिः गोमूत्रेमाषकात्पष्टौगोमयस्यतुषोडश क्षीरस्यद्वादशप्रोक्तादध्नस्तदशकीर्त्तिताः गोमूत्रवत्घृतस्याष्टौतद्दृष्टंकुशोदकम् पंचगव्यमृचापूतंहोमयेदग्निसंनिधौ सप्तपत्राश्चयेदर्भाअच्छिन्नाग्राःशुचिविषः एतैरुत्पृत्यहोतव्यंपंचगव्यंयथाविधि इरावतीइदंविष्णुर्मानस्तोकेचशंवती एताभिश्चैवहोतव्यंहुतशेषंपिबेद्द्विजः प्रणवेनसमालोड्यप्रणवेनाभिमंत्र्यच प्रणवेनसमुत्पृत्यपिबेत्तत्प्रणवेनतु मध्यमेनपलाशस्यपद्मपत्रेणवापिबेत् स्वर्णपात्रेणताम्रेणब्रह्मतीर्थेनवापुनः यत्तगस्थिगतंपापंदेहेतिष्ठतिमानवे ब्रह्मकूर्चोपवासस्तुदहत्यग्नि

पृथक्सांतपनंद्रव्यैःषडहःसोपवासकः सप्ताहेनतुकृच्छ्रोयंमहासांतपनःस्मृतः ३१५

रिवेंधनमिति यदात्वेतदेवपंचगव्यंमिश्रितंत्रिरात्रमभ्यस्यतेतदायतिसांतपनसंज्ञांलभते एतदेवत्र्यहाभ्यस्तंयतिसांतपनंस्मृतमितिशंखस्मरणात् जाबालेनतुसप्ताहसाध्यसांतपनमुक्तम् गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् एकैकंप्रत्यहंपीत्वात्रहोरात्रमभोजनम् कृच्छ्रंसांतपनंनामसर्वपापप्रणाशनमिति एषांचगुरुलघुकृच्छ्राणांशक्त्याद्यपेक्षयाव्यवस्थाविज्ञेया एवमुत्तरत्रापिव्यवस्थाबोद्धव्या ३१५ महासांतपनाख्यंव्रतमाह सप्ताहेनापवर्जितोमहासांतपनाख्यःकृच्छ्रोविज्ञेयः कथमित्यपेक्षायामुक्तम् पृथग्भूतैःषड्भिर्गोमूत्रादिभिरेकैकेनैकैकमहारात्रिनिर्वाहयेत् सप्तमंचोपवासेनेति यमेनतुपंचदशाहसंपाद्योमहासांतपनोभिहितः त्र्यहंपिबेत्तुगोमूत्रंत्र्यहंवैगोमयंपिबेत् त्र्यहंदधित्र्यहंक्षीरंत्र्यहंसर्पिस्ततःशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिः महासांतपनंह्येतत्सर्वपापप्रणाशनमिति जाबालेनत्रैकविंशतिरात्रनिर्वर्त्योमहासांतपनउक्तः षण्णामेकैकमेतेषांत्रिरात्रमुपयोजयेत् अहंचोपवसेदित्यंमहासांतपनंविदुरिति यदातुषण्णांसांतपनद्रव्याणामेकैकस्यद्यहमुपयोगस्तदाअतिसांतपनम् यथाह्ययमः एतान्येवतथापेयादेकैकंतुद्यहंद्यहम् अतिसांतपनंनामश्वपाकमपिशोधयेदिति श्वपाकमपिशोधयेदित्यर्थवादः ३१६ पर्णकृच्छ्राख्यंव्रतमाह पलाशोदुंबरारविंदश्रीवृक्षपर्णानामेकैकेन कथितमुदकंप्रत्यहंपिबेत् कुशोदकंचैकस्मिन्निति पंचाहसाध्यः पर्णकृच्छ्रः यदातुपर्णादीनामेकैकानांक्वाथस्त्रिरात्रांतेपीयते तदापर्णकूर्चः यथाह्ययमः एतान्येवसमस्तानित्रिरात्रोपोषितः शुचिः क्वाथयित्वापिबेदद्भिःपर्णकूर्चोभिधीयतेइति यत्तुबिल्वादिफलानिप्रत्येकंकथितानिमासंपीयंतेतदाफलकृच्छ्रादिव्यपदेशंलभंते यथाहमार्कंडेयः फलैर्मासेनकथितः फलकृच्छ्रोमनीषिभिः श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा मासेनामलकैरेवंश्रीकृच्छ्रमपरंस्मृतम् पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते मूलकृच्छ्रःस्मृतोमूलैस्तोयकृच्छ्रोजलेनत्विति ३१७ तप्तकृच्छ्रव्रतमाह तप्तद्रुग्धसर्पिरुदकानांतप्तानामेकैकंप्रतिदिवसंप्राश्यापरेद्युरुपवसेत् एषदिवसचतुष्टयसंपाद्योमहातप्तकृच्छ्रः एभिरेवसमस्तैःसोपवासैर्द्विरात्रसंपाद्यःसांतपनवत्तप्तकृच्छ्रः मनुनातुह्यादशरात्रनिर्वर्त्योभिहितः तप्तकृच्छ्रंचरन्निप्रोजनक्षीरधृतानिलात् प्रतित्र्यहंपिबेदुष्णान्सकृत्स्नायीसमाहितइति क्षीरादिपरिमाणंतुपराशरेणोक्तंद्रष्टव्यम् अपांपिबेत्तुत्रिपलंद्विपलंतु

पर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः प्रत्येकंप्रत्यहंपीतैःपर्णकृच्छ्रउदाहृतः ३१७ तप्त
क्षीरघृतांबूनामेकैकंप्रत्यहंपिबेत् एकरात्रोपवासश्चतप्तकृच्छ्रउदाहृतः ३१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पयःपिबेत् पलमेकंपिबेत्सर्पिस्त्रिरात्रंचोष्णमारुतमिति त्रिरात्रंचोष्णमारुतमितित्रिरात्रस्यपूर्णउष्णोदकबाल्यंपिबेदित्यर्थः यदातुशीतंक्षीरादिपीयतेनदा
शीतंकृच्छ्रः त्र्यहंशीतंपिबेत्तोयंत्र्यहंशीतंपयःपिबेत् त्र्यहंशीतंघृतंपीत्वावायुभक्षःपरंत्र्यहमितिस्मरणात् ३१८ पादकृच्छ्रमाह एकभुक्तेनसकृद्भोजनेन
दिवैव नक्तेनेतिपृथगुपादानात् अतश्चदिवैवैकवारमेवभोजनेनैवैकमहोरात्रमितियाह्यदिति तत्रदिवेतिरात्रिव्युदासः एकवारमितिद्विवारादिव्यदासः
भोजनेनेत्यभोजनेव्युदासः एतच्चकृच्छ्रादीनांव्रतरूपत्वात्पुरुषार्थभोजनपर्युदासेनकृच्छ्रांगभूतंभोजनंविधीयते तथाचापस्तंबः त्र्यहमनक्ताश्य
दिवाशीततरुत्र्यहमयाचितव्रतइति अत्रचानक्ताशीत्यनेनव्रतविहितेननिनिप्रत्ययेननक्तपर्युदासेनदिवाभोजननियमंदर्शयति गौतमेना

एकभुक्तेननक्तेनतथैवायाचितेनच उपवासेनचैवायंपादकृच्छ्रःप्रकीर्त्तितः ३१९

पीदमेवस्पष्टीकृतम् हविष्यंप्रातराशीभुक्त्वातिस्रोरात्रीर्नाश्नीयादिति एवंनक्तभोजनविधावपि नविद्यतेयाचितंयस्मिन्भोजनेतदयाचितमिति तेन
कालविशेषानुपादानाद्दिवारात्रौवासकृदित्येव तपोरूपत्वात्कृच्छ्राणांद्वितीयभोजनेतदनुपपत्तेः अयाचितमितिनकेवलंपरकीयान्नयाचनप्रतिषे-
धोपितुस्वकीयमितिपरिचारकभार्यादिभ्योनयाचितव्यम् प्रेषणाध्येषणयोःसाधारणत्वात्तूयाच्चायाः अतःस्वगृहेपिभृत्यभार्यादयोअनाज्ञप्ताएव
यदिभोजनमुपहरंतितर्हिभोक्तव्यंनान्यथा अस्मृनैवाग्निप्रायेणोक्तंगौतमेन अश्वापरंत्र्यहंनकंचनयाचेतेति अत्रचग्रासंख्यानियमःपराशरेण
दर्शितः सायंतुद्वादशग्रासाः प्रातःपंचदशस्मृताः चतुर्विंशतिराचाम्याःपरंनिरशनंस्मृतमिति आपस्तंबेनत्वन्यथोक्तम् सायंद्वाविंशतिग्रासाःप्रातः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षड्विंशतिः स्मृताः चतुर्विंशतिरायाच्याः परं निरशनास्त्रयः कुक्कुटांडप्रमाणस्तु यथावास्यं विशेत्करवमिति अनयोश्चकल्पयोः शक्त्यपेक्षया विकल्पः आपस्तं
बेनतु प्राजापत्य प्रायश्चित्तं चतुर्विधाविभज्य चतुरः पादकृच्छ्रान्कृत्वा वर्णानुरूपेणव्यवस्थादर्शिता त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् सायं त्र्यहं त
थापादः पादः प्रातस्तथात्र्यहम् प्रातः पादं चरेच्छूद्रः सायं वैश्यस्यदापयेत् अयाचितं तु राजन्ये त्रिरात्रं ब्राह्मणेस्मृतमिति यदात्वयाचितोपवासात्मक त्र्यहद्वया
नुष्ठानं तदार्धकृच्छ्रः सायं व्यतिरिक्ता परत्र्यहानुष्ठानं तु पादोनमितिविज्ञेयम् सायं प्रातर्विनार्द्धस्यात्पादोनंनक्तवर्जितमिति तेनैवोक्तत्वात् अर्द्धकृच्छ्रस्यप्रा
कारांतरमपितेनैवदर्शितम् सायंप्रातस्तथैकैकं दिनद्वयमयाचितम् दिनद्वयं चनाश्नीयात्कृच्छ्रार्द्धंतद्विधीयते इति ३१९ प्राजापत्यंकृच्छ्रमाह अयमेव

यथाकथंचिद्त्रिगुणः प्राजापत्योयमुच्यते

पादकृच्छ्रः यथाकथंचिद्दंडकालितवदावृत्त्यास्वस्थानविवृत्त्यावातत्राप्यानुलोम्येन प्रातिलोम्येनवातथावक्ष्यमाणजपादियुक्तं तद्रहितवात्रिरभ्यस्तः प्रा
जापत्यंविधीयते तत्रदंडकालितवदावृत्तिपक्षोवसिष्ठेनदर्शितः अहः प्रातरहर्नक्तमहरेकमयाचितम् अहः पराकंतत्रैकमेवंचतुरहोपरो अनुग्रहार्थंविप्रा
णांमनुर्धर्मभृतांवरः बालवृद्धातुरेष्वेवंशिशुकृच्छ्रमुवाचेति आनुलोम्येनस्वस्थानवृद्धिपक्षस्तमनुनादर्शितः त्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितम्
परंत्र्यहंचनाश्नीयात्प्राजापत्यंचरेद्द्विजइति प्रातिलोम्यावृत्तिस्तुवसिष्ठेनदर्शिता प्रातिलोम्यंचरेद्विप्रः कृच्छ्रंचांद्रायणोत्तरमिति जपादिरहितपक्षस्त
स्त्रीशूद्रादिविषयेंगिरसादर्शितः तस्माच्छूद्रंसमासाद्यसदाधर्मपथेस्थितम् प्रायश्चित्तं प्रदातव्यं जपहोमादिवर्जितमिति जपादियुक्तपक्षस्तपरिशेषाद्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्यतयाचत्रैवर्णिकविषयः सचगोतमादिभिर्दर्शितः अथातः कृच्छ्रान्व्याख्यास्यामोहविष्यान्नातराशान्मुक्त्वातिस्रोरात्रीर्नाश्नीयादथापरंव्यहंनक्तभुंजीथापरंव्यहंनकंचनयाचेत्तथापरंव्यहमुपवसंस्तिष्ठेदहनिरात्रावासीतक्षिप्रकामः सत्यंवदेदनार्यैः सहनभाषेतरौरवयोधांजपेन्नित्यंप्रयुंजीतानुसवनमुदकोपस्पर्शनमापोहिष्ठेतितिसृभिः पवित्रवतीभिर्मार्जयीत हिरण्यवर्णाः शुचयः पावकाइत्यष्टाभिरथोदकतर्पणम् नमोहमायमोहमायमंहमायधन्वने तापसायपुनर्वसेनमः मौंज्याय और्म्यायवस्फुर्विंदायसर्ववर्णविंदायनमः पारायस्फुपाराय महापाराय पारदाय पारयिष्णवेनमः रुद्रायपशुपतये महतेदेवायत्र्यंबकायैकचरायाधिपतयेहरायशर्वायेशानाय उग्रायवज्रिणे घृणिने कपर्दिनेनमः सूर्यायादित्यायनमः नीलग्रीवायशितिकंठायनमः कृष्णायपिंगलायनमः ज्येष्ठायश्रेष्ठायवृद्धायेंद्रियाय हरिकेशायऊर्ध्वरेतसेनमः सत्यायपावकाय पावकवर्णायैकवर्णायकामायकामरूपिणेनमः दीप्तायदीप्तरूपिणेनमः तीक्ष्णायतीक्ष्णरूपिणेनमः सौम्यायपुरुषाय महापुरुषायमध्यमपुरुषायउत्तमपुरुषायब्रह्मचारिणेनमः चंद्रललाटायकृत्तिवाससेनमइति एतदेवादित्योपस्थानमेताएवाज्याहुतयोद्वादशरात्रस्यांतेचरुंश्रपयित्वाएताभ्योदेवताभ्योजुहुयादग्नयेस्वाहासोमायस्वाहाग्नीषोमाभ्यामिंद्राग्निभ्यामिंद्रायविश्वेभ्योदेवेभ्योब्रह्मणेप्रजापतयेमयेस्विष्टकृतेइति अंतेब्राह्मणभोजनमिति तत्रतिष्ठेदहनिरात्रावासीतक्षिप्रकामइत्यस्यार्थः यस्तुमनसोप्येनसःक्षिप्रमेकेनैवकृच्छ्रेणक्षिप्रंमुच्येयमित्येवंकामयतेअसावहनिकर्मावि रुद्धेषुकालेषुतिष्ठेद्रात्रावासीतएवंरौरवयोधारव्यसामजपोनमोहमायेत्यादिभिस्तर्पणादित्योपस्थानादिकंचरुश्रपणादिकंचयोगीश्वराद्यनुक्तंक्षिप्रकामः कुर्वीत अतश्चयोगीश्वराद्युक्तप्राजापत्यद्वयस्थानेगोतमीयमनेकेतिकर्त्तव्यतासहितंद्रष्टव्यम् एवमन्यान्यपिस्मृत्यंतरोक्तानिविशेषणान्वेषणीयानि ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिकृच्छ्रमाह एतद्धर्मक एव एकभक्तादि प्राजापत्यधर्मयुक्तोतिकृच्छ्रः स्यात् इयांस्तु विशेषः आद्येऽह्नयेपाणिपूरणमात्रमन्नंभुंजीतनपुनर्द्वाविंशत्यादिग्रासान् अत्रचप्राप्तभोजनानुवादेनपाणिपूरान्नविधानादंत्यत्र्यहेतिदेशमात्रउपवासोप्रतिपक्षएव अत्रापिपादशोव्यवस्थापूर्ववदेवद्रष्टव्या यत्तुमनुनोक्तं एकैकंग्रासमश्नीयात्त्र्यहाणित्रीणिपूर्ववत् त्र्यहंचोपवसेदंत्यमतिकृच्छ्रंचरेत् द्विज इति तत्पाणिपूरान्नपरिमितत्वादल्पत्वाच्छक्तविषयम् ३२० कृच्छ्रातिकृच्छ्रमाह एकविंशतिरात्रंपयसावर्त्तनंकृच्छ्रातिकृच्छ्राख्यंव्रतंविज्ञेयम् गौतमेनतुद्वादशरात्रमुदकेनवर्त्तनंकृच्छ्रातिकृच्छ्र इत्युक्तम् अ

अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः ३२० कृच्छ्रातिकृच्छ्रःपसादिवसानेकविंशतिम् द्वादशाहोपवासेनपराकःपरिकीर्त्तितः ३२१ पिण्याकाचामतक्राबुसक्तूनांप्रतिवासरम् एकरात्रोपवासश्चकृच्छ्रःसौम्योयमुच्यते ३२२ एषांत्रिरात्रमभ्यासादेकैकस्ययथाक्रमम् तुलापुरुषइत्येषज्ञेयःपंचदशाहिकः ३२३

अक्षस्तृतीयः सकृच्छ्रातिकृच्छ्र इति अतश्चशक्त्यपेक्षयातयोर्व्यवस्था पराकमाह ऋज्वर्थोयमर्द्धश्लोकः ३२१ सौम्यकृच्छ्रमाह पिंडयोदननिस्रावोदश्विदुदकसक्तूनांपंचानांएकैकं प्रतिदिवसमुपयुज्यषष्ठेन्हिउपवसेदेषसौम्याख्यः कृच्छ्रोभिधीयते द्रव्यपरिमाणंतुप्राणयात्रामात्रनिबंधनमधिगंतव्यम् जाबालेनतुचतुरह्व्यापीसौम्यकृच्छ्रउक्तः पिण्याकंसक्तवस्तक्रंचतुर्थेहन्यभोजनम् वासोवैदक्षिणांदद्यात्सौम्योयंकृच्छ्रउच्यते इति ३२२ तुलापुरुषाख्यंकृच्छ्रमाह एषांपिण्याकादीनांपंचानांक्रमेणैकैकस्यत्रिरात्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्यासेनपंचदशाहव्यापीतुलापुरुषारव्यःकृच्छ्रोवेदितव्यः अत्रपंचदशाहिकत्वविधानादुपवासस्यनिवृत्तिः यमेनत्वेकविंशतिरात्रिकस्तुलापुरुष उक्तः आचामम्यथपिण्याकंतक्रंचोदकसक्तुकान् त्र्यहंत्र्यहंप्रयुंजानोवायुभक्षस्त्र्यहंहूयम् एकविंशतिरात्रस्तु तुलापुरुषउच्यत इतिहारीतोक्तेति कर्त्तव्यतायंथगौरवभयान्नलिख्यते ३२३ चांद्रायणमाह चांद्रायणारव्यंव्रतंकुर्यात्मयूरांडपरितान्पिंडान् शुक्ले आपूर्यमाणेपक्षेतिथिवृद्ध्याचरेत्तभक्षयेत् यथाप्रतिपत्प्रभृतिषुचंद्रकलानामेकैकशोवृद्धिरर्द्धमासेनतद्वत्पिंडानामपिप्रतिपद्येकोद्वितीयायांद्वावित्येवमेकैकशोवर्द्धयन्भक्षयेद्यावत्पौर्णमासीततः पंचदश्यांपंचदशग्रासान्भुक्त्वाततः कृष्णपक्षेचतुर्दशप्रतिपदिद्वितीयायांत्रयोदशेत्येवमेकैकशोग्रासान्ह्रासयन् अश्नीयात् यावच्चतुर्दशीततश्चतुर्दश्यामे

तिथिवृत्त्याचरेत्पिंडान्शुक्लेशिरव्यंडसंमितान् एकैकंह्रासयेत्कृष्णेपिंडंचाद्रायणंचरन्३२४

कंग्रासंग्रसित्वाइंदुक्षयेअर्थादुपवसेत् तथाचवसिष्ठः एकैकंवर्द्धयेत्पिंडंशुक्लेकृष्णेचह्रासयेत् इंदुक्षयेनभुंजीतएषांचांद्रायणेविधिरिति चंद्रस्यायनमिवायनंचरणंयस्मिन्कर्मणिह्रासवृद्धिभ्यांतच्चांद्रायणम् संज्ञायांदीर्घः इदंचयववत्प्रांतयोरणीयःमध्येस्थवीयइतियवमध्यमितिकथ्यते एतदेवव्रतं यदाकृष्णपक्षप्रतिपदिप्रक्रम्यपूर्वोक्तक्रमेणानुष्ठीयतेतदापिपीलिकावन्मध्यमितिकथ्यते तथाहि पूर्वोक्तक्रमेणकृष्णपक्षप्रतिपदिचतुर्दशग्रासान्भुक्त्वाएकैकग्रासापचयेनचतुर्दशींयावद्भुंजीत ततश्चतुर्दश्यामेकंग्रासंग्रसित्वामावास्यायासुपोष्यशुक्लप्रतिपदिएकमेवग्रासंप्राश्नीयात् ततएकोपचयभोजनेनपक्षशेषंनिर्वर्त्यमानेपौर्णमास्यांपंचदशग्रासाः संपद्यंत इतियुक्तैवपिपीलिकामध्यता तथाचवसिष्ठः मासस्यकृष्णपक्षादौग्रासानद्याच्चतुर्दश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रासान्पंचचभोजीसन्पक्षशेषंसमापयेत् तथैवशुक्लपक्षादौग्रासंभुंजीतचापरम् ग्रासोपचयभोजीसन्पक्षशेषं समापयेदिति यदात्वेकस्मिन्यक्षशेषंसमापयेदि
ति यदात्वेकस्मिन्पक्षे तिथिवृद्धि ह्रासवशात्षोडशादिनानिभवंतिचतुर्दशावातदाग्रासानामपिवृद्धि ह्रासौवेदितव्यौ तिथिवृत्त्यापिंडांश्चरेदितिनियमात् गौत
मेनतत्रविशेषोदर्शितः अथातश्चांद्रायणंतस्योक्तौविधिः कृच्छ्रेवपनंव्रतंचरेत् श्वेतोभूतौपौर्णमासीमुपवसेत् आप्यायस्वसंतेपयांसिनवोनवइतिचै
ताभिस्तर्पणमाज्यहोमोहविषश्चानुमंत्रणंउपस्थानंचचंद्रमसः यद्देवादेवहेडनमितिचतस्रभिराज्यंजुहुयाद्देवकृतस्येतिचांतेसमिद्भिः ॐ भूः ॐ भु
वः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यंयशः श्रीऊर्क दृढ ॐ जः तेजः पुरुषः धर्मः शिवइत्येतैर्ग्रासानुमंत्रणंप्रतिमंत्रंमनसानमःस्वाहेतिवा
सर्वानेतैरेवग्रासान्भुंजीत तद्ग्रासप्रमाणमास्याविकारेणेचरुमेक्ष्यसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानिह्वींषिउत्तरोत्तरंप्रशस्तानिपौर्ण-
मास्यांपंचदशग्रासान्भुक्त्वाएकैकापचयेनापरपक्षमक्षीणत् अमावास्यायामुपोष्यैकैकोपचयेनपूर्वपद्धतिविपरीतमेकेषामेषचांद्रायणोमासइति अत्र-
ग्रासप्रमाणमास्याविकरिणेतियदुक्तंतद्बालाभिप्रायम् शिरव्यंडपरिमितपंचग्रासभोजनाद्वाक्तैः क्षीरादिद्रवहविषांशिरव्यंडपरिमितत्वंतुपूर्णपुटाकादि
नासंपादनीयम् तथाकुक्कुटांडाद्र्यामलकादीनितुग्रासपरिमाणानिस्मृत्यंतरोक्तानिशक्तिविषयाणि शिरव्यंडपरिमाणालघुत्वात्तेषां यत्पुनरुक्तंश्वोभू
तांपौर्णमासीमुपवसेदित्यत्रचतुर्दश्यामुपवासंमभिधायपौर्णमास्यांपंचदशग्रासान्भुक्तेत्यादिनाद्वात्रिंशदहरात्मकत्वंचांद्रायणस्योक्तम् तत्प्रक्षांत
रप्रदर्शनार्थंनसार्वत्रिकंयोगीश्वरवचनानुरोधेनत्रिंशदहरात्मकस्यदर्शितत्वात् यद्येतत्सार्वत्रिकंस्यात्तदानैरंतर्येणसंवत्सरेचांद्रायणानुष्ठानानुपपत्तिः
स्यात् चंद्रगत्यनुवर्त्तनानुपपत्तिश्च ३२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चांद्रायणांतरमाह पिंडानांचत्वारिंशदधिकंशतद्वयंमासेनभुंजीत यथाकथंचित्प्रतिदिनंमध्यान्हेष्टौग्रासान्तथानक्तंदिनयोश्चतुरश्चतुरोवाअथैकस्मिंश्चतुरोप रस्मिन्द्वादशतथैकरात्रमुपोष्यापरस्मिन्षोडशवेत्यादिप्रकाराणामन्यतमेनशक्त्याद्युपेक्षयाभुंजीतेत्येतत्पूर्वोक्तचांद्रायणद्वयादपरंचांद्रायणम् अतस्तयोर्नायंग्रासंख्यानियमः किंतुपंचविंशत्यधिकंशतद्वयसंख्येव मनुनाचैतेप्रकारादर्शिताः अष्टावष्टौसमश्नीयात्पिंडान्मध्यंदिनेस्थिते नियतात्माहविष्यस्य यतिचांद्रायणंचरेत् चतुरःप्रातरश्नीयात्पिंडान्विप्रःसमाहितः चतुरोस्तमितेसूर्यैशिशुंचांद्रायणंचरेत् यथाकथंचित्पिंडानांतिस्रोशीतिःसमाहितः मासेनाश्नन्हविष्यस्यचंद्रस्यैतिसलोकतामिति तथाचत्वारिंशच्छतद्वयन्यूनसंख्यायासंपाद्यस्यापिसंग्रहार्थमपरग्रहणं यथाहयमः त्रींस्त्रीन्पिंडान्समश्नीयान्नियतात्मादृढव्रतः हविष्यान्नस्यवैमासमृषिचांद्रायणंस्मृतमिति एषुचयतिचांद्रायणप्रभृतिषुनचंद्रगत्यनुसरणमपेक्षितम् अतस्त्रिंशद्दिनात्म कसाधारणेनमासेननैरंतर्येणचांद्रायणानुष्ठानेयदिकथंचित्तिथिवृद्धिह्रासवशात्पंचम्यादिष्वारंभोभवतितथापिनदोषः यद्यपिसोमायनाख्यंमास व्रतंमार्कंडेयेनोक्तम् गोक्षीरसप्तरात्रंतुपिबेत्स्तनचतुष्टयात् स्तनत्रयात्सप्तरात्रंसप्तरात्रंस्तनद्वयात् स्तनेनैकेनषड्रात्रंत्रिरात्रंवायुभुग्भवेत् एतत्सोमायनं नाममहाकल्मषनाशनमिति स्मृत्यंतरेसप्ताहंचेत्येतद्गोस्तनमखिलमथत्रीन्स्तनान्दोतयैकंकुर्यात्त्रींश्चोपवासान्यदिभवतितदामासिसोमायनंतत् तदपि चांद्रायणधर्मकमेव हारीतेन अथातश्चांद्रायणमनुक्रमिष्यामइत्यादिनासेतिकर्त्तव्यताकंचांद्रायणमभिधायैवसोमायनमित्यतिदेशाभिधानात् यत्तु

यथाकथंचित्पिंडानांचत्वारिंशच्छतद्वयम् मासेनैवोपभुंजीतचांद्रायणमथापरम् ३२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नस्तेनकृष्णाचतुर्दशीमारभ्यशुक्लद्वादशीपर्यंतंसोमायनमुक्तम् चतुर्थीप्रभृतिचतुस्तनेनत्रिरात्रंत्रिस्तनेनत्रिरात्रंद्विस्तनेनत्रिरात्रंएकस्तनेनत्रिरात्रमेवमेकस्तनप्रभृतिपुनश्चतुस्तनांतंयातेसोमचतुर्थीतनूस्तयानः पाहितस्यैनमःस्वाहायातेसोमपंचमीषष्टीत्येवंयथार्थास्तिथिहोमाएकमासंएनोभ्यःपूतश्चंद्रमसःसमानतांसलोकतांसायुज्यंचगच्छतीतिचतुर्विंशतिदिनात्मकंसोमायनमुक्तंतदशक्तविषयम् ३२५ अथकृच्छ्रचांद्रायणसाधारणीमितिकर्त्तव्यतामाह कृच्छ्रंप्राजापत्यादिकंचांद्रायणंवात्रिषवणस्नानयुक्तःकुर्यात् एतच्चतप्तकृच्छ्रव्यतिरेकेण तत्रसकृत्स्नायीसमाहितइतिमनुनाविशेषाभिधानात् यत्पुनस्तप्तकृच्छ्रेषुत्रिषवणस्नानमभिहितंत्रिरह्नित्रिर्निशायांतुसवासाजलमाविशेदितितदशक्तविषयम् यत्पुनर्वैश्यंपायनेनद्वैका

कुर्यात्त्रिषवणस्नायीकृच्छ्रंचांद्रायणंतथा पवित्राणिजपेत्सिंडान्गायत्र्याचाग्निमंत्रयेत् ३२६

लिकंस्नानमुक्तम् स्नानंद्विकालमेवस्यात्त्रिकालंवाद्विजन्मनइतितत्त्रिषवणस्नानंशक्तस्यवेदितव्यम् यत्पुनर्गार्ग्येण एकवासाश्चरेद्भैक्ष्यंस्नात्वावासोनपीडयेत् तदपिशक्तस्यैव एकवासाआर्द्रवासालब्धाशीस्यंडिलेशयइत्येकवस्त्रतायाअपिशंखेनपाक्षिकत्वाभिधानात् स्नानेचहारीतेनविशेषउक्तः त्र्यवरंशुद्धवतीभिः स्नात्वाघमर्षणमंतर्जलेजपित्वाधौतमहतंवासः परिधायसाम्नासौम्येनादित्यमुपतिष्ठेदिति स्नानानंतरंचपवित्राणिजपेत् पवित्राणिच अघमर्षणंदेवकृतः शुद्धवत्यस्तरत्समाइत्यादिवसिष्ठादिप्रतिपादितानामन्यतमान्यर्थाविरुद्धेषुकालेषुजपेत् सावित्रींवासावित्रींवाजपेन्नित्यंपवित्राणिचशक्तितइतिमनुस्मरणात् यत्तुगौतमेनोक्तम् रौरवयोधाजपेन्नित्यंप्रयुंजीतेतितदपिपवित्रत्वादेवोक्तं नपुनर्नियमाय तथासतिश्रुत्यंतर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूलत्वकल्पनाप्रसंगात् अतोनधीतसामवेदेनगायत्र्यादिकमेवजप्तव्यम् यदपिनमोहमायमोहमायइत्यादिपठित्वाएताएवाज्याहुतयइत्युक्तं तदपिननैयमि
कम् किंतुमहाव्याहृतिभिर्होमस्तिलैः कार्योद्विजन्मनेति मनुनामहाव्याहृतिभिर्होमविधानात् तथाषड्विंशन्मतेप्युक्तम् जपहोमादियत्किंचित्कृच्छ्रोक्तंसंभ
वेन्नचेत् सर्वंव्याहृतिभिः कुर्याद्गायत्र्याप्रणवेनचेति आदिग्रहणादुदकतर्पणादित्योपस्थानादेर्ग्रहणंम् अतएववैशंपायनः स्नात्वोपतिष्ठेदादित्यंसौ-
रीभिस्तुकृतांजलिरिति एवमन्येष्वपिविरोधिपदार्थेषुविकल्पआश्रयणीयः अविरोधिषुसमुच्चयः शाखातराधिकरणन्यायेनसर्वस्मृतिप्रत्ययत्वात्कर्मणोजपसंख्यायांचवि
शेषस्तेनैवदर्शितः ऋषभंविरुजंचैव तथाचैवाघमर्षणम् गायत्रींवाजपेद्देवींपवित्रांवदमातरम् शतमष्टशतंवापरवापिसहसाममउपांशुमनसावापितर्पये
त्पितृदेवताः मनुष्यांश्चैवभूतानिप्रणम्यशिरसाततइति तथापिंडांश्चप्रत्येकंगायत्र्याचाभिमंत्रयेत् यमेनापिविशेषउक्तः अंगुल्यग्रेस्थितंपिंडंगा
यत्र्याचाभिमंत्रितम् प्राश्याचम्यपुनःकुर्यादन्यस्याप्यभिमंत्रणमिति अतश्चोंभूर्भुवःस्वरित्यादिभिर्गौतमोक्तैरभिमंत्रणमंत्रैः सहास्यविकल्पः यत्पुनरा-
प्यायस्वसंतेपयांसीत्यादिभिः पिंडकरणात्पूर्वंहविषोनुमंत्रणमुक्तंतद्भिन्नकार्यत्वान्नसमुच्चीयते एतानिचकृच्छ्रादिव्रतानियदाप्रायश्चित्तार्थमनुष्ठीयंतेतदाकेशा
दिवपनपूर्वकंपरिगृहीतव्यानि वपनव्रतंचरेदितिगौतमस्मरणात् अभ्युदयार्थेतुनैववपनम् वसिष्ठेनाप्यत्रविशेषउक्तः कृच्छ्राणांव्रतरूपाणांश्मश्रुकेशादिवा
पयेत् कक्षिरोमशिखावर्जमिति कृच्छ्राणांव्रतरूपाणिवपनादीन्यंगानिवक्ष्यइतिविशेषः पर्षदुपदिष्टव्रतग्रहणंचव्रतानुष्ठानदिवसात्पूर्वेद्युःसायान्हेकार्य
म् तथाहवसिष्ठः सर्वोपायेषुसर्वेषांव्रतानांविधिपूर्वकम् ग्रहणंसंप्रवक्ष्यामिप्रायश्चित्तेचिकीर्षिते दिनांतेनखरोमादीन्प्रवाप्यस्नानमाचरेत् भस्मगो
मयमृद्वारिपंचगव्यादिकल्पितैः मलापकर्षणंकार्यंब्राह्मशौचोपसिद्धये दंतधावनपूर्वेणपंचगव्येनसंयुतम् व्रतंनिशामुखेग्राह्यंबहिस्तारकदर्शने आच
म्यातःपरंमौनीध्यायन्दुष्कृतमात्मनः मनःसंतापनंतीव्रमुद्वहेच्छोकमंततइति बरिरितिग्रामाद्बहिर्निष्क्रम्य स्त्रियाआप्येवमेवव्रतपरिग्रहःकार्यः केश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्मश्रुलोमनखवपनंतुनास्ति चांद्रायणादिष्वेतदेवस्त्रियाः श्मश्रुकेशवपनवर्जमितिबौधायनस्मरणात् वपनादिष्वत्रहारीतेनविशेषउक्तः राजावारावा राजपुत्रोब्राह्मणोवाबहुश्रुतः केशानांवपनंकृत्वाप्रायश्चित्तंसमाचरेत् केशानांरक्षणार्थंतुद्विगुणंव्रतमाचरेत् द्विगुणेतुव्रतेचीर्णेदक्षिणाद्विगुणोभवे दिति एतच्चमहापातकादिदोषविशेषाभिप्रायेणद्रष्टव्यम् विद्वद्विप्रनृपस्त्रीणांनेष्यतेकेशवापनम् कृतेमहापातकिनोगोहंतुश्चावकीर्णिनइतिमनुस्म रणात् जाबालेनाप्यत्रविशेषउक्तः आरभेसर्वरुच्छ्राणांसमाप्तौचविशेषतः आज्येनबहिःशालाग्नौजुहुयाद्व्याहृतीःपृथक् श्राद्धंकुर्याद्व्रतांतेतुगो हिरण्यादिदक्षिणाइति यमेनाप्यत्रविशेषोभिहितः पश्चात्तापान्निवृत्तिश्चस्नानंचांगतयोदितम् निमित्तकानांसर्वेषांतथाचैवानुकीर्त्तनमिति तथागात्रा

अनादिष्टेषुपापेषुरुकृद्विश्चांद्रायणेनतु धर्मार्थंयश्चरेदेतच्चंद्रस्यैतिसलोकताम् ३२७

भ्यंगंशिरोभ्यंगंतांबूलमनुलेपनम् व्रतस्थोवर्जयेत्सर्वंयच्चान्यद्बुलरागरुदिति एवमादिकर्त्तव्यताजातंस्मृत्यंतरात्द्रष्टव्यम् एवमनेनविधिनाव्रतंगृही त्वावश्यंपरिसमापनीयम् अन्यथातुप्रत्यवायः पूर्वव्रतंगृहीत्वातुनाचरेत्कामतोहियः जीवन्भवतिचांडालोमृतश्चाचैवजायतइतिच्छागलेयस्मरणात् इत्यलंप्र पंचेन ३२६ इत्यमुक्तविनियोगस्यचांद्रायणादेःस्वरूपमभिधायलब्धप्रसंगकार्यांतरेपिविनियोगमाह आदिष्यतइत्यादिष्टंप्रायश्चित्तंनविद्यतेआदिष्टेषुपा पेषुतेषुचांद्रायणेनरुद्धिः चशब्दात्साजापत्यादिभिः रुच्छ्रैरेंदवसहितैस्तन्निरपेक्षैर्वारुद्धिः तथाचषट्त्रिंशन्मतेभिहितम् यानिकानिचपापानिगुरोर्गुरुतरा णिच रुच्छ्रातिरुच्छ्रचांद्रैस्तुशोध्यतेमनुरब्रवीदितित्रयाणांसमुच्चयःप्रतिपादितः उशनसाचद्वयोः समुच्चयउक्तः दुरितानांदुरिष्टानांपापानांमहतामपि रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छ्रंचांद्रायणंचैवसर्वपापप्रणाशनमिति दुरितमुपपातकं दुरिष्टंपातकम् गौतमेनतुकृच्छ्रातिकृच्छ्रौचांद्रायणमितिसर्वप्रायश्चित्तसमासकरणेनैव
वनिरपेक्षताकृच्छ्रातिकृच्छ्रयोःसूचिता चांद्रायणस्यचतन्निरपेक्षता इतिशब्देनत्रयाणांसमुच्चयः केवलप्राजापत्यस्यतुनैरपेक्ष्यंचतुर्विंशतिमतेभि
हितम् लघुदोषेत्वनादिष्टेप्राजापत्यंसमाचरेदिति गौतमेनापिप्राजापत्यादेर्नैरपेक्ष्यमुक्तम् प्रथमंचरित्वाकृच्छ्रंचिपूतःकर्मण्योभवति द्वितीयंचरित्वायद
न्यन्महापातकेभ्यःपापंकुरुतेतस्मान्मुच्यते तृतीयंचरित्वासर्वस्मादेनसोमुच्यतइतिमहापातकादपीत्यभिप्रेतम् मनुनाप्युक्तम् पराकेनामकृच्छ्रेयं
सर्वपापापनोदनइति हारीतेनाप्युक्तम् चांद्रायणंयावकश्चतुलापुरुषएववा गवांचैवानुगमनंसर्वपापप्रणाशनम् तथा गोमूत्रंगोमयंक्षीरंदधिघृ-
र्पिःकुशोदकम् एकरात्रोपवासश्चश्वपाकमपिशोधयेत् तथातप्तकृच्छ्रमधिकृत्यतेनैवोक्तम् एषकृच्छ्रोद्विरभ्यस्तःपातकेभ्यःप्रमोचयेत् त्रि
रभ्यस्तोयथान्यायंभ्रूणहत्यांव्यपोहतीति उशनसोक्तम् यत्रोक्तंयत्रवानोक्तंमहापातकनाशनम् प्राजापत्येनकृच्छ्रेणशोधयेन्नात्रसंशयइति
एतानिप्राजापत्यादीनिअनादिष्टेषूपपातकादिषुसकृदभ्यासापेक्षयाव्यस्तानिसमस्तानिवायोजनीयानि तथाआदिष्टव्रतेष्वपिमहापातकादि
षुअभ्यासापेक्षयायोजनीयानि अतएवोक्तंयमेन यत्रोक्तमित्यादि गौतमेनाप्युक्तनिष्कृतीनांसंग्रहार्थंसर्वप्रायश्चित्तग्रहणंकृतम् तथा
यदपितेनैवोक्तंद्वितीयंचरित्वायदन्यन्महापातकेभ्यःपापंकुरुतेतस्मात्प्रमुच्यतइत्युक्तातृतीयंचरित्वासर्वस्मादेनसोमुच्यतइति तदपिमहापातकाभि
प्रायमुक्तम् नतुक्षुद्रपातकाभिप्रायम् नचमहापातकंमनूक्तनिष्कृतिकंसंभवति तस्मादुक्तनिष्कृतीनामपिप्राजापत्यादयोयोजनीयाः तत्रद्वाद
शवार्षिकव्रतेद्वादशाद्वादशदिनानिएकैकंप्राजापत्यंचपरिकल्प्यगण्यमानप्राजापत्यानांषष्ट्यधिकशतत्रयंद्वादशवार्षिकेवैकल्पिकमनुष्ठेयंभवति त
दशक्तोचतावत्योवाधेनवोदातव्याः तदसंभवेनिष्काणांषष्ट्यधिकशतत्रयंदातव्यम् तथास्मृत्यंतरं प्राजापत्यक्रियाशक्तोधेनुदद्याद्विचक्षणः धे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोरभावेदातव्यंमूल्यंतुल्यमसंशयम् मूल्यार्धमपिनिष्क्रयंवातदर्द्धंवाशक्त्यपेक्षयादातव्यम् गवामभावेनिष्क्रयस्यात्तदर्द्धपादमेववेतिस्मरणात् मूल्यदानस्याप्यशक्तौतावंतोवोदवासाःकार्याः तत्राप्यशक्तौगायत्रीजपः षट्त्रिंशल्लक्षसंख्याकःकार्यः कृच्छ्रोयुतंतुगायत्र्याउदवासास्तथैवच धेनुप्रदानंविप्रायसममेतच्चतुष्टयमितिपराशरस्मरणात् यत्तुचतुर्विंशतिमतेभिहितं गायत्र्यास्तुजपन्कोटिंब्रह्महत्यांव्यपोहति लक्षाशीतिंजपेद्यस्तुसुरापानाद्विमुच्यते पुनातिहेमहर्तारंगायत्र्यालक्षसप्ततिः गायत्र्याःषष्टिभिर्लक्षैर्मुच्यतेगुरुतल्पगइति द्वादशवार्षिकतुल्यविधानतयोक्तम् नपुनरशक्तविषयमितिनविरोधः एवमन्येपि कृच्छ्रोदेव्ययुतंचैवप्राणायामशतद्वयम् तिलहोमसहस्रंतुवेदपारायणंतथेत्यादयः प्रत्याम्नायाश्चतुर्विंशतिमन्वादिशास्त्राभिहिताः षष्ट्यधिकत्रिशतगुणितमहापातकेषुबोद्धव्याः अतिपातकेषुसप्तत्यधिकशतद्वयंप्राजापत्यानांकर्त्तव्यंतावंतोवाधेन्वादयः प्रत्याम्नायाःपातकेषुसाशीतिशतंप्राजापत्याःप्रत्याम्नायाः धेन्वादयस्तावंतएववा तथाचतुर्विंशतिमतेभिहितंजन्मप्रभृतिपापानिबहूनिविविधानिच कृत्वावाग्ब्रह्महत्यायाःषडब्दंव्रतमाचरेत् प्रत्याम्नायेगवांदेयंसाशीतिधनिनाशतम् तथाष्टादशलक्षाणिगायत्र्यावाजपेद्बुध इति इदमेवचद्वादशवार्षिकेव्रतेद्वादशाद्वादशदिनैरेकैकप्राजापत्यकल्पनायांलिंगम् एवमुपपातकेष्वेवार्षिकप्रायश्चित्तविषयभूतेषुनवतिप्राजापत्यास्तावंतः प्रत्याम्नायाः त्रैमासिकविषयेपुनःसार्धसप्तप्राजापत्याःप्रत्याम्नायाश्चधेनूदवासादयस्तावंतएव मासिकव्रतविषयेतुसार्द्धप्राजापत्यद्वयम् तावानेवप्रत्याम्नायः चांद्रायणविषयभूतेषुपुनरुपपातकेषुप्राजापत्यत्रयम् तदशक्तस्यप्रत्याम्नायस्तावानेव यत्पुनश्चतुर्विंशतिमतेभिहितम् अशक्तौचांद्रायणेदेव्याः प्रत्याम्नायविधौसदेति तदपिधनिनःपिपीलिकामध्यादिचांद्रायणप्रत्याम्नायविषयम् मासातिकृच्छ्रविषयभूतेषुपुनरुपपातकेषुसार्द्धसप्तप्राजापत्याःप्रत्याम्नायाश्चधेन्वादयस्तावंतएव प्राजापत्येतुगामेकांदद्यात्सांतपनेद्वयम् पराकतप्तकृच्छ्राति कृच्छ्रेतिस्त्रस्तुगास्तथेतिच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुर्विंशतिमतेभिधानात् एतच्चैकैकं ग्रासमश्नीयादित्यामलकपरिमितैकैकग्रासपक्षेवेदितव्यम् पाणिपूरान्नभोजनपक्षेपुनर्धेनुद्वयमेव प्राजापत्यस्य
षडुपवासतुल्यत्वात् द्विगुणत्वाच्चातिकृच्छ्रस्य यद्यपिनवसुदिवसेषुपाणिपूरान्नभोजनंतथापिनैरंतर्येणद्वादशदिवसानुष्ठाने क्लेशातिशयषडहोपवास
समानप्राजापत्यद्वयतुल्यत्वमेव प्राजापत्यस्यषडुपवासतुल्यत्वंयुक्तमेव तथाहि प्रथमेत्र्यहेसायंतनभोजनत्रयनिवृत्तावेकोपवाससंपत्तिः द्वितीयेत्र्य
हेप्रातःकालभोजनत्रयवर्जनेपरस्यतथाअयाचितत्र्यहेपिसायंतनभोजनत्रयवर्जनेन्यस्येत्येवंनवभिर्दिनैरुपवासत्रयम् ततश्चांत्यत्र्यहोपवासत्रयमिति
युक्तंषडुपवासतुल्यत्वम् ऋषभैकादशगोदानसहितत्रिरात्रोपवासात्मकगोव्रतेतुसार्द्धैकादशप्राजापत्यास्तावत्संख्याकाश्चोपवासादयः प्रत्याम्नायाः मासप
योव्रतेतुसार्द्धंप्राजापत्यद्वयम् पराकात्मेतूपपात कव्रतेप्राजापत्यत्रयेपराकतप्तातिकृच्छ्रस्थानेकृच्छ्रत्रयंचरेत् सांतपनस्यचाप्यर्द्धमशक्तौव्रतमाचरेदितिषट्त्रिं
शन्मतेभिधानात् चांद्रायणपराककृच्छ्रातिकृच्छ्रास्तुप्राजापत्यत्रयात्मकद्वादशवार्षिकव्रतस्थानेविंशत्युत्तरशतसंख्याअनुष्ठेयाः तत्प्रत्याम्नायस्तुधेन्वा
दयस्त्रिगुणाः अतिपातकेषुनवतिसंख्याकाश्चांद्रायणादयः तत्समेषुपुनःपातकपदाभिधेयेषुषष्टिसंख्याः उपपातकेषुत्रैवार्षिकविषयेषुत्रिंशत्संख्याः त्रै
मासिकेषुगोव्रतस्थानेषुगोमूत्रस्थानादीनिकर्त्तव्याबाहुल्याच्चांद्रायणादित्रयम् मासिकव्रतेतुयोगीश्वरोक्तंएकमेवचांद्रायणम् धेनूदवासादिप्रत्याम्नायस्तु
सर्वत्रत्रिगुणएव प्रकीर्णकेषुपुनःसंप्रतिपदोक्तप्रायश्चित्तानुसारेणप्राजापत्यं पादादिकस्ययोजनीयम् आवृत्तौपुनश्चांद्रायणादिकमितिएतद्विगवलंबने
नान्यत्रापिकल्पनाकार्या यत्पुनर्बृहस्पतिनोक्तम् जन्मप्रभृतियत्किंचित्पातकंचोपपातकम् तावदावर्त्तयेत्कृच्छ्रंयावत्षष्टिगुणंभवेदिति तद्द्वेद्वेपरदारइति
गौतमोक्तद्वैवार्षिकसमानविषयम् तथात्रैमासिकादिविषयभूतोपपातकावृत्तिविषयंवा पातकपदाभिधेयचांडालादिस्त्रीगमेद्विरभ्यासविषयंच तत्रज्ञा
नात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैंदवद्वयमितिसकृद्बुद्धिपूर्वगमनेकृच्छ्राब्दविधानात् तदभ्यासेद्विवर्षतुल्यषष्टिकृच्छ्रविधानंयुक्तमेव यत्तुसुमंतुनोक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदप्यसकृदभ्यस्तं बुद्धिपूर्वमघंमहत् तच्छुद्ध्यत्यब्दकृच्छ्रेणमहतः पातकादतइतिदक्षुपपातकाद्यावृत्तिविषयं तथाऽज्ञानादेंद्रवद्वयमितियमोक्तेंद्रव
द्वयमितियमोक्तेंदवद्वयविषयभूतपातकावृत्तिविषयंवा यस्तुतपस्यसमर्थोधान्यसमृद्धश्चसकृच्छ्रादिव्रतानिद्विजाग्र्येभोजनदानेनसंपादयेत् तथाहि
स्मृत्यंतरं कृच्छ्रोयंचातिकृच्छ्रेत्रिगुणमहररहस्त्रिंशद्देवतृतीयेचत्वारिंशच्चतुस्त्रिगुणितगुणताविंशतिःस्यात्सराके कृच्छ्रेसांतापनाख्येभवतिषडधिकाविंश-
तिसैवहीनाद्वाभ्यांचांद्रायणेस्यात्तपसिकृशबलोभोजयेद्विप्रमुख्यानिति अहरहरितिसर्वत्रसंबंधनीयम् तृतीयःकृच्छ्रातिकृच्छ्रः अत्रप्राजापत्यदि
वसकल्पनयाविद्वद्विप्राणांषष्टिभोजनंभवति यत्तुचतुर्विंशतिमतेभिहितम् विप्राद्वादशवाभोज्याः पावकेष्टिस्तथैवच अन्यावापावनीकाचित्सामान्या
द्धर्मनीषिणइतिप्राजापत्यस्थानेद्वादशानांविप्राणांभोजनमुक्तंतन्निर्धनविषयम् यच्चांद्रायणस्यापितत्रैवप्रत्याम्नायेनोक्तम् चांद्रायणंमृगारिष्टिः

कृच्छ्रकृत्धर्मकामस्तुमहतींश्रियमाप्नुयात् तथागुरुक्रतुफलंप्राप्नोतिसकृसमाहितः ३२८

पावनेष्टिस्तथैवच मित्रविंदापशुश्चैवकृच्छ्रंमासत्रयंतथा नित्यनैमित्तिकानांचकाम्यानांचैवकर्मणाम् इष्टीनांपशुबंधानामभावेचूरवः स्मृताइतित
दपिचांद्रायणशक्तस्य यत्तुकृच्छ्रंमासत्रयंतथेतिकृच्छ्राष्टकं प्रत्याम्नातंतदपिबठरमूर्खविषयम् चांद्रायणंत्रिभिः कृच्छ्रैरितिदर्शितत्वादलमतिप्रसं
गेन् प्रकृतमनुसरामः यस्त्वभ्युदयकामोधर्मार्थकाम्यनियोगनिष्पत्त्यर्थंएतच्चांद्रायणमनुतिष्ठतिनपुनः प्रायश्चित्तार्थमसौचंद्रसालोक्यंस्वर्गविशेषं
प्राप्नोति एतच्चसंवत्सरावृत्त्यभिप्रायेण एकमाप्त्वाविपापोविपाप्मासर्वमेनोहंति द्वितीयमाप्त्वादशापूर्वान्दशापरान् आत्मानंचैकविंशंपंक्तिंचपुनाति सं
वत्सरंचाप्त्वाचंद्रमसःसलोकतांव्रजतीतिगौतमस्मरणात् ३२७ किंचाह यस्त्वभ्युदयकामः प्राजापत्यादिकृच्छ्राननुतिष्ठतिसमहतींराज्यादिलक्षणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रियमनुभवति यथागुरुक्रतूनांराजसूयादीनांकर्त्तातत्फलंस्वराज्यादिलक्षणंमहत्फलंलभते तथायमपिसमाहितःसकलांगकलापमविकलमनुतिष्ठति तिफलमिहप्रकाशनार्थंक्रतुदृष्टांतकीर्त्तनम् क्रतुसमाहितइत्यनेनाविकलशास्त्रार्थानुष्ठानवत्काम्यकर्मतयांगवैकल्येफलासिद्धिंद्योतयति अतोनान्यत्र प्रायश्चित्तेष्वेवयावत्संभवांगानुष्ठानमंगीकरणीयमितिदूरोत्सारितंप्रत्याम्नायोपादानम् क्रुच्छ्राद्यनुष्ठानावृत्तौत्वधिकारिणःफलावृत्तिःकर्मण्यारंभभा

श्रुत्वैतानृषयोधर्मान्याज्ञवल्क्येनभाषितान् इदमूचुमहात्मानंयोगीद्रमतितोजसम् ३२९

व्यत्तादिति न्यायलभ्यास्तितेवेतितदत्रविवक्षितम् ३२८ प्रागुदिताखिलार्थोपसंहारव्याजेनधर्मशास्त्रसाधारणादिविधीन्सार्थवादान्प्रार्थनावरदानरूपेणप्रतिपादयितुमाह अत्रहिवर्णाश्रमादिव्यावृत्त्याधर्माःषट्प्रकाराःप्रतिपादिताः तानखिलान्योगीश्वरप्रतिपादितान्ऋषयःश्रुत्वाप्रहर्षोत्फुल्ललोचनास्तंमहिमगुणशालिनमचिंतनीयशक्तिविषयमिदमभिधास्यमानमूचिवांसः ३२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University,Ramtek Collection

इत्थमृज्वर्थैः श्लोकैः सामश्रवः प्रभृतयोनेकधा प्रार्थयंतेस्म ३२० ३२१ ३२२ ३२३ अपरामपिप्रार्थनामाह यस्त्विदंधर्मशा
द्वान् द्विजान् श्रावयेत् तस्याश्वमेधफलंभवेदितिश्रावणविध्यर्थवादः तदेतत्सर्वमर्थितमर्थं सर्वमत्रभवाननुमन्यताम् ३२४ वरद्व

यइदंधारयिष्यंतिधर्मशास्त्रमतंद्विताः इहलोकेयशःप्राप्यतेयास्यंतित्रिविष्टपम् ३२५
विद्यार्थीप्राप्नुयाद्विद्यांधनकामोधनंतथा आयुःकामस्तथावायुः श्रीकामोमहतींश्रियम्
श्लोकत्रयमपित्वस्माद्यः श्राद्धेश्रावयिष्यति पितॄणांतस्यतृप्तिःस्यादक्षय्यानात्रसंशय
ब्राह्मणःपात्रतांयातिक्षत्रियोविजयीभवेत् वैश्यश्चधान्यधनवानस्यशास्त्रस्यधारण
यइदंश्रावयेद्विद्वान् द्विजान्पर्वस्वपर्वसु अश्वमेधफलंतस्य तद्भवाननुमन्यता
श्रुत्वैतद्याज्ञवल्क्योपिप्रीतात्मासुनिभाषितम् एवमस्त्वितिहोवाचनमस्कृत्वास्वय

मिर्भाषितंश्रुत्वायोगींद्रोपिनिर्मितधर्मशास्त्रसाधारणादिफलप्रार्थनोन्मीलितमुखपंकजः स्वयंह्युवेब्रह्म
वत्सित्येवकिलभगवान्बभाषे ३२५ इतिश्रीभारद्वाजपद्मनाभभट्टोपाध्यायात्मजस्यश्रीमत्परम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुमिताक्षरायांयाज्ञवल्क्यधर्मशास्त्रविवृत्तौतृतीयोऽध्यायः ३ ४ ५ ६
अथात्राध्यायानुक्रमणिकालिख्यते . तत्राद्यंसूतकप्रकरणम् १ आपद्धर्मप्रकरणम् २ वानप्रस्थप्र
यश्चित्तप्रकरणं ५ तत्रादौकर्मविपाकः ६ महापातकादिनिमित्तपरिगणनम् ७ महापातकप्र
कप्रायश्चित्तानि ९ प्रकीर्णकप्रायश्चित्तप्रकरणम् १० पतितत्यागविधिः ११ व्रतग्रहणविधिः १२
लक्षणम्१४ इतिप्रकरणानि उत्तमोपपदस्येयंशिष्यस्यकृतिरात्मनः धर्मशास्त्रस्यविवृतिर्विज्ञानेश्वरयो
गताविवृत्तिर्नकस्यविहितायिदुषः प्रमिताक्षरापिविपुलार्थवतीपरिषिंचतिश्रवणयोरमृतम् २ गंभीरामिः प्र
नल्पार्थाभिरल्पाभिर्विवृतिर्विहितामया ३ नासीदस्तिभविष्यतिक्षितितलेकल्याणकल्पंपुरंनोदृष्टः श्रुतएवबाक्षि
नेश्वरपंडितोनभजतेकिंचान्यदन्योपमश्चाकल्पंस्थिरमस्तुकल्पलतिकाकल्पंतदेतन्नयम् ४ स्रष्टावाचांमधुरवपुष
मनिवायजुषामर्थिसार्थार्थनायाः ध्यातामूर्त्तेर्मुरविजयिनोजीवतादार्कचंद्रंजेतारीणांतनुसहसुवांतत्त्वविज्ञाननाथ
कुलतिलकस्याचशैलाधिराजादाचप्रत्यकूपयोधैश्चपलमितिकुलोत्तुंगरिंगत्तरंगात् आचप्राचःसमुद्रान्ततृपतिशिरोरत्न
द्रतारंजगदिदमखिलंविक्रमादित्यदेवः ६ अंतर्मुरवानियदिरवानितपस्ततःकिंनांतर्मुरवानियदिरवानितपस्ततःकिम् अंतर्म
स्ततःकिंनांतर्बहिर्यदिहरिश्चेतपस्ततःकिम् ७ अथप्रायश्चित्ताध्यायानुक्रमणिका स्तेयप्रायश्चित्तप्रकरणम् १ सु
त्तं २ संसर्गिकप्रायश्चित्तं ३ महापातकप्रायश्चित्तप्रकरणम् ४ गोवधप्रायश्चित्तम् ५ पारदार्यप्रायश्चित्तम् ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकरणम् ७ स्त्रीवधप्रायश्चित्तम् ८ उपपातकप्रायश्चित्तम् ९ भक्ष्याभक्ष्यप्रायश्चित्तम् १० प्रकीर्णकप्रायश्चित्तम् १
श्चित्तप्रकरणम् १२ सुवर्णस्तेयप्रायश्चित्तम् १३ गुरुतल्पगमनप्रायश्चित्तम् १४ महापातकरहस्यप्रायश्चित्तं १५ रहस्य
महासांतपनकृच्छ्रम् १७ पर्णकृच्छ्रारव्यंव्रतं १८ प्राजापत्यकृच्छ्रं १९ अतिकृच्छ्रं २० कृच्छ्रातिकृच्छ्रं २१ सौम्यकृच्छ्रं २
नम् २३ इतिप्रायश्चित्तसंरव्या ६ ६ ६ ६ ६

वैश्यजातिसमुत्पन्नोहेगिष्टेत्युपनामकः॥ बापुसदाशिवइतिप्रसिद्धः पुरुषोभवत्॥ १॥ निर्मिते
कल्पके॥ अंकांकात्यष्टिशाकेच १७९९ ईश्वराब्दोमधौसिते॥ भूतायांसौम्यवारेच वृद्धिरे
मुद्रितंतेनलोकानांहितकाम्यया॥ दृष्टिदोषेणयज्जातंन्यूनाधिक्यंतथाज्ञतः॥ पुरोभागि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिमिताक्षराप्रायश्चित्तारव्यस्तृतीयोऽध्यायःसमाप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=10.06.20 12:36
,TRANSFERRED=2020/06/10 at 12:59:11
,PAGES=127
,TYPE=STD
,NAME=S0003109
,Book Name=M-2902-PRAYCHIT TTARVAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection